Downloaded from https:// www.studiestoday.com

कक्षा 10

व्याकरणकौमुदी (द्वितीयो भागः)

कक्षा
10

# व्याकरणकौमुदी
## (द्वितीयो भागः)

प्रवेशिका
संस्कृत-प्रथमपत्रम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# व्याकरणकौमुदी (द्वितीयो भागः)

(प्रवेशिकाकक्षायै स्वीकृतं पाठ्यपुस्तकम्)

**माध्यमिक-शिक्षा-बोर्ड राजस्थानम्, अजयमेरुः**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# पाठ्यपुस्तक-लेखन-समितिः

व्याकरणकौमुदी (द्वितीयो भागः)
(प्रवेशिकाकक्षायै स्वीकृतं पाठ्यपुस्तकम्)

व्याख्याकारौ (संयोजकः)
**डॉ. महावीरप्रसादसारस्वतः**
प्रोफेसर व्याकरणशास्त्रम्
श्रीगंगाशार्दूल-राजकीय-आचार्य-संस्कृत-महाविद्यालयः
बीकानेरम्

**डॉ. भास्करशर्मा**
व्याख्याता
राजकीय-आचार्य-संस्कृत-महाविद्यालयः
भरतपुरम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रास्ताविकं किञ्चित्

पाणिनीयं व्याकरणं सर्वातिशायि इति सर्वेषां मतिः। अत्र प्रवेष्टुं लघुसिद्धान्तकौमुदी प्रवेशद्वारम्। अतोऽस्याः महत्त्वं सर्वे जानन्ति। अत एव संस्कृतशिक्षालयेषु सर्वत्रैव प्राथमिकस्तरे इयं लघुकौमुदी पाठ्यते। अनया सारल्येन व्याकरणस्य प्रारम्भिके ज्ञाने सत्येव प्रौढसिद्धान्तेजु बालानां प्रवेशो भवितुमर्हति। यद्यपि लघुसिद्धान्तकौमुद्याः बह्व्यः व्याख्याः उपलभ्यन्ते, याः प्रख्यातविद्वद्भिः लिखिताः सन्ति, तथापि साम्प्रतिके वातावरणे संस्कृतस्य छात्राः अन्यैः विषयै सह संस्कृतव्याकरणं पठन्ति, अतः तेषु विषयभारः अधिकः। तस्मात् हेतोः काचित् तादृशी व्याख्या अपेक्ष्यते, यत्र सरलसंस्कृतमाध्यमेन सूत्राणामर्थः प्रयोगलेखनप्रकारश्च विज्ञापितो भवेत्। अजयमेरुस्थराजस्थानमाध्यमिकशिक्षामण्डलेन प्रवेशिकापरीक्षायाः विद्यार्थिनां कृते संस्कृतप्रथमपत्रत्वेन निर्धारितायाः लघुकौमुद्याः तादृशीं काञ्चित् व्याख्यां कर्तुमावामादिष्टौ सन्तौ यथाशक्यं किमप्यत्र लिखितवन्तौ। तत्र कियदावयोः साफल्यमिति तु विद्वांस एव परीक्षणं विधास्यन्ति। कस्याः अपि भाषायाः व्यावहारिकं ज्ञानं पठनेन साकं भाषणेन जायते इति सिद्धान्तमाधारीकृत्य राजस्थानमाध्यमिकशिक्षामण्डलस्य पाठ्यक्रमनिर्धारणसमित्या छात्राणां वाचिकाभिव्यक्तिं सम्भाषणकौशलञ्च वर्धयितुं श्रीमता जनार्दनहेगडेमहाभागेन विरचितं 'अभ्यासदर्शिनी' इति पुस्तकमपि पाठ्यक्रमेऽत्र निर्धारितम्। अतः मण्डलस्यादेशानुसारं हेगडेमहोदयस्य पुस्तकमेतदत्र यथास्वरूपं मुद्रापितमस्ति। मण्डलपक्षतः हेगडेमहोदयाय कृतज्ञतां ज्ञापयावः। अत्र बीकानेरस्थबसन्तसङ्गणककेन्द्रसञ्चालकेन प्रियेण ओझोपाह्वेन बसन्तेन व्यस्ततायामपि सत्यां टङ्कणं कृत्वा आवामुपकृताविति, तस्मै शुभाशिषः। व्याख्ययानया शिक्षकाणां शिक्षार्थिनाञ्च कश्चनापि उपकारो भवति चेत्, कृतकार्यावात्मानावनुभविष्याव:।

अत्र पुस्तके मुद्रणजाताः, दृष्टिदोषजन्याः, प्रमादजाः, अज्ञानजाः वा अशुद्धयोऽपि सम्भवाः, ताः क्षन्तव्याः, सूचनीयाश्च बुधैरागामिनि प्रकाशन अपाकर्तुमिति शम्।

**विद्वद्विधेयौ**

डॉ. महावीरप्रसादसारस्वतः          डॉ. भास्करशर्मा

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कक्षा–10 प्रवेशिका

विषय–संस्कृतम्

विषय–संस्कृतम् (व्याकरणम्) प्रथम–पत्रम्

समय–3:15 होरा पूर्णांक–80+20 = 100

| क्र.सं | अधिगम–क्षेत्रम् | अधिभारः |
|---|---|---|
| | लघुसिद्धान्त–कौमुदी | |
| 1. | अजन्त–प्रकरणम् (लिङ्.गत्रस्य) | 30 |
| 2. | हलन्त–प्रकरणम् (लिङ्.गत्रस्य) | 30 |
| 3. | स्त्रीप्रत्यय–प्रकरणम् | 10 |
| 4. | अव्यय–प्रकरणम् | 05 |
| 5. | धातु–रूपाणि | 05 |

| | | |
|---|---|---|
| 1. अजन्त–प्रकरणात् लिङ्.गत्रस्य रुपसिद्धयः सूत्र–व्याख्याश्च | | |
| (क) रूपसिद्धयः | 10+5+5 | 20 |
| (ख) सूत्र–व्याख्याः | 5+3+2 | 10 |
| 2. अजन्त–प्रकरणात् लिङ्.गत्रस्य रुपसिद्धयः सूत्र–व्याख्याश्च | | |
| (क) रूपसिद्धयः | 10+5+5 | 20 |
| (ख) सूत्र–व्याख्याः | 5+3+2 | 10 |
| 3. स्त्रीप्रत्यय–प्रकरणात् रूपसिद्धयः सूत्र–व्याख्याश्च | 5+5 | 10 |
| 4. अव्यय–प्रकरणद् अव्ययानाम् अर्थः संस्कृते वाक्यप्रयोगश्च | 05 | 05 |
| 5. धातु–रूपाणि (दशलकारेषु) भू, सेव्, वद्, गम्, चुर् | 05 | 05 |

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# विषयानुक्रमणिका


| क्र०सं० | विषयाः | पृ.संख्या |
|---|---|---|
| १. | अजन्तपुँल्लिङ्गप्रकरणम् | १-२९ |
| २. | अजन्तस्त्रीलिङ्गप्रकरणम् | ३०-३६ |
| ३. | अजन्तनपुंसकलिङ्गप्रकरणम् | ३७-४३ |
| ४. | हलन्तपुँल्लिङ्गप्रकरणम् | ४४-६९ |
| ५. | हलन्तस्त्रीलिङ्गप्रकरणम् | ७०-७१ |
| ६. | हलन्तनपुंसकलिङ्गप्रकरणम् | ७२-७४ |
| ७. | अव्ययप्रकरणम् | ७५-७८ |
| ८. | स्त्रीप्रत्ययप्रकरणम् | ७९-८९ |
| ९. | धातुरूपाणि | ९०-९९ |
| १०. | अभ्यासदर्शिनी | १००-२१६ |
| ११. | अवधेयम् | २१७ |


Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



शुक्लां ब्रह्मविचारसारपरमामाद्यां जगद्व्यापिनीं
वीणापुस्तकधारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थितां
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

।। श्रीगणेशाय नमः।।

श्री वरदराजाचार्यप्रणीता

# लघुसिद्धान्तकौमुदी

## अथ अजन्तपुँल्लिङ्गप्रकरणम्

१. **अर्थवदधातुरप्रत्ययः प्रातिपादिकम् १/२/४५**

धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्।

२. **कृत्तद्धितसमासाश्च १/२/४६**

कृत्तद्धितान्तौ समासाश्च तथा स्युः।

३. **स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्।**

सु औ जस् इति प्रथमा। अम् औट् शस् इति द्वितीया। टा भ्याम् भिस् इति तृतीया। ङे भ्याम् भ्यस् इति चतुर्थी। ङसि भ्याम् भ्यस् इति पञ्चमी। ङस् ओस् आम् इति षष्ठी। ङि ओस् सुप् इति सप्तमी।

---

१. अर्थः अस्यास्ति इति अर्थवत्। अत्र शब्दस्वरूपम् इति विशेष्यम् अध्याहार्यम्। न धातुः इति अधातुः, न प्रत्ययः इति अप्रत्ययः इति उभयं अर्थवत्पदस्य विशेषणम्। अत्र अप्रत्ययः इति आवर्तते, अतः प्रत्ययभिन्नं प्रत्ययान्तभिन्नञ्च अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं भवति इति सूत्राशयः। अत्र धनं वनम् इत्यादौ प्रतिवर्णं प्रातिपदिकत्वं वारयितुम् अर्थवत् इत्युक्तम्। सत्यां तु प्रतिवर्णं प्रातिपदिकसंज्ञायां प्रतिवर्णात् सुबुत्पत्तिः स्यात्। धातोः प्रातिपदिकसंज्ञायाम् अहन् (लङि हन् धातोः रूपम्) इत्यत्र ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नलोपः स्यात्। अधातुः इति उक्त्वा वारिते तु प्रातिपदिकत्वे नलोपो न भवति। प्रत्ययानां प्रत्ययान्तानाञ्च प्रातिपदिकत्ववारणाय अप्रत्ययः इत्युक्तम्।

२. कृत् च तद्धितश्च समासश्च इति कृत्तद्धितसमासाः। अत्र पूर्वसूत्रात् ''प्रातिपदिकम्'' इति अनुवर्तते, तच्च बहुवचनान्ततया विपरिणम्यते। कृत्तद्धितयोः प्रत्ययत्वात् 'प्रत्ययग्रहणे तदन्ताः ग्राह्याः' इति परिभाषया कृदन्ततद्धितान्तयोः ग्रहणं भवति, अतः कृत्तद्धितान्तौ इत्युक्तं वृत्तौ। इत्थं कृदन्ताः तद्धितान्ताः समासाश्च प्रातिपदिकसंज्ञाः भवन्तीति सूत्राशयः। कृदन्ते यथा – कर्ता, हर्ता, पाचकः। तद्धिते यथा गार्ग्यः, दाक्षिः, दाशरथिः। समासे – राजपुरुषः, महाराजः।

३. सु औ जस् इति प्रत्ययत्रयं प्रथमासंज्ञम्। अम् औट् शस् इति द्वितीया विभक्तिः। टा भ्याम् भिस् इति तृतीया। ङे भ्याम् भ्यस् इति चतुर्थी। ङसि भ्याम् भ्यस् इति पञ्चमी। ङस् ओस् आम् इति षष्ठी विभक्तिः। ङि ओस् सुप् इति सप्तमी।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. **ङ्याप्प्रातिपदिकात् ४/१/१**

५. **प्रत्ययः ३/१/१**

६. **परश्च ३/१/२**

इत्यधिकृत्य ङ्यन्तादाबन्तात् प्रातिपदिकाच्च परे स्वादः प्रत्ययाः स्युः।

७. **सुपः १/४/१०३**

सुपस्त्रीणि त्रीणि वचनान्येकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः।

८. **द्वयेकयोर्द्विवचनैकवचने १/४/२२**

द्वित्वैकत्वयोरेते स्तः।

९. **विरामोऽवसानम् १/४/११०**

वर्णानामभावोऽवसानसंज्ञः स्यात्। रुत्वविसर्गौ। रामः।

---

४.-६. स्वादिप्रत्ययाः उक्ताः।, एते कुतः स्युः, कुत्र च स्युः इति जिज्ञासां मनसि कृत्वा आह – ङ्याप्. इति। ङी च आप् च प्रातिपदिकञ्च इति (समाहारद्वन्द्वः) ङ्याप्प्रातिपदिकम्, तस्मात्। ङी इत्येनन ङीप्, ङीष्ङीन् इत्येषां ग्रहणम्। आप् इत्यनेन टाप्, डाप्, चाप् इत्येतेषां ग्रहणम्। एषां प्रत्ययत्वात् प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया ङ्यन्तात्, आबन्तात् इत्यर्थः लभ्यते। त्रिसूत्र्याः अस्याः अन्वितार्थः एवं बोध्यः – स्वादिप्रत्ययाः ङ्यन्तात् आबन्तात् प्रातिपदिकात् च परे स्युः।

७. सुप् इति प्रत्याहारः, स्वौजस् इत्यत्र 'सु' इत्यारभ्य 'सुप्' इति पकारं यावत्। सुपः त्रीणि त्रीणि 'सु औ जस्' 'अम् औट् शस्' इत्येवं एकैकम् एकवचनद्विवचनबहुवचनसंज्ञकानि भवन्ति अर्थात् सु इति एकवचनसंज्ञम्,औ इति द्विवचनसंज्ञम्, जस् इति बहुवचनसंज्ञम्, एवमेव द्वितीयातृतीयादिषु अपि बोध्यम्।

८. सुपः इति सूत्रेण लब्धैकवचनादिसंज्ञाः स्वादिप्रत्ययाः कुत्र प्रयुज्यन्ते इति जिज्ञासायामाह – द्वयेकयो.। प्रातिपदिकार्थगतस्य एकत्वस्य विवक्षायाम् एकवचनं, द्वित्वस्य विवक्षायां च द्विवचनम् प्रयुज्यते इति भावः।

९. विरामः अवसानम् इतिच्छेदः। वर्णानाम् अनुच्चारणम् अत्र विरामपदस्य अर्थः। अर्थात् यस्मिन् वर्णे उच्चारिते अव्यवहितोत्तरकाले अन्यवर्णस्य उच्चारणाभावः विरामः तस्य अन्त्यवर्णस्य अवसानसंज्ञा भवति।

**रामः** – राम इति शब्दस्य अर्थवत्त्वात् प्रातिपदिकसंज्ञायां जातायाम् एकत्वविवक्षायां ''स्वौजसमौट्.'' इत्यादिना सूत्रेण एकवचनसंज्ञके सु प्रत्यये आगते राम सु इति स्थितौ ''उपदेशेऽजनुनासिक इत्'' इति सूत्रेणसुप्रत्ययगतस्य उकारस्य इत्संज्ञायां ''तस्य लोपः'' इत्यनेन लोपे कृते राम+स् इति स्थितौ ''ससजुषो रुः'' इति सूत्रेण सस्य रुत्वे उकारस्य इत्संज्ञायां लोपे रामर् इति अवस्थायां रेफस्य 'विरामोऽवसानम्' इति सूत्रेण अवसानसंज्ञायां ''खरवसानयोर्विसर्जनीयः'' इति सूत्रेण रेफस्य विसर्गे कृते 'रामः' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. **सरूपाणामेकशेष एकविभक्तौ १/२/६४**
एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते।

११. **प्रथमयोः पूर्वसवर्णः ६/१/१०२**
अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घः एकादेशः स्यात्। इति प्राप्ते

१२. **नादिचि ६/१/१०४**
आदिचि न पूर्वसवर्णदीर्घः। वृद्धिरेचि। रामौ।

१३. **बहुषु बहुवचनम् १/४/२१**
बहुत्वविवक्षायां बहुवचनं स्यात्।

१४. **चुटू १/३/७**
प्रत्ययाद्यौ चुटू इतौ स्तः।

---

१०. प्रातिपदिकार्थगतद्वित्वादिविवक्षायां प्रातिपदिकस्य द्विवारं त्रिवारं वा प्रयोगः उपतिष्ठते, तद्यथा – राम राम+औ, राम राम राम + जस् इत्येवम्। अत्र अनेन सूत्रेण नियम्यते यत् तत्र एक एव शब्दः शिष्यते। समानं रूपं येषां तानि सरूपाणि। अयं भावः – एकस्यां विभक्तौ परतः सरूपाणां दृष्टानां मध्ये एक एव शिष्यते। अतः रामौ, रामाः इत्यादौ एकस्यां विभक्तौ परतः एकमेव शब्दस्वरूपं शिष्यते।

११. प्रथमयोः इति द्विवचनग्रहणसामर्थ्यात् प्रथमाद्वितीये विभक्ती गृह्येते। अत्र ''अकः सवर्णे दीर्घः'' इति सूत्रात् 'अकः' इति, ''इको यणचि'' इत्यतः 'अचि' इति अनुवर्तेते, 'एकः पूर्वपरयोः' इति अधिकारप्राप्तम्। अतः अयमर्थः – अकः प्रथमायाः द्वितीयायाः वा विभक्तेः अचि परे पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घ एकादेशः स्यात्। प्रसङ्गः – राम राम औ इत्यत्र सरूपाणामिति एकशेषे रामऔ इति दशायाम् 'औ' इत्यस्य द्वितीयासम्बन्धि त्वात् अनेन सूत्रेण पूर्वसवर्णदीर्घः एकादेशः प्राप्तः, तत्र निषिध्यते नादिचि इति –

१२. न आद् इचि इतिच्छेदः। आद् इति 'अ' इत्यस्य पञ्चम्यन्तं रूपम्, अकारादिति भावः। अर्थात् अकारात् इचि=इच्प्रत्याहारगतवर्णे परे पूर्वसवर्णदीर्घ एकादेश न भवतीति व्यवस्था। प्रकृते च राम + औ इत्यत्र अकारात् इच् परतः विद्यते इति कृत्वा न पूर्वसवर्णदीर्घः। तर्हि किम्?अत आह –'वृद्धिरेचि' इति। अर्थात् अत्र 'वृद्धिरेचि' इति सूत्रेण वृद्धौ कृतायाम् रामौ इति रूपम्।

१३. प्रातिपदिकार्थगतबहुत्वविवक्षायां बहुवचनं प्रयुज्यते। बहुवचनसंज्ञकः–प्रत्ययः प्रयुज्यते इति यावत्। राम राम राम+जस् इत्यत्र एकशेषे राम+जस् इति स्थितौ जस् प्रत्ययगतस्य जकारस्य इत्संज्ञार्थं सूत्रमवतारयति–चुटू इति –

१४. चुटू – चुश्च टुश्च इति चुटू। अत्र ''उपदेशेऽजनुनासिक इत्'' इति सूत्रात् इत् अनुवर्तते, तच्च द्विवचनान्ततया 'इतौ' इत्येवं विपरिणम्यते। 'आदिर्ञिटुडवः' इतः आदिः इति अनुवर्तते। अतः सूत्रस्य अयमर्थः –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१५. **विभक्तिश्च १/४/१०४**
सुप्तिङौ विभक्तिसंज्ञौ स्त:।

१६. **न विभक्तौ तुस्मा: १/३/४**
विभक्तिस्थास्तवर्गसकारमकारा नेत:। इति सस्य नेत्त्वम्। रामा:।

१७. **एकवचनं सम्बुद्धि: २/३/४४**
सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्।

१८. **यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १/४/१३**
य: प्रत्ययो यस्मात् क्रियते, तदादि शब्दस्वरूपं तस्मिन्नङ्गं स्यात्।

---

प्रत्ययस्य आदौ वर्तमानौ चुटू - चवर्गटवर्गौ इतौ स्त:। अर्थात् प्रत्ययस्य आदौ विद्यमाना: चवर्गगता: टवर्गगताश्च वर्णा: इत्संज्ञा: भवन्ति। प्रकृते च राम + जस् इत्यत्र जस्प्रत्ययस्य आदौ वर्तमानस्य चवर्गजकारस्य अनेन इत्संज्ञायां लोपे च जाते राम+ अस् इति स्थिति: -

१५. सुप् च तिङ् च सुप्तिङौ। सुप् प्रत्यया: तिङ्प्रत्ययाश्च विभक्तिसंज्ञका: भवन्ति इति आशय:। 'प्रत्ययग्रहणे तदन्ता: ग्रह्या:' इति परिभाषया तदन्तग्रहणं तु न कर्तव्यम् ''संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति'' इति परिभाया संज्ञाविधौ निषेधात्।राम+अस् इत्यवस्थायाम् ''हलन्त्यम्'' इति सूत्रेण सस्य इत्संज्ञायां प्राप्तायां निषेधकं सूत्रम् अवतारयति - 'न विभक्तौ.' इति -

१६. तुश्च स् च मश्च इति तुस्मा: इति द्वन्द्व:। विभक्तौ स्थिता: तवर्गसकारमकारा: इत्संज्ञका: न भवन्ति इति सूत्राशय:। राम+अस् इत्यत्र सस्य विभक्तिस्थत्वात् न इत्संज्ञा।

**रामा:** - राम शब्दात् प्रातिपदिकत्वात् प्रथमाबहुवचने जसि विभक्तौ 'चुटू' इत्यनेन जकारस्य इत्संज्ञायां 'तस्य लोप:' इति लोपे राम+अस् इति जाते प्राप्तस्वर्णदीर्घं प्रबाध्य 'अतो गुणे' इत्यनेन पररूपें प्राप्ते तमपि प्रबाध्य ''प्रथमयो: पूर्वसवर्ण:'' इत्यनेन पूर्वसवर्णदीर्घे एकादेशे कृते रामास् इति जाते ''हलन्त्यम्'' इति सूत्रेण सस्य इत्संज्ञायां प्राप्तायां ''न विभक्तौ तुस्मा:'' इति सूत्रेण निषेधे सस्य रुत्वे विसर्गे च कृते 'रामा:' इति सिद्धम्।

१७. सम्बोधने या प्रथमाविभक्ति:, तस्या: एकवचनस्य सम्बुद्धिसंज्ञा भवति।

१८. य: प्रत्यय: यस्मात् प्रकृतिभूतात् विधीयते, तदादि = तत् प्रकृतिरूपम् आदि यस्य तत् तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञं भवति। यथा राम प्रातिपदिकात् प्रकृतिभूतात् भ्याम् प्रत्यय: विधीयते, तत्र तस्मिन् प्रत्यये परे तदादि = रामशब्द: आदि:यस्य रामभ्याम् इति अङ्गसंज्ञं भवति। तत्र 'सुपि च' इति दीर्घविधाने तु रामशब्दस्य प्रकृतिमात्रस्य व्यपदेशिवद्भावात् तदादित्वं बोध्यम् इति विशेष:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१९. **एङ्ह्रस्वात्सम्बुद्धेः ६/१/६९**
एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्। हे राम।
हे रामौ। हे रामाः

२०. **अमि पूर्वः ६/१/१०७**
अकोऽम्यचि पूर्वरूपमेकादेशः। रामम्। रामौ।

२१ **लशक्वतद्धिते १/३/८**
तद्धितवर्जप्रत्ययाद्याः लशकवर्गा इतः स्युः।

२२. **तस्माच्छसो नः पुंसि ६/१/१०३**
पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि।

---

१९. एङन्तं यद् अङ्गं ह्रस्वान्तं वा यद् अङ्गं, तादृशाद् अङ्गात् परतः स्थितः हल्वर्णः लुप्यते, स चेद् हल्वर्णः सम्बुद्धेः भवेत्। यथा – रामप्रातिपदिकात् सम्बोधने प्रथमायाः एकवचने सुप्रत्यये तस्य सम्बुद्धिसंज्ञायां सस्य ह्रस्वान्तात् राम इति अङ्गात् परतः सत्त्वात् अनेन लोपः भवति, अतः हे राम इति रूपं सिध्यति। हे रामौ, हे रामाः इति तु प्रथमावद् एव।

२०. अमि पूर्वः। अत्र 'अकः सवर्णे दीर्घः' 'सूत्रात् पञ्चम्यन्तम् अकः इति पदम् आयाति, 'इको यणचि' इतः अचि पदम्। 'एकः पूर्वपरयोः' इति च अधिकारप्राप्तम्। अतः अयं सूत्रार्थः – अकः अमावयवे अचि परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः भवति। राम शब्दात् प्रातिपादिकसंज्ञायां द्वितीयाविभक्तौ एकवचने अम्प्रत्यये राम+अम् इत्यत्र 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते, तं दीर्घं प्रबाध्य अनेन पूर्वरूपे एकादेशे 'रामम्' इति रूपं भवति। हरि+अम् अत्र पूर्वरूपे हरिम् इति।

२१. लशकु+अतद्धिते इतिच्छेदः। लश्च शश्च कुश्च एषां समाहारद्वन्द्वः लशकु। प्रत्ययस्य आदौ स्थितः लवर्णः शवर्णः, कवर्गश्च इत्संज्ञकाः स्युः, तद्धितप्रत्ययस्य आदौ स्थिताः तु न इत्संज्ञका इति विशेषः। राम प्रातिपदिकात् द्वितीयाबहुवचने शस् प्रत्यये राम+शस् इत्यत्र आद्यस्य शकारस्य अनेन इत् संज्ञा भवति अतः लोपश्च ततः राम+अस् इति जाते 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे कृते रामास् इति स्थिते –

२२. तस्मात् + शसः नः पुंसि इतिच्छेदः। 'प्रथमयोः पूर्वसवर्णः इति सूत्रम् अस्मात् पूर्ववर्ति। अत्र 'तस्मात्' इति पदेन पूर्वसूत्रेण विहितस्य पूर्वसवर्णदीर्घस्य परामर्शः भवति। अतः 'प्रथमयो.' इति सूत्रेण कृतात्पूर्वसवर्णदीर्घात् परः यः शस्विभक्तेः सकारः, तस्य (सस्य) पुँल्लिङ्गे नकारः भवति। पुंसि इति कथिते स्त्रीलिङ्गे नकारः न भवति। रामास् इत्यत्र अनेन सस्य नकारः विधीयते अतः रामान् इति स्थितिः जाता। अत्र नस्य णत्वं स्यात् इति आशङ्कते –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२३. **अट्कुप्वाङ्नुम्व्यवायेऽपि ८/४/२**
अट् कवर्ग:पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि
रषाभ्यां परस्य नस्य ण: समानपदे। इति प्राप्ते।

२४. **पदान्तस्य ८/४/३७**
नस्य णो न। रामान्।

२५. **टाङसिङसामिनात्स्या: ७/१/१२**
अदन्ताट्टादीनामिनादय: स्यु:। णत्वम्। रामेण।

२६. **सुपि च ७/३/१०२**
यञादौ सुपि अतोऽङ्गस्य दीर्घ:। रामाभ्याम्।

---

२३. अत्र सूत्रे ''रषाभ्यां नो ण: समानपदे'' इति सूत्रम् अनुवर्तते। तेन च रषाभ्यां अव्यवहितपरस्य नस्य णत्वं विधीयते। रामाणाम् इत्यादौ रषाभ्यां व्यवहितपरस्य णत्वं विधातुम् एतत् सूत्रम् प्रवर्तते।अस्य अयमर्थ: – अट् कवर्ग:, पवर्ग:, आङ्, नुम् एतै: व्यस्तै: अथवा यथासम्भवं मिलितैश्च व्यवधाने सत्यपि रषाभ्यां परस्य नस्य णत्वं स्याद् इति। 'रामान्' इत्यत्र रेफात् परस्य क्रमश: अट्, पवर्ग:, अट् इत्येतै: मिलितै: व्यवहितस्य नस्य अनेन णत्वं प्राप्तं भवति, किन्तु तन्न विधीयते, यतो हि –

२४. पदान्तस्य नस्य णत्वं न भवति इत्यर्थकेन 'पदान्तस्य' इति सूत्रेण णत्वं निषिध्यते, अस्य पदान्तत्वात्। रामान्।

**रामान्** – राम शब्दस्य प्रातिपदिकसंज्ञायां द्वितीयाबहुवचने शस् विभक्तौ ''लशक्वतद्धिते'' इति सूत्रेण शस्य इत्संज्ञायां लोपे च राम+अस् इति स्थिते ''प्रथमयो: पूर्वसवर्ण:'' इति सूत्रेण पूर्वसवर्णदीर्घ एकादेशे रामास् इति जाते ''तस्माच्छसो न: पुंसि'' इति सूत्रेण सस्य नकारे रामान् इति दशायांम् ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नस्य णत्वे प्राप्ते ''पदान्तस्य'' इति सूत्रेण निषेधे कृते रामान् इति सिद्धम्।

२५. अत्र 'अतो भिस ऐस्' इत्यस्मात् 'अत' पञ्चम्यन्तं पदमनुवर्तते, अधिकरप्राप्तम् 'अङ्गस्य' पञ्चम्यन्तत्वेन विपरिणम्यते। अत: अदन्तात्अङ्गात् परेषां टा, ङसि, ङस् इत्येतेषां स्थाने क्रमश: इन, आत्, स्य इत्येते आदेशा: स्यु: इति सूत्रार्थ: फलित:। राम शब्दात् प्रातिपदिकत्वात् तृतीयाविभक्तौ एकवचने टा प्रत्यये राम+टा इति स्थितौ टा स्थाने इनादेशे राम इन इति जाते गुणे णत्वे कृते रामेण इति रूपं निष्पन्नम्।

२६. अत्र ''अतो दीर्घो यञि'' इति सूत्रात् 'यञि' पदमनुवर्तते। अत: यञादौ सुपि प्रत्यये (सुप्प्रत्याहारगते प्रत्यये, न तु सप्तम्येकवचने सुपि) परे अदन्तस्य अङ्गस्य दीर्घ: भवति। तद्यथा – रामशब्दात् तृतीयाद्विवचने भ्याम् प्रत्यये आगते राम+भ्याम् इत्यत्र भ्याम: यञादित्वात् सुप्त्वाच्च अनेन अदन्तस्य 'राम' इत्यस्य दीर्घत्वं विधीयते, अत: 'रामाभ्याम्' इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२७. **अतो भिस ऐस् ७/१/९**
अनेकाल्शित्सर्वस्य। रामैः।

२८. **ङेर्यः ८/१/१३**
अतोऽङ्गात्परस्य ङेर्यादेशः।

२९. **स्थानिवदादेशोऽनल्विधौ १/१/५६**
आदेशः स्थानिवत् स्यान्न तु स्थान्यलाश्रयविधौ। इति स्थानिवत्त्वात् सुपि चेति दीर्घः। रामाय। रामाभ्याम्।

३०. **बहुवचने झल्येत् ७/३/१०३**
झलादौ बहुवचने सुप्यतोऽङ्गस्यैकारः। रामेभ्यः। सुपि किम्?पचध्वम्।

---

२७. अदन्तात् अङ्गात् परस्य भिस्प्रत्ययस्य ऐस् आदेशः भवति। ऐस् इति अनेकाल् आदेशः। अतः भिसः सर्वस्य अयं भवति, न तु 'अलोऽन्त्यस्य' इति दिशा अन्त्यस्य स्थाने। राम+भिस् इति अवस्थायाम् अनेन सूत्रेण भिसः स्थाने ऐस् आदेशे राम+ऐस् इति जाते ''वृद्धिरेचि'' इति सूत्रेण अकार-ऐकारयोः स्थाने वृद्धिरूपे एकादेशे कृते, सस्य रुत्वे विसर्गे च कृते रामैः इति रूपम्।

२८. ङेर्यः। 'ङेः' इति ङे प्रत्ययस्य षष्ठ्यन्तं रूपं, न तु ङि इत्यस्य इति ध्यातव्यम्। अदन्तात् अङ्गात् परस्य चतुर्थ्येकवचनस्य 'ङे' प्रत्ययस्य स्थाने 'य' आदेशः भवति। रामशब्दात् ङे प्रत्यये राम+ङे इत्यत्र अनेन 'य' आदेशे राम य इति जाते, 'सुपि च' इति दीर्घ विधातुं व्यवस्थाप्यते - 'स्थानिवदादेशोऽनल्विधौ' इति।

२९. स्थानिवद् आदेशः अनल्विधौ इतिच्छेदः। यस्य स्थाने किञ्चिद् विधीयते तत् स्थानि, येन च विहितेन किञ्चित् निवर्तते स आदेशः। यथा राम+ङेइत्यत्र 'ङे' स्थाने 'य' विधीयते। अतः 'ङे' इति स्थानि। विहितेन 'य' इत्यनेन ङे निवर्तते अतः 'य' आदेशः। स च आदेशः स्थानिवत् भवति।
स्थानिना तुल्यः स्थानिवत्। स्थानिधर्माः आगच्छन्ति इति यावत्। स्थानिसम्बन्धी यः अल् (वर्णः) तदाश्रयविधौ तु न स्थानिवत्त्वम् इति विशेषः।

**राम+य** इत्यत्र यकारस्य यञादित्वेऽपि सुप्त्वं नास्ति इति मनसि कृत्वा प्रश्नः उदेति यदत्र 'सुपि च' इति दीर्घः न स्यात् इति। अत्र समाधानं स्थानिवदादेशः इति। अर्थात् यकाररूपः आदेशः स्थानिना 'ङे' इत्यनेन तुल्यः एव। अतः यकारे आदेशेऽपि 'ङे' इत्यस्य स्थानिनः सुप्त्वधर्मः आरोप्यते, ततश्च यञादौ सुपि परत्वात् दीर्घे न दोषः इति भावः। रामाय।

३०. बहुवचने झलि एत् इतिच्छेदः। सुपिचेति पूर्वसूत्रात् सुपीति अनुवर्तते, अत इत्यपि अनुवर्तते। अतः अयमर्थः - झलादौ बहुवचने सुपि परे अदन्तस्य अङ्गस्य एकारः स्यात् इति। चतुर्थीबहुवचने राम+भ्यस् इति स्थितौ भ्यसः झलादिबहुवचनत्वात् सुप्त्वाच्च तस्मिन् परे मकारोत्तरस्य अकारस्य एकारः अनेन विधीयते सस्य रुत्वे विसर्गे च



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३१. **वाऽवसाने ८/४/५६**
अवसाने झलां चरो वा। रामात्, रामाद्। रामाभ्याम्। रामेभ्य:। रामस्य।

३२. **ओसि च ७/३/१०४**
अतोऽङ्गस्यैकार:। रामयो:।

३३. **ह्रस्वनद्यापो नुट् ७/१/५४**
ह्रस्वान्तान्नद्यन्ताद् आबन्ताच्चाङ्गात्परस्यामो नुडागम:।

३४. **नामि ६/४/३**
अजन्ताङ्गस्य दीर्घ:। रामाणाम्। रामे। रामयो:। सुपि एत्वे कृते

---

रामेभ्य: इति रूपम्। यदि अत्र 'सुपि' इति न उच्येत तर्हि बहुवचने झलादौ तिङि परेऽपि पच+ध्वम् इत्यत्र एत्वप्रसङ्ग: स्यात्। सुपि इति उक्ते तु न, ध्वम: सुप्त्वाभावात्।

**३१.** अवसाने झल्वर्णानां स्थाने विकल्पेन चर: स्यु:। राम+ङसि इत्यत्र ''टाङसिङसाम्.'' इत्यादिना ङसिस्थाने 'आत्' आदेशे सवर्णदीर्घे रामात् इति जाते ''झलां जशोऽन्ते'' इति तकारस्य जश्त्वेन दकारे कृते अनेन विकल्पेन दस्य चर्त्वेन तकारे कृते रामात् इति। चर्त्वाभावे तु रामाद् इति रूपम्।

**३२.** अत्र ''अतो दीर्घो यञि'' इत्यस्मात् अत: अनुवर्तते, अधिकारप्राप्तम्'अङ्गस्य' इति। 'बहुवचने झल्येत्' सूत्रात् एत् इत्यनुवर्तते। अत: सूत्रस्य अयमर्थ:–ओसि प्रत्यये परे अदन्ताङ्गस्य एकार: स्याद् इति। रामशब्दात् प्रातिपदिकसंज्ञायां षष्ठीसप्तम्यो: द्विवचने ओस् प्रत्यये राम+ओस् इति जाते अनेन सूत्रेण 'अलोऽन्त्यस्य' इति दिशा अकारस्य एत्वे रामे+ओस् इति स्थितौ अयादेशे सस्य रुत्वे विसर्गे च कृते 'रामयो:' इति रूपम्।

**३३.** ह्रस्वश्च नदी च आप्च इति समाहारद्वन्द्वात् पञ्चमी ह्रस्वनद्याप: इति। 'आमि सर्वनाम्न: सुट्' इति सूत्रात् 'आमि' इति अनुवर्तते। अधिकार प्राप्तम् 'अङ्गस्य' इति पदं पञ्चम्यन्ततया विपरिणम्यते, तच्च ह्रस्वादिभि: विशिष्यते। अत अयमर्थ: – ह्रस्वान्तात् नद्यन्तात् आबन्ताच्च अङ्गात् परस्य आम: नुट् भवति। राम प्रातिपदिकात् षष्ठ्या: बहुवचने आम् प्रत्यये राम+आम् इति स्थिते, राम इति ह्रस्वान्तात् अङ्गात् परस्य आम: अनेन आद्यवयवे नुडागमेऽनुबन्धलोपे राम + न् + आम् इति स्थितौ दीर्घं कर्तुम् उपक्रमते – 'नामि' इति –

**३४.** 'नामि'। अत्र 'ढ्रलोपे पूर्वस्य.' इति सूत्रात् दीर्घ: इति पदम् अनुवर्तते। दीर्घादय: धर्मा: अच एव भवन्ति इति कृत्वा 'अच:' इति पदमुपतिष्ठते। अङ्गस्येति अधिकारप्राप्तम्। अत: अयमर्थ: नामि परे अजन्ताङ्गस्य दीर्घ स्यात् इति।

**रामाणाम्** – राम शब्दात् प्रातिपदिकत्वात् षष्ठीबहुवचने आम् प्रत्यये राम+आम् इति दशायाम् अङ्गसंज्ञायां ''ह्रस्वनद्यापो नुट्'' इति सूत्रेण आम: आदौ नुडागमे अनुबन्धलोपे राम+न्+आम् इति स्थितौ ''नामि'' इति सूत्रेण मकारोत्तरस्य अकारस्य दीर्घे रामानाम् इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नस्य णत्वे ''रामाणाम्'' इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**३५. आदेशप्रत्यययोः ८/३/५९**

इण्कुभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सस्तस्य मूर्धन्यादेशः। ईषद्विवृतस्य सस्य तादृश एव षः। रामेषु। एवं कृष्णादयोऽप्यदन्ताः।

**३६. सर्वादीनि सर्वनामानि १/१/२७**

सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद्, तद्, यद् एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्।

**३७. जसः शी ७/१/१७**

अदन्तात्सर्वनाम्नो जसः शी स्यात्। अनेकाल्त्वात् सर्वादेशः। सर्वे।

---

**३५.** इण्, कुः = कवर्गः आभ्यां परस्य अपदान्तस्य आदेशभूतस्य सस्य प्रत्ययावयवस्य वा सस्य मूर्धन्यः आदेशः भवति। तत्र ऋटुरषेषु मूर्धन्येषु सस्य ष एव आदेशः ईषद्विवृतप्रयत्नसादृश्यात्।राम+सुप् इत्यत्र पकारस्येत्संज्ञायां लोपे 'बहुवचने झल्येत्' इत्यनेन एत्वे रामे+सु इति स्थितौ ''आदेशप्रत्यययोः'' इत्यनेन सूत्रेण प्रत्ययावयवस्य सस्य मूर्धन्यादेशे षकारे कृते रामेषु इति सिद्धम्। एवमेव कृष्णः, गोपालः इत्यादयः अदन्ताः शब्दाः साधुत्वं नेयाः।

**३६.** सर्वः आदिः प्रथमावयवः येषां तानि सर्वादीनि। अत्र सर्वशब्दः स्वरूपपरः। नपुंसकलिङ्गवशात् शब्दस्वरूपाणि इति अध्याहार्यम्। अतः अयमर्थः-सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः इति। सर्वादीनि कानि इति चेत् - वृत्तौ यानि परिगणितानि तानि, इति ज्ञेयम्। एषां सर्वनामकार्यं भविष्यति अतः पूर्वं सर्वनामसंज्ञा कृता। कानि सर्वनामकार्याणि इति जिज्ञासायाम् आह-जसः शी इत्यादि

**३७.** अत्र सूत्रे 'अतो भिस ऐस्' इति सूत्रात् अतः इति पञ्चम्यन्तं पदम् अनुवर्तते। 'सर्वनाम्नः स्मै' इत्यस्मात् सर्वनाम्नः इति चानुवर्तते। विशेषणत्वात् तदन्तविधिः, तस्माद् अयमर्थः-अदन्तात् सर्वनाम्नः परस्य जसः स्थाने शी आदेशः भवति। 'शी' इत्यत्र शस्य 'लशकु' इति इत्संज्ञायां लोपे 'ई' इति शिष्यते। अस्य च अनेकाल्त्वात् सर्वादेशः बोध्यः, न तु शित्त्वात्, आदेशकाले अस्य शित्त्वाभावात्। सर्वशब्दस्य अदन्तत्वात् रामशब्दस्य इव रूपाणि, सर्वनामकार्यविषये तु विशेषरूपाणि इति ज्ञेयम्। सर्वः, सर्वौ इति रामवत्। सर्वे इति विशेषरूपं जसि विभक्तौ। सर्वशब्दात् प्रापिदिकात् जस् विभक्तौ सर्व+जस् इति दशायाम् अस्य सर्वनामसंज्ञायां ''जसःशी'' इति सूत्रेण जसः स्थाने अनेकाल्त्वात् सर्वादेशत्वेन शी इति कृते शस्य इत्संज्ञायां लोपे सर्व+ई इति स्थितौ ''आद्गुणः'' इति सूत्रेण गुणे एकादेशे 'सर्वे' इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३८. **सर्वनाम्नः स्मै ७/१/१४**

अतः सर्वनाम्नो ङेः स्मै स्यात्। सर्वस्मै।

३९. **ङसिङ्योः स्मात्स्मिनौ ७/१/**

अतः सर्वनाम्नः एतयोरेतौ स्तः। सर्वस्मात्।

४०. **आमि सर्वनाम्नः सुट् ७/१/५२**

अवर्णान्तात् परस्य सर्वनाम्नो विहितस्यामः सुडागमः। एत्वषत्वे। सर्वेषाम्। सर्वस्मिन्। शेषं रामवत्। एवं विश्वादयोऽप्यदन्ताः। उभशब्दो द्विवचनान्तः। उभौ२। उभाभ्याम्३। उभयोः२। तस्येह पाठोऽकजर्थः। उभयशब्दस्य द्विवचनं नास्ति। उभयः। उभये। उभयम्। उभयान्। उभयेन। उभयैः। उभयस्मै। उभयेभ्यः। उभयस्मात्। उभयेभ्यः। उभयस्य। उभयेषाम्। उभयस्मिन्। उभयेषु। डतरडतमौ प्रत्ययौ। प्रत्ययग्रहणे तदन्ताः ग्राह्याः। नेम इत्यर्द्धे। समः सर्वपर्यायः। तुल्यपर्याय स्तु न। यथासंख्यमनुदेशः समानाम् इति ज्ञापकात्।

---

३८. अदन्तात् सर्वनाम्नः परस्य 'ङे' प्रत्ययस्य 'स्मै' आदेशः भवति। सर्व+ङे इति दशायां सर्वनामसंज्ञायां कृतायां 'सर्वनाम्नः स्मै'' इति सूत्रेण ङेः स्थाने स्मै आदेशे कृते सर्वस्मै इति रूपम्।

३९. अदन्तात्सर्वनाम्नः परस्य 'ङसि' इत्यस्य 'स्मात्', 'ङि' इत्यस्य च 'स्मिन्' इति आदेशः भवति इति सूत्राशयः। सर्वशब्दात् पञ्चम्येकवचने ङसि प्रत्यये आगते सर्वशब्दस्य सर्वनामसंज्ञायां कृतायाम् अनेन सूत्रेण ङसि स्थाने स्मात् आदेशे कृते 'सर्वस्मात्' इति रूपं सिद्धम।

४०. अवर्णान्तः यः सर्वनामसंज्ञकः शब्दः, तस्मात् परः विहितः यः आम् प्रत्ययः, तस्य आमः आद्यवयवः सुडागमः स्यात् इति। सर्वशब्दस्य प्रातिपदिकसंज्ञायां षष्ठीबहुवचने आम् प्रत्यये सर्वनामसंज्ञायां सर्व+आम् इति स्थितौ अनेन सुडागमे सर्व+स्+आम् इति जाते 'बहुवचने झल्येत्' इति एत्वे 'आदेशप्रत्यययोः' इति षत्वे च कृते सर्वेषाम् इति रूपम्। ङि प्रत्यये तु ''ङसिङ्योः स्मात्स्मिनौ'' इत्यनेन स्मिन्नादेशे सर्वस्मिन् इति। शेषेषु प्रत्ययेषु रामशब्दवद् अस्य रूपाणि भवन्ति। एवमेव विश्वादयः सर्वनामशब्दाः अपि ज्ञेयाः। उभशब्दः द्विवचनान्तः एव अस्ति। सर्वनामकार्यं तु एकवचने, बहुवचने एव भवति न पुनः द्विवचने। इत्थम् उभ शब्दस्य द्विवचनान्ततया सर्वनामकार्यं न भवति, तर्हि तस्य सर्वादिगणे पाठस्य कः लाभः? इति प्रश्ने आह तस्य इह =सर्वादिगणे पाठः अकजर्थः = अकच् प्रत्ययः अस्य यथा स्यात् तथाकर्तुम् इति (उभकौ इत्यादौ)। उभय शब्दस्य च द्विवचनं न भवति, अत एकवचनं बहुवचनञ्च अस्य भवति इति कृत्वा तस्य यथाप्रत्ययं सर्वनामकार्यं भवति, उभये, उभयस्मै, उभयस्मात्, उभयेषाम्। उभयस्मिन् इत्यादौ। शेषप्रत्ययेषु तु रामवत् रूपाणि। डतरडतमौ प्रत्ययौ स्तः। केवलः प्रत्ययः न क्वापि प्रयुज्यते, न केवला प्रकृतिः अतः ''प्रत्ययग्रहणे तदन्ताः ग्राह्यः'' इति परिभाषया डतरच्प्रत्ययान्तानां कतरादीनां, डतमच्प्रत्ययान्तानां च कतमादीनाम् अत्र सर्वनामसंज्ञा बोध्या, न तु केवलयोः प्रत्यययोः। 'नेम' इति शब्दः 'अर्द्धः' इत्यर्थकः। 'सम' शब्दः सर्वशब्दस्य पर्य्यायः अस्ति। तुल्यार्थकः 'सम' इति तु न सर्वनामसंज्ञकः, तथा सति तु पाणिनिः 'यथासंख्यमनुदेशः समानाम्' न उपादेक्ष्यत् 'समेषाम्' इत्येवम् अकथयिष्यद् इति भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**४१. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १/१/३४**

एतेषां व्यवस्थायामसंज्ञायां सर्वनाम संज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे, पूर्वाः। असंज्ञायां किम्?उत्तराः कुरवः। स्वाभि धेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां किम्?दक्षिणा गाथकाः कुशला इत्यर्थः।

**४२. स्वमज्ञातिधनाख्यायाम् १/१/३५**

ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा। स्वे, स्वाः। आत्मीयाः आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था वा।

**४३. अन्तरं बहिर्योगोपसंव्यानयोः १/१/३६**

बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा। अन्तरे, अन्तराः वा गृहाः। बाह्याः इत्यर्थः। अन्तरे, अन्तरा वा शाटकाः। परिधानीयाः इत्यर्थः।

---

४१. पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर इत्येतेषां शब्दानां "सर्वादीनि सर्वनामानि" इति गणसूत्रेण व्यवस्थायाम् असंज्ञायां या नित्या सर्वनामसंज्ञा प्राप्ता सा जसि प्रत्यये विकल्पेन भवति इति सूत्रार्थः। अतः एषां जसि रूपद्वयं भवति। उत्तराः कुरवः इत्यत्र उत्तरशब्दः संज्ञायाम्, अतः अत्र न सर्वनामसंज्ञा, अतः 'जसःशी' इति न प्रवर्तते। 'दक्षिणा गाथकाः" इत्यत्र न हि दक्षिणशब्दः व्यवस्थायाम्, अतः नात्र जसः शी आदेशः। दक्षिणा अर्थात् कुशलाः।

**पूर्वे-पूर्वाः** - पूर्वशब्दात् प्रातिपदिकत्वात् जसि विभक्तौ "सर्वादीनि सर्वनामानि" इति गणसूत्रेण नित्यसर्वनामसंज्ञायां प्राप्तायां "पूर्वपरावरः" इत्यादिना जसि परे विकल्पेन सर्वनामसंज्ञायां 'जसःशी' इत्यनेन जसः स्थाने 'शी' आदेशेऽनुबन्धलोपे पूर्व+ई इति जाते "आद्गुणः" इति सूत्रेण गुणैकादेशे पूर्वे इति रूपम्। सर्वनामसंज्ञायाः अभावे तु पूर्व+अस् इति स्थितौ "प्रथमयोः पूर्वसवर्णः" इति सूत्रेण पूर्वसवर्णदीर्घे सस्य रुत्वे विसर्गे च कृते पूर्वाः इति रूपम्। एवमेव परे, पराः। अवरे, अवराः इत्यादयः।

४२. स्व शब्दस्य चत्वारः अर्थाः - आत्मा, आत्मीयः, ज्ञातिः, धनञ्च। तत्र ज्ञातेः धनस्य च अवाचकः यः स्वशब्दः (आत्मवाचकः आत्मीयवाचकः) तस्य गणसूत्रेण सर्वत्रप्राप्ता सर्वनामसंज्ञा जस्विभक्तौ विकल्पेन भवति। अतः जसि स्वे, स्वाः इति रूपद्वयं भवति। तदर्थश्च आत्मीयाः आत्मानः वा। यत्र धनवाचकः ज्ञातिवाचकः वा स्वशब्दः तस्य तु जसि स्वाः इति एकमेव रूपम्, सर्वनामसंज्ञायाः अभावात्।

**स्वे, स्वाः** - आत्मनः आत्मीयस्य वा वाचकः यः स्वशब्दः तस्य प्रातिपदिकसंज्ञायां जसिविभक्तौ "सर्वादीनि." इति गणसूत्रेण प्राप्ता सर्वनामसंज्ञा "स्वमज्ञातिधनाख्यायाम्" इति सूत्रेण जसि विकल्पेन भवति अतः स्व+जस् इत्यत्र "जसःशी" इति सूत्रेण जसः श्यादेशेऽनुबन्धलोपे स्व+ई इति जाते "आद्गुण" इत्यनेन गुणैकादेशे 'स्वे' इति रूपम्। सर्वनामसंज्ञायाः अभावे तु रामाः इतिवत् स्वाः इति रूपम्।

४३. बहिः अनावृतः प्रदेशः, तेन योगः बहिर्योगः=बाह्यः। उपसंवीयते परिधीयते इति उपसंव्यानम्, परिधानीयं



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**४४. पूर्वादिभ्यो नवभ्यो वा ७/१/१६**

रभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्, पूर्वात्। पूर्वस्मिन्, पूर्वे। एवं परादीनामपि। शेषं सर्ववत्।

**४५. प्रथमचरमतयाल्पार्धकतिपयनेमाश्च १/१/३३**

एते जसि उक्तसंज्ञाः वा स्युः। प्रथमे, प्रथमाः। तयः प्रत्ययः। द्वितये, द्वितयाः। शेषं रामवत्। नेमे, नेमाः। शेषं सर्ववत्। (तीयस्य ङित्सु वा) द्वितीयस्मै, द्वितीयायेत्यादि। एवं तृतीयः। निर्जरः।

---

वस्त्रम्। अर्थात् बाह्यार्थः परिधानीयार्थकश्च यः अन्तरशब्दः, तस्य गणसूत्रेण प्राप्ता सर्वनामसंज्ञा जसि विकल्पेन भवति। अतः जसि अन्तरे, अन्तराः इति रूपद्वयं बोध्यम्।

४४. पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर इत्येते ये नव शब्दाः सन्ति सर्वनामसंज्ञकाः, तेभ्यः परयोः ङसि, ङि इत्यनयोः स्थाने क्रमशः स्मात् स्मिनौ आदेशौ विकल्पेन भवतः। अत्र सूत्रे ''ङसिङ्योः स्मात्स्मिनौ'' इति पूर्वसूत्रम् अनुवर्तते इति बोध्यम्।

**पूर्वस्मात्, पूर्वात्** – पूर्वशब्दस्य प्रातिपदिकसंज्ञायाम् ततः पञ्चम्येकवचने ङसि विभक्तौ पूर्व+ङसि इति स्थितौ ''सर्वादीनि सर्वनामानि'' इति गण सूत्रेण पूर्व शब्दस्य सर्वनामसंज्ञायां कृतायां ''ङसिङ्योः स्मात्स्मिनौ'' इति सूत्रेण ङसिस्थाने नित्ये 'स्मात्' आदेशे प्राप्ते, तं प्रबाध्य ''पूर्वादिभ्यो नवभ्यो वा'' इति सूत्रेण विकल्पेन स्मात् आदेशे पूर्वस्मात् इति रूपं सिद्धम्। स्मादादेशाभावे तु ''टाङसिङसामिनात्स्याः'' इति सूत्रेण ङसिस्थाने 'आत्' आदेशे सवर्णदीर्घे पूर्वात् रूपं सिद्धम्।

४५. प्रथम, चरम, तय (तयप्रत्ययान्तशब्दः) अल्प, अर्ध, कतिपय, नेम इत्येते शब्दाः जसि प्रत्यये परे विकल्पेन सर्वनामसंज्ञाः स्युः। ऐषु नेमशब्दस्य गणपाठे पाठात् जसि नित्या प्राप्ता सर्वनामसंज्ञा अनेन विकल्पेन विधीयते। अन्ये शब्दाः तु गणे न पठिताः, अतः एषाम् अप्राप्ता संज्ञा जसि विकल्पेन अनेन सूत्रेण विधीयते। अत्र तयः इति प्रत्ययः स च केवलः न प्रयुज्यते इति कृत्वा प्रत्ययग्रणहपरिभाषया तदन्ताः द्वितयः तृतयः, चतुष्टय इत्यादयः शब्दाः गृह्यन्ते। येषां शब्दानां प्रथमादीनाम् अप्राप्तासंज्ञा जसिविकल्पेन भवति, तेषां शब्दानां जसः अन्येषु प्रत्ययेषु रामशब्दवत् रूपाणि भवन्ति, तत्र तत्र सर्वनामत्वाभावात्। नेमशब्दस्य तु अन्यप्रत्ययेषु सर्वशब्दवत् रूपाणि, अस्य सर्वनामसंज्ञकत्वात्।

**प्रथमे, प्रथमाः** – प्रथम शब्दात् प्रातिपदिकात् प्रथमाबहुवचने जस् प्रत्यये ''प्रथमचरमतयाल्पार्ध.'' इत्यादिना सूत्रेण विकल्पेन सर्वनामसंज्ञायां ''जसःशी'' इति सूत्रेण जसः स्थाने श्यादेशे अनुबन्धलोपे प्रथम+ई इति जाते ''आद्गुणः'' इति सूत्रेण गुणैकादेशे प्रथमे इति रूपम्। सर्वनामसंज्ञायाः अभावे 'रामाः' इतिवत् प्रथमाः इति। एवमेव चरमे, चरमाः द्वितये, द्वितयाः। कतिपये, कतिपयाः इत्यादीनि।(तीयस्य.) तीयप्रत्ययान्तानां ङिद्विभक्तिषु (ङे, ङसि, ङस्, ङि) सर्वनामसंज्ञा विकल्पेन भवति इति बोध्यम्।

**द्वितीयस्मै, द्वितीयाय** – द्वितीयशब्दात् प्रातिपदिकत्वात् चतुर्थ्येकवचने ङे विभक्तौ द्वितीय+ङे इत्यवस्थायां ''तीयस्य ङित्सु वा'' इति वार्तिकेन तीयप्रत्ययान्तस्य विकल्पेन सर्वनामसंज्ञायां ''सर्वनाम्नः स्मै''



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४६. **जरायाः जरसन्यतरस्याम् ७/२/१०१**

आजादौ विभक्तौ। पदाङ्गाधिकारे तस्य च तदन्तस्य च। निर्दिष्यमानस्यादेशाः भवन्ति। एकदेशविकृतमनन्यवद् इति जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः इत्यादि। पक्षे हलादौ रामवत्। विश्वपाः।

४७. **दीर्घाज्जसि च ६/१/१०५**

विश्वपौ। विश्वपाः। हे विश्वपाः। विश्वपाम्। विश्वपौ।

---

इत्यनेन ङेः स्थाने स्मै आदेशे कृते द्वितीयस्मै इति रूपम्। सर्वनामसंज्ञाया अभावे तु 'रामाय' इतिवत् प्रथमाय इति रूपम्। एवमेव द्वितीयस्मात्, द्वितीयात् इत्यादि।

**निर्जरः** – निष्क्रान्तः जरायाः इति निर्जरः, निर्गता जरा यस्मात् इति वा बहुव्रीहिः। निर्जरशब्दात् सौ विभक्तौ निर्जरः।निर्जरशब्दात् औ विभक्तौ (अजादौ विभक्तौ) विशेषम् आह

४६. अजादौ विभक्तौ परतः जरा शब्दस्य विकल्पेन जरस् आदेशः भवति इति सूत्रार्थः। **अत्रायं प्रश्नः** – जरा शब्दस्य विधीयमानः जरसादेशः कथं निर्जरशब्दस्य भविष्यति?अत आह – अयमादेशः अङ्गाधिकारस्थः अस्ति। पदाधिकारे अङ्गाधिकारे च यस्य यत् क्रियते, तत् तस्य तदन्तस्य च भवति ''पदाङ्गाधिकारे तस्य च तदन्तस्य च'' इति परिभाषया। अतः जराशब्दस्य क्रियमाणः जरसादेशः जराशब्दस्य जराशब्दान्तस्य निर्जरशब्दस्यापि च भविष्यति। **अत्र अपरः प्रश्नः** – जरसादेशः अनेकाल् वर्तते, तस्मात् सम्पूर्णस्य निर्जर इति शब्दस्य स्थाने स्यात्, 'अनेकाल्शित्सर्वस्य' इति परिभाषया, अत आह – ''निर्दिश्यमानस्यादेशाः भवन्ति'' परिभाषया सूत्रे निर्दिष्टस्य जरा इत्यस्यैव (निर्जरशब्दगतस्य) आदेशः भविष्यति, न सर्वस्य इति।

**पुनः प्रश्नः** – जराशब्दस्य निर्दिष्टः आदेशः कथं जरशब्दस्य भविष्यति?अत उच्यते परिभाषा ''एकदेशविकृतमनन्यवत्'' इति। अर्थात् निर्जर इत्यत्र जराशब्दस्य ह्रस्वत्वेन विकृतत्वेऽपि स अनन्यवदेव, नान्य इति भावः। अतः विकृतः अपि जरशब्दः जराशब्दवदेव, नान्यः, अतः तस्य जरसादेशे न काऽपि बाधा इति समाधिः।

**निर्जरसौ** – निर्जरशब्दात् प्रातिपदिकसंज्ञायाम् प्रथमाद्विवचने औ प्रत्यये 'निर्जर+औ' इत्यवस्थायां ''पदाङ्गाधिकारे तस्य च तदन्तस्य च'' ''निर्दिश्यमानस्यादेशाः भवन्ति'' ''एकदेशविकृतमनन्यवत्'' इति परिभाषात्रयसहकारेण ''जरायाः जरसन्यतरस्याम्'' इति सूत्रेण निर्जरशब्दगतस्य 'जर' इत्यस्य स्थाने विकल्पेन जरस् आदेशे कृते निर्जरस्+औ इति स्थितौ वर्णसम्मेलने 'निर्जरसौ' इति रूपं सिद्धम्। जरसादेशाभावे निर्जरौ इति रूपम्।

४७. अत्र 'प्रथमयोः पूर्वसवर्णः' इति सूत्रात् पूर्वसवर्ण इति ''नादिचि'' इति सूत्रात् न, इचि इति पदद्वयमनुवर्तते। अतः सूत्रस्य अयमर्थः – दीर्घात् जसि इचि च परे पूर्वसवर्णदीर्घः न स्यात्। विश्वपा+औ, विश्वपा+अस् (जस्) इत्यत्र अनेन निषेधात् पूर्वसवर्णदीर्घः न भवति। फलतः क्रमशः वृद्धिः, सवर्णदीर्घश्च भवतः अतः विश्वपौ, विश्वपाः इति।

**विश्वपौ** – विश्वपा शब्दात् प्रातिपदिकत्वात् औ विभक्तौ विश्वपा+औ इत्यत्र 'वृद्धिरेचि' इति सूत्रेण प्राप्तां वृद्धिं प्रबाध्य ''प्रथमयोःपूर्वसवर्णः'' इति सूत्रेण पूर्वसवणदीर्घे प्राप्ते ''दीर्घाज्जसि च'' इति सूत्रेण निषेधे कृते वृद्धौ कृतायां 'विश्वपौ' इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४८. **सुडनपुंसकस्य १/१/४३**
स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।

४९. **स्वादिष्वसर्वनामस्थाने १/४/१७**
कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थाने षु पूर्वं पदं स्यात्।

५०. **यचि भम् १/४/१८**
यादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात्।

५१. **आकडारादेका संज्ञा १/४/१**
अत: ऊर्ध्वं कडारा: कर्मधारय इत्यत: प्रागेकस्यैकैव संज्ञा ज्ञेया। या पराऽनवकाशा च।

५२. **आतो धातो: ६/४/१४०**
आकारान्तो यो धातु: तदन्तस्य भस्याङ्गस्य लोप:। अलोऽन्त्यस्य। विश्वप:। विश्वपा। विश्वपाभ्यामित्यादि। एवं शखध्मादय:। धातो: किम्?हाहान्। हरि:। हरी।

---

४८. स्वादिप्रत्ययेषु 'सु औ जस् अम् औट्' इति पञ्चप्रत्यया: सर्वनामस्थानसंज्ञका:सन्ति, नपुंसकलिङ्गशब्दात् परत: यदि न स्यु:। नपुंसकलिङ्गात् परत: तु एते न सर्वनामस्थानसंज्ञका: इति भाव:। सुट् इति प्रत्याहार:, सु इत्यारभ्य औट: टकारपर्यन्तम्।

४९. स्वादिषु असर्वनामस्थाने इतिच्छेद:। कप्प्रत्ययावधिषु असर्वनामस्थानेषु स्वादिषु परेषु पूर्वं (प्रकृति:) पदसंज्ञकम्। तत्र अजादिषु यकारादिषु च भसंज्ञा इति अग्रे उच्यते –

५०. यचि भम् – य् च अच् च इति समाहारद्वन्द्व:। ''स्वादिस्वसर्व.'' इति अनुवर्तते, तच्च 'यचि' इत्यनेन विशिष्यते। अत: तदादिविधि:। अत: यकारादिषु अजादिषु च स्वादिषु असर्वनामस्थानेषु परेषु पूर्वं भसंज्ञं भवति।

५१. इत: आरभ्य: (१/४/१ सूत्रत:) कडारा: कर्मधारये इत्यत: प्राक् एकस्य एका एव संज्ञा भवति, न पुन: एकाधिका। तत्र च या संज्ञा परा वा अनवकाशा वा सा ज्ञेया उभयो: प्राप्तौ।

५२. आकारान्त: य: धातु:, स अन्ते यस्य, तादृशस्य भसंज्ञकस्य अङ्गस्य लोप:भवति। स च लोप: 'अलोऽन्त्यस्य' इति परिभाषया अन्त्यस्य 'आ' इत्यस्य इति ध्येयम्। यथा 'विश्वपाशब्द:' अकारान्तधात्वन्त:, तस्मात् शस् विभक्तौ अनुबन्धलोपे प्रकृते: भसंज्ञायां, विश्वपा+अस् इत्यत्र अकारस्य लोप: अनेन भवति। अत: विश्वप: इति रूपम्। तृतीयैकवचने तु विश्वप्+आ = विश्वपा इति। विश्वपे, विश्वप: विश्वप:, विश्वपो:, विश्वपि इति रूपाणि अजादिप्रत्ययेषु।

**विश्वप:** – विश्वपा शब्दात् प्रातिपदिकात् द्वितीयाविभक्ते: बहुवचने शस् प्रत्ययेऽनुबन्धलोपे विश्वपा+अस् इति स्थितौ 'यचि भम्' इति सूत्रेणविश्वपा शब्दस्य भसंज्ञायां कृतायां प्राप्तं पूर्वसवर्णदीर्घं प्रबाध्य ''आतो धातो:'' इत्यनेन अन्त्यस्य (अलोऽन्त्यस्येति सहायतया) अकारस्य लोपे विश्वप्+अस् इति जाते सस्य



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५३. **जसि च ७/३/१०९**

हृस्वान्तस्याङ्गस्य गुणः। हरयः।

५४. **हृस्वस्य गुणः ७/३/१०८**

सम्बुद्धौ। हे हरे। हरिम्। हरी। हरीन्।

५५. **शेषो घ्यसखि १/४/७**

शेष इति स्पष्टार्थम्। अनदीसंज्ञौ हृस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञम्।

५६. **आङो नाऽस्त्रियाम् ७/३/१२०**

घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासंज्ञा। हरिणा। हरिभ्याम्। हरिभिः।

---

रुत्वे विसर्गे विश्वपः इति रूपं सिद्धम्। एवमेव शंखध्मा, मधुपा, सोमपा इत्यादिशब्दानामपि रूपाणि बोध्यानि।

**विशेषः** – धातोः एव आकारस्य लोपः भवति अतः गन्धर्वविशेषस्य वाचकात् हाहा इति शब्दात् शसि आलोपः न भवति, हाहान् इति। हरिशब्दस्य प्रथमायाः एकवचने सस्य रुत्वे विसर्गे हरिः इति रूपम्। द्विवचने तु हरि+औ इत्यत्र पूर्वसवर्णदीर्घे हरी इति रूपम्।

५३. अत्र 'हृस्वस्य गुणः' इति सूत्रम् अनुवर्तते। अतः विशेषणत्वात् तदन्त विधिः। हृस्वान्तस्य अङ्गस्य गुणः स्यात् जसि परे इति।

**हरयः** – हरिशब्दात् प्रातिपदिकात् 'स्वौजसमौट्.' इति सूत्रेण प्रथमाबहुवचने जसि प्रत्ययेऽनुबन्धलोपे हरि+अस् इति स्थितौ पूर्वसवर्णदीर्घे प्राप्ते तं प्रबाध्य ''जसि च'' इति सूत्रेण इकारस्य एकारे गुणे कृते हरे+अस् इति स्थिते ''एचोऽयवायावः'' इति सूत्रेण अयादेशे सस्य रुत्वे विसर्गे च कृते ''हरयः'' इति सिद्धम्।

५४. सम्बोधने प्रथमैकवचनं सम्बुद्धिसंज्ञं भवति इति पूर्वम् उक्तम्। सम्बुद्धौ हृस्वान्तस्य अङ्गस्य गुणः भवति।

**हे हरे** – सम्बुद्धौ गुणः, 'एङ्हृस्वात्सम्बुद्धेः' इति लोपश्च।

**हरी** – हरि+औ पूर्वसवर्णदीर्घः।

**हरीन्** – हरि+शस् (अस्) पूर्वसवर्णदीर्घः, सस्य 'तस्माच्छसो नः पुंसि' इति नत्वम्।

५५. नदीसंज्ञकात् अन्यः शेषः। अनदीसंज्ञकौ (ययोः नदीसंज्ञा नास्ति) हृस्वौ यौ इकारः उकार श्च (इकारोकारौ) तदन्तस्य घिसंज्ञा भवति, सखिशब्दस्य तु न भवति। अत्र विशेषणत्वात् तदन्तविधिः भवति। अतः तदन्तस्य इत्युक्तम्। घिसंज्ञायाः किं फलमिति जिज्ञासायाम् वक्ष्यते 'आङो.' इति

५६. तृतीयायाः एकवचनस्य 'टा' प्रत्ययस्य 'आङ्' इति संज्ञा। घिसंज्ञकात् परस्य आङः (टा प्रत्ययस्य) ना आदेशः भवति, स्त्रियां तु न भवति।

**हरिणा** – हरिशब्दात् प्रातिपदिकात् तृतीयायाः एकवचने टाप्रत्यये हरि+टा इति स्थितौ ''शेषो घ्यसखि'' इति सूत्रेण हरिशब्दस्य घिसंज्ञायां कृतायाम् ''आङो नाऽस्त्रियाम्'' इति सूत्रेण टास्थाने 'ना' आदेशे कृते हरि+ना इति जाते ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नस्य णत्वे कृते 'हरिणा' इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५७. **घेर्ङिति ७/३/१११**
घिसंज्ञकस्य ङिति सुपि गुण:। हरये। हरिभ्याम्। हरिभ्य:।

५८. **ङसिङसोश्च ६/१/११०**
एङो ङसिङसोरति पूर्वरूपमेकादेश:। हरे:२। हर्यो:२। हरीणाम्।

५९. **अच्च घेः ७/३/११९**
इदुद्भ्यामुत्तरस्य ङेरौत् घेरच्च। हरौ। हरिषु। एवं कव्यादय:।

६०. **अनङ् सौ ७/१/९३**
सख्युरङ्गस्यानङादेशोऽसम्बुद्धौ सौ।

---

५७. **घेर्ङिति** – ङिति सुपि प्रत्यये परे घिसंज्ञकस्य गुण: भवति, स च अलोऽन्त्यस्येति अन्त्यस्य अल:।

**हरये** – हरिशब्दात् प्रातिपदिकात् ''स्वौजसमौट्.'' इत्यादिना सूत्रेण चतुर्थ्येकवचने ङे प्रत्ययेऽनुबन्धलोपे हरि+ए इति स्थितौ ''शेषो घ्यसखि'' इति सूत्रेण हरिशब्दस्य घिसंज्ञायां ''घेर्ङिति'' इति सूत्रेण हरिशब्दस्य अन्त्यस्य इकारस्य गुणे कृते हरे+ए इति जाते सति ''एचोऽयवायाव:'' इति सूत्रेण अयादेशे कृते 'हरये' इति रूपं सिद्धम्।

५८. ''एङ: पदान्तादति'' इति सूत्रात् एङ: इति पञ्चम्यन्तम् 'अति' इति सप्तम्यन्तम् अनुवर्तते अस्मिन् सूत्रे। अत: सूत्रस्य अयमर्थ: – एङ: ङसिङसो: अति (अकारे) परे पूर्वपरयो: स्थाने पूर्वरूपम् एकादेश: स्यात् इति। ङसिङसो: य: अत्, तस्मिन् इति भाव:।

**हरि:** – हरिशब्दात् प्रातिपदिकात् पञ्चम्येकवचने ङसि प्रत्यये अनुबन्धलोपे हरि+अस् इति स्थितौ हरिशब्दस्य घिसंज्ञायां 'घेर्ङिति' इत्यनेन गुणे कृते हरे+अस् इति जाते ''ङसिङसोश्च'' इत्यनेन पूर्वरूपैकादेशे सस्य रुत्वे विसर्गे च कृते हरे: इति रूपम्। षष्ठ्येकवचनेऽपि हरे:।

**हर्यो:** – हरि+ओस् इत्यत्र यणि रुत्वे विसर्गे हर्यो:।

**हरिणाम्** – हरि+आम् ''ह्रस्वनद्यापो नुट्'' इति नुटि ''नामि'' इति दीर्घे नस्य णत्वे च हरीणाम् इति।

५९. ह्रस्वात् इकारात् उकाराच्च परस्य सप्तम्येकवचनस्य ङिप्रत्ययस्य औत् (औ) आदेश:, घिसंज्ञकस्य (इकारस्योकारस्य) अत् (अ) च भवति इति सूत्राशय:।

**हरौ:** – हरिशब्दात् प्रातिपदिकात् सप्तम्येकवचने ङिप्रत्यये हरि+ङि इति दशायां घिसंज्ञायां कृतायां 'घेर्ङिति' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य ''अच्च घे:'' इत्यनेन सूत्रेण ङे: स्थाने औकारादेशे घिसंज्ञकान्त्यस्य इकारस्य अकारे च कृते हर+औ इति स्थिते ''वृद्धिरेचि'' इति सूत्रेण पूर्वपरयो: वृद्धिरूपैकादेशे कृते **हरौ** इति रूपं सिद्धम्

६०. असम्बुद्धौ सौ प्रत्यये परे 'सखि' इति अङ्गस्य 'अनङ्' आदेश: भवति। स च आदेश: अनेकाल्त्वेऽपि न सर्वादेश:, अपि तु 'ङिच्च' इति दिशा अन्त्यस्य इकारस्य। सखि+सु (स्) इत्यत्र अनङादेशे कृते सखन्+स् इति स्थितौ उपधाकार्यं करिष्यन् उपधासंज्ञासूत्रम् आह–'अलोऽन्त्यात्.' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**६१. अलोऽन्त्यात्पूर्व उपधा १/१/६५**

अन्त्यादल: पूर्वो वर्ण: उपधासंज्ञ:।

**६२. सर्वनामस्थाने चासम्बुद्धौ ६/४/८**

नान्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने।

**६३. अपृक्त एकाल् प्रत्यय: १/२/४१**

एकाल्प्रत्ययो य: सोऽपृक्तसंज्ञ: स्यात्।

**६४. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ६/१/६८**

हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।

**६५. न लोप: प्रातिपदिकान्तस्य ८/२/७**

प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोप:। सखा।

---

**६१.** अल: इति पञ्चम्यन्तं पदम्। अल् इति वर्णपर्याय:। अन्त्यात् अल: पूर्व: य: वर्ण:, स उपधासंज्ञ: भवति। यथा 'सखन्' इत्यत्र अन्त्य: अल् नकार:, तस्मात् पूर्व: वर्ण: खकारोत्तरवर्ती अकार:, तस्य उपधासंज्ञा भवति।

**६२.** सम्बुद्धिभिन्ने सर्वनामस्थानसंज्ञके प्रत्यये परे नान्तस्य (नकारान्तस्य) उपधाया: दीर्घ: भवति। सखन्+स् इत्यत्र 'सखन्' इति नान्तं, अस्य उपधाभूतस्य अकारस्य अनेन दीर्घ:, सर्वनामस्थानसंज्ञके सम्बुद्धिभिन्ने सुप्रत्यये परे। अत: सखान्+स् इति स्थिति: –

**६३.** एकश्चासौ अल् इति एकाल् इति कर्मधारय:। य: एकाल् प्रत्यय: (अनुबन्धलोपादिके कार्ये कृते यत्र एक: अल् शिष्यते) स: अपृक्तसंज्ञक: भवति। सखान्+स् इत्यत्र सुप्रत्ययस्य अनुबन्धलोपे सति 'स्' इति एक: अल् शिष्यते, तस्य एकाल्प्रत्ययस्य (स् इत्यस्य) अपृक्तसंज्ञा भवति।

**६४.** हल् च ङी च आप् च इति हल्ङ्याप:, तेभ्य: हल्ङ्याब्भ्य:। अत्र तदन्तविधि: प्रत्ययग्रहणपरिभाषया। अत: हलन्तात् परं, दीर्घङ्याबन्ताच्च परं सु ति, सि इत्येतेषां प्रत्ययानां यद् अपृक्तं हल्, तत् लुप्यते अर्थात् तस्य लोप: भवति। यद्यपि ङ्यापौ स्वभावत: दीर्घौ एव भवत:, तथापि निष्कौशाम्बि:, अतिखट्व: इत्यादौ अपृक्तस्य लोपं वारयितुं दीर्घात् इति विशेषणं दत्तम्। ङ्यापो: द्वित्वेऽपि दीर्घात् इति एकवचनम् आर्षम् इति बोध्यम्। सखान्+स् इत्यत्र नकाररूपात् हल: परं 'सु' इत्यस्य अपृक्तसंज्ञकं 'स्' इति हल् विद्यते, तस्य अनेन सूत्रेण लोप: जायते, अत: 'सखान्' इति स्थिति:।

**६५.** यस्य प्रातिपदिकसंज्ञा अस्ति,तस्य पदस्य 'अन्तावयव: य: नकार: तस्य लोप: भवति। प्रातिपदिकग्रहणेन अहन् इति तिङन्तस्य नलोप: न भवति।

**सखा** – सखिशब्दात् प्रातिपदिकात् ''स्वौजस्.'' इत्यादिना सूत्रेण प्रथमैकवचने सु प्रत्ययेऽनुबन्धलोपे सखि+स् इति जाते ''यस्मात् प्रत्ययविधि:'' इत्यादिना अङ्गसंज्ञायाम् ''अनङ् सौ'' इति सूत्रेण 'ङिच्च' इति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६६. **सख्युरसम्बुद्धौ ७/१/९२**

सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत् स्यात्।

६७. **अचो ञ्णिति ७/२/११५**

अजन्ताङ्गस्य वृद्धिः ञिति णिति च परे। सखायौ। सखायः। हे सखे सखायम्। सखायौ। सखीन्। सख्या। सख्ये।

६८. **ख्यत्यात्परस्य ६/१/११२**

खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः। सख्युः।

---

परिभाषासहायतया सखि शब्दस्य अन्त्यस्य अनङ् आदेशेऽनुबन्धलोपे सखन्+स् इति स्थिते ''अलोऽन्त्यात्पूर्व उपधा'' इति सूत्रेण नकारात्पूर्वस्य अकारस्य उपधासंज्ञायां ''सुडनपुंसकस्य'' इत्यनेन सुप्रत्ययस्य सर्वनामस्थानसंज्ञायाम् ''अपृक्त एकाल्प्रत्ययः'' इत्यनेन प्रत्ययस्य सस्य अपृक्तसंज्ञायाञ्च कृतायां ''सर्वनामस्थाने चासम्बुद्धौ'' इति सूत्रेण नान्तस्य उपधायाः दीर्घे कृते सखान्+स् इति जाते ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण अपृक्तस्य लोपे ''न लोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नस्य लोपे कृते 'सखा' इति सिद्धम्।

६६. सखिशब्दस्य अङ्गात्परं सर्वनास्थानं णिद्वत् स्यात्, सम्बुद्धिः तु न णिद्वद्। णिद्वद्भावस्य फलं तु –

६७. ञिति णिति च परे अजन्तस्य अङ्गस्य वृद्धिः भवति।

**सखायौ** – सखिशब्दात् प्रातिपदिकात् प्रथमाद्विवचने औ प्रत्यये प्रत्ययस्य सर्वनामस्थानसंज्ञायां ''सुख्यरसम्बुद्धौ'' इति सूत्रेण णिद्वद्भावे ''अचो ञ्णिति'' इति सूत्रेण सखिशब्दावयवस्य इकारस्य वृद्धौ कृतायां सखै + औ इति स्थिते ''एचोऽयवायावः'' इति सूत्रेण आयादेशे

**सखायौ** इति रूपं सिद्धम्।जसि – सखायः। अमि – सखायम्। शसि तु पूर्वसवर्णदीर्घे सस्य ''तस्माच्छसः – '' इति नत्वे सखीन् इति। टा प्रत्यये यणि सख्या। ङे प्रत्यये यणि सख्ये इति रूपम्।

६८. खिखी इत्यनयोः तिती इत्यनयोश्च कृतयणादेशयोः निर्देशः। तत्र अकारः तु उच्चारणार्थः। ख्यत्यः इति। तस्मात् ख्यत्यात्। अर्थात् ययोः यणादेशः कृतः, ताभ्यां (ख्यात् त्यात्) परः यः ङसिङसोः अत् (अकारः) तस्य उकारः आदेशः भवति। सखिशब्दात् ङसि ङस् वा प्रत्यये सखि+अस् इत्यत्र यणि कृते सख्य्+अस् इति दशायाम् अनेन ङसिङसोः अकारस्य उत्वं विधीयते, अतः सख्युः इति।

**सख्युः** – सखिशब्दात् कृतप्रातिपदिकसंज्ञकात् पञ्चम्येकवचने ङसिप्रत्ययेऽनुबन्धलोपे सखि+अस् इति जाते ''इको यणचि'' इति सूत्रेण यणि कृते सख्य्+अस् इति स्थिते ''ख्यत्यात्परस्य'' इति सूत्रेण अकारस्य उत्वे कृते सस्य रुत्वे विसर्गे सख्युः इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६९. **औत् ७/३/११८**
इत: परस्य ङेरौत्। सख्यौ। शेषं हरिवत्।

७०. **पति: समास एव ४/१/८**
घिसंज्ञ:। पत्या। पत्ये। पत्यु:२।पत्यौ शेषं हरिवत्। समासे तु भूतपये। कति शब्दो नित्यं द्विवचनान्त:।

७१. **बहुगणवतुडति संख्या १/१/२३**

७२. **डति च १/१/२५**
डत्यन्ता संख्या षट्संज्ञा स्यात्।

७३. **षड्भ्यो लुक् ७/१/२२**
जश्शसो:।

---

६९. इकारात् (इकारान्तात्) परस्य सप्तम्येकवचनप्रत्ययस्य ङे: स्थाने 'औ' इत्यादेश: भवति।
**सख्यौ** – सखिशब्दात् प्रातिपदिकात् सप्तम्येकवचने ङिप्रत्यये सखि+ङि इति स्थितौ ''औत्'' इति सूत्रेण ङे: स्थाने ''औ'' इत्यादेशे कृते सखि+औ इति जाते ''इको यणचि'' इत्यनेन यणि कृते सख्यौ इति।

७०. सखिशब्दस्य ''शेषो घ्यसखि'' इति घिसंज्ञाया: निषेधेऽपि पतिशब्दस्य प्राप्ता घिसंज्ञा, तत्र नियम्यते – समासे एव पतिशब्द: घिसंज्ञक: इति। अत: भूपति, सेनापति इत्यादौ घित्वात् तत्प्रयुक्तं कार्यं भवति। केवलस्य पतिशब्दस्य तु घित्वं न भवतीति तत्प्रयुक्तं कार्यम् अपि न भवति। अत: पतिशब्दात् तृतीयैकवचने यणि कृते पत्या। चतुर्थ्येकवचने पत्ये। पञ्चमीषष्ठ्येकवचने यणि कृते पत्य् + अस् इत्यवस्थायां ''ख्यत्यात्परस्य''इति उत्वे पत्यु: इति रूपम्। सप्तम्येकवचने तु ''औत्'' इति औकारादेशे यणि 'पत्यौ' इति रूपम्। समासे तु घित्वात् भूपतिना, भूपतये, भपते: भूपतौ इत्यादि।कतिशब्द: नित्यं बहुवचनान्त:। अत: तस्य जसादिषु एव रूपाणि। तत्र क: विशेष: इत्याह –

७१. बहुश्च गणश्च वतुश्च डतिश्च एषां समाहार: बहुगणवतुडति। अत्र वतु: डतिश्च इति प्रत्ययौ, अत: तदन्ता: ग्राह्या:, वत्वन्ता:, डत्यन्ताश्च इति भाव:। वत्वन्ता: यथा यावत्, तावत्, एतावत् शब्दा:, डत्यन्तश्च कतिशब्द:। अत: अयमर्थ: – बहुगणशब्दौ, यावदादय: वत्वन्ता: शब्दा:, डत्यन्त: कतिशब्दश्च संख्यासंज्ञा: भवन्ति इति। यद्यपि लोके संख्याशब्देन एक द्वि इत्यादीनामेव ग्रहणं भवति, किन्तु अत्र व्याकरणे तु बहुगणादय: अपि संख्याशब्देन गृह्यन्ते।

७२. अत्र 'ष्णान्ता षट्' इत्यत: 'षट्' इत्यनुवर्तते। डति इति प्रत्ययात् डत्यन्तस्य ग्रहणम्। अत: डत्यन्ता या संख्या, तस्या: षट्संज्ञा स्यात् इति सूत्राशय:। षट्संज्ञया किम् इत्यत आह – 'षड्भ्य:' इति।

७३. षङ्संज्ञकेभ्य: परयो: जश्शसो: प्रत्यययो: लुक् स्यात् (अदर्शनं स्यात्)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७४. **प्रत्ययस्य लुक्श्लुलुपः १/१/६१**

लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात् तत्तत्संज्ञं स्यात्।

७५. **प्रत्ययलोपे प्रत्ययलक्षणम् १/१/६२**

प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात्। इति जसि चेति गुणे प्राप्ते –

७६. **न लुमन्ताऽङ्गस्य १/१/६३**

लुमता शब्देन लुप्ते प्रत्यये तन्निमित्तमङ्गकार्यं न स्यात्। कति२।कतिभिः।कतिभ्यः२। कतीनाम्। कतिषु। युष्मदस्मत्षट्संज्ञाः त्रिषु सरूपाः। त्रिशब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः२।

७७. **त्रेस्त्रयः ७/१/५३**

त्रिशब्दस्य त्रयादेशः स्यादामि। त्रयाणाम्। त्रिषु। गौणत्वेऽपि प्रियत्रयाणाम्।

---

७४. लुक्शब्दमुच्चार्य कृतं प्रत्ययस्य अदर्शनं लुक् संज्ञम्। श्लुशब्दम् उच्चार्य कृतं श्लुसंज्ञम्। लुप्शब्दमुच्चार्यकृतं तत् लुप्संज्ञम् इति।

७५. प्रत्यये लुप्ते जातेऽपि तं प्रत्ययम् आश्रित्य विधीयमानं कार्यं स्यात् इति विशेषव्यवस्था। तद्यथा – डतिप्रत्ययान्तस्य कति-शब्दस्य संख्यासंज्ञायां षट्संज्ञायां च, तस्मात् परस्य जस्प्रत्ययस्य, शस्प्रत्ययस्य ''षड्भ्यो लुक्'' इत्यनेन लुक् भवति। अतः कति इति अवशिष्यते। अत्र लुप्तेऽपि प्रत्यये 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण कृतव्यवस्थानुसारम् अस्य ह्रस्वान्ताङ्गस्य ''जसि च'' इति सूत्रेण गुणस्य प्राप्तिः भवति प्रत्ययलक्षणात्

७६. लुः अस्य अस्ति इति लुमत्, तेन लुमता। लुक्, श्लु, लुप् इति त्रिषु अपि लुः विद्यते, अतः एते लुमन्तः। लुमता शब्देन प्रत्यये लुप्ते सति, सः प्रत्ययः निमित्तम् अस्य, तत्कार्यं न भवति इति सूत्राशयः। अतः लुक्, श्लु, लुप् इत्येतैः शब्दैः प्रत्ययस्य अदर्शने (लोपे) प्रत्ययलक्षणं न भवति अर्थात् तन्निमित्तमङ्गकार्यं न भवति।

**कति** – डत्यन्तस्य कतिशब्दस्य ''कृत्तद्धितसमासाश्च'' इति सूत्रेणप्रातिपदिकसंज्ञायां कृतायां प्रथमायाः बहुवचने जस् प्रत्यये कतिशब्दस्य संख्यासंज्ञायां ''डति च'' इत्यनेन षट्संज्ञायां च कृतायां ''षड्भ्यो लुक्'' इति सूत्रेण जसः लुकि कृते ''प्रत्ययलोपे प्रत्ययलक्षणम्'' इति प्रत्ययलक्षणम् आश्रित्य ''जसि च'' इति सूत्रेण गुणे प्राप्ते ''न लुमन्ताङ्गस्य'' इति सूत्रेण प्रत्ययलक्षणस्य निषेधात् गुणः न, अतः 'कति' इति रूपं सिद्धम्। कति+आम् इत्यत्र ''ह्रस्वनद्यापः'' इति नुटि ''नामि'' इति दीर्घे कतीनाम्

**विशेषः** – युष्मदस्मच्छब्दौ षट्संज्ञकाश्च शब्दाः त्रिषु लिङ्गेषु समानरूपाः भवन्ति। अतः कति पुरुषाः, कति नार्यः, कति फलानि इत्येवं 'कति' इति समानम् एव रूपम्। त्रिशब्दः बहुचनान्तः। तत्र त्रि+जस् इत्यत्र 'जसि च' इति गुणे अयादेशे सस्य रुत्वे विसर्गे त्रयः इति। शस्विभक्तौ तु ''प्रथमयोः पूर्वसवर्णः'' इत्यनेन पूर्वसवर्णदीर्घे त्रीस् (पुँल्लिङ्गे) इत्यत्र ''तस्माच्छसो न पुंसि'' इति नत्वे त्रीन् इति रूपम्।

७७. आमि प्रत्यये परे त्रिशब्दस्य 'त्रय' इति आदेशः भवति।

**त्रणायाम्** – त्रिशब्दात् प्रातिपदिकात् षष्ठीबहुवचने आम् प्रत्यये त्रि+आम् इति स्थितौ ''त्रेस्त्रयः'' इति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७८. **त्यदादीनामः ७/२/१०२**

एषामकारो विभक्तौ। (द्विपर्य्यान्तानामेवेष्टिः) द्वौ। द्वौ। द्वाभ्याम्३। द्वयोः२।पाति लोकमिति पपीः सूर्यः।

७९. **दीर्घाज्जिसि च ६/१/१०५**

दीर्घाज्जसि इचि च परे न पूर्वसवर्णः। पप्यौ। पप्यः। हे पपीः। पपीम्। पपीन्। पप्या। पपीभ्याम्३। पपीभिः। पप्ये। पपीभ्यः२। पप्यः। पप्योः। दीर्घत्वान्न नुट्। पप्याम्। ङौ तु सवर्णदीर्घः पपी। पप्योः। पपीषु। एवं वातप्रम्यादयः। बह्व्यः श्रेयस्यः यस्य सः बहुश्रेयसी।

---

सूत्रेण त्रिस्थाने 'त्रय' इत्यादेशे कृते त्रय+आम् इति स्थितौ ''ह्रस्वनद्यापो नुट्'' इत्यनेन नुडागमेऽनुबन्धलोपे त्रय+नाम् इति जाते ''नामि'' इति सूत्रेण दीर्घे ''अट्कुप्वाङ्नुम्.'' इत्यादिना नस्य णत्वे ''त्रयाणाम्'' इति सिद्धम्।

**विशेषः** – प्रियाः त्रयः येषाम् 'प्रियत्रयाणाम्' इत्यत्र प्रियत्रिशब्दे (समासे) त्रिशब्दस्य गौणत्वेऽपि त्रयादेशः भवति। अत्र अन्यपदार्थः प्रधानः।

७८. त्यदादिशब्देषु त्यद्शब्दादारभ्य द्विशब्दपर्यन्तानाम् विभक्तौ परतः अकारः भवति। स च 'अलोऽन्त्यस्य' इति दिशा अन्त्यस्यैव।

**द्वौ** – द्विशब्दस्य प्रातिपदिकसंज्ञायां प्रथमाद्विवचने औ प्रत्यये द्वि+औ इत्यवस्थायां ''त्यदादीनामः'' इति सूत्रेण ''अलोऽन्त्यस्य'' इति सहायतया अन्त्यस्य इकारस्य अत्त्वे द्व+औ इति जाते ''वृद्धिरेचि'' इति सूत्रेण पूर्वपरयोः वृद्धौ कृतायां द्वौ इति सिद्धम्। सति अत्त्वे अकारान्तत्वात् रामवत् प्रक्रिया।

**पपीः** – पाति लोकम् इति पपीः सूर्यः। पपी शब्दस्य ''कृत्तद्धित समासाश्च'' इति सूत्रेण प्रातिपदिकसंज्ञायां कृतायां प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे सस्य रुत्वे विसर्गे पपीः इति रूपम्।

७९. दीर्घात् जसि परे इचि च परे न पूर्वसवर्णदीर्घः इति पूर्वम् उक्तम्।

**पप्यौ** – पपीशब्दात् प्रथमाद्विवचने औ प्रत्यये प्राप्तं यणं प्रबाध्य ''प्रथमयोःपूर्वसवर्णः'' इत्यनेन पूर्वसवर्णदीर्घे प्राप्ते ''दीर्घाज्जसि च'' इत्यनेन तन्निषेधे ततश्च यणि कृते **पप्यौ** इति रूपम्।

**विशेषः** – अमि प्रत्यये 'अमिपूर्वः' इति पूर्वरूपम् पपीम्। शसि तु पूर्वसवर्णदीर्घे सस्य नत्वे पपीन् इति। तृतीयादिषु अजादिषु यणि पप्या,पप्ये, पप्योः इति। आमि दीर्घत्वात् नुट् न भवति, यणि पप्याम्। ङिविभक्तौ तु ''अकः सवर्णे दीर्घः'' इति सवर्णदीर्घः पपी इति, यणः अपेक्षा सवर्णदीर्घस्य परत्वात्। एवम् एव वातप्रमी शब्दस्य रूपाणि ज्ञेयानि।

**बहुश्रेयसी** – बह्व्यः श्रेयस्यः यस्यः स बहुश्रेयसी। अस्य समासत्वात् ''कृत्तद्धित.'' इति प्रातिपदिकसंज्ञायां प्रथमैकवचने सुप्रत्यये अनुबन्धलोपे अपृक्तसंज्ञायां ''हल्ङ्याब्भ्यो दीर्घात्.'' इत्यादिना अपृक्तस्य हलः लोपे कृते बहुश्रेयसी इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८०. **यू स्त्र्याख्यौ नदी १/४/३**

ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः (प्रथमलिङ्गग्रहणञ्च) पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः।

८१. **अम्बार्थनद्योर्ह्रस्वः ७/३/१०७**

सम्बुद्धौ। हे बहुश्रेयसि।

८२. **आण्नद्याः ७/३/११२**

नद्यन्तात्परेषां ङिताम् आडागमः।

८३. **आटश्च ६/१/९०**

आटोऽचि परे वृद्धिरेकादेशः। बहुश्रेयस्यै। बहुश्रेयस्याः। बहुश्रेयसीनाम्

---

८०. यू – ईश्च ऊश्च इति यू। स्त्रियम् आचक्षाते इति स्त्र्याख्यौ। नित्यस्त्रीलिङ्गौ इत्यर्थः। अत्र तदन्तविधिः अर्थात् ईकारान्तः ऊकारान्तश्च यः नित्यस्त्रीलिङ्गः शब्दः, तस्य नदीसंज्ञा भवति। बहुश्रेयसीशब्दस्य इदानीं (अत्र समासे) पुंस्त्वात् नित्यस्त्रीलिङ्गत्वस्य अभावात् नदीसंज्ञा न प्राप्नोति, अत उच्यते – अत्र नदीसंज्ञाविधायके अस्मिन् सूत्रे समासादेः प्राक् स्थितस्य स्त्रीलिङ्गस्य अपि ग्रहणं बोध्यम्। बहुश्रेयसी शब्दे समासात्प्राक् श्रेयसीशब्दः नित्यस्त्रीलिङ्ग एव आसीत्, अतः तस्य इदानीं गौणत्वेऽपि नदीसंज्ञा भविष्यति इति निर्णयः।

८१. अम्बार्थनद्योर्ह्रस्वः – सम्बुद्धौ अम्बार्थानां नद्यन्तानां च शब्दानां ह्रस्वः भवति। अम्बार्थानाम् = अम्बाशब्दस्य अर्थः एव अर्थः येषाम्। हे बहुश्रेयसि अत्र बहुश्रेयसीशब्दस्य नदीसंज्ञायां जातायां सम्बुद्धौ अनेन सूत्रेण ह्रस्वत्वे कृते हे बहुश्रेयसि+स् इति जाते ''एङ्ह्रस्वात्सम्बुद्धेः'' इत्यनेन सम्बुद्धेःलोपे हे बहुश्रेयसि इति।

८२. नद्यन्तात् परेषां ङिताम् = ङे, ङसि, ङस् ङि इत्येतेषाम् आद्यवयवः आडागमः स्यात्। तत्र 'आ' इति अवशिष्यते।

८३. आटश्च–आटः अचि परे पूर्वपरयोः स्थाने वृद्धिः एकादेशः भवति इति।

**बहुश्रेयस्यै** – बहुश्रेयसी शब्दात् कृतप्रातिपदिकसंज्ञकात् चतुर्थ्येकवचने ङेप्रत्ययेऽनुबन्धलोपे बहुश्रेयसी+ए इति स्थितौ ''यू स्त्र्याख्यौ नदी'' इति सूत्रेण बहुश्रेयसीशब्दस्य नदीसंज्ञायां कृतायां ''आण्नद्याः'' इत्यनेन सूत्रेण ङे विभक्तेः आडागमेऽनुबन्धलोपे च कृते बहुश्रेयसी+आ+ए इति जाते ''आटश्च'' इति सूत्रेण अकार-एकारयोः स्थाने वृद्ध्येकादेशे कृते बहुश्रेयसी+ऐ इति स्थितौ यणि कृते बहुश्रेयस्यै इति रूपं सिद्धम्।पञ्चमीषष्ठ्योः एकवचने आटि वृद्धौ यणि बहुश्रेयस्याः। आमि तु नद्यन्तत्वात् ''ह्रस्वनद्यापः'' इति नुटि बहुश्रेयसीनाम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**८४. ङेराम्नद्याम्नीभ्यः ७/३/११६**

नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम्। बहुश्रेयस्याम्। शेषं पपीवत अङ्यन्तत्वान्न सुलोपः। अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। प्रधीः।

**८५. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ६/४/७७**

श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। इति प्राप्ते –

**८६. एरनेकाचोऽसंयोगपूर्वस्य ६/४/८२**

धात्ववयवसंयोगपूर्वो न भवति यः इवर्णस्तदन्तो यो धातुः तदन्तस्या-नेकाचोऽङ्गस्य यणजादौ प्रत्यये। प्रध्यौ। प्रध्यः। प्रध्यम्। प्रध्यौ। प्रध्यः। प्रध्यि (ङिप्रत्यये)। शेषं पपीवत्। एवं ग्रामणीः। ङौ तु ग्रामण्याम्। अनेकाचः किम्?नीः। नियौ। नियः। अमि शसि च परत्वादियङ्। नियम्। ङेराम्। नियाम्। असंयोगपूर्वस्य किम्?सुश्रियौ। यवक्रियौ।

---

८४. नद्यन्तात् आबन्तात् नीशब्दात् च परतः विद्यमानस्य सप्तम्येकवचनस्यङिप्रत्ययस्य स्थाने आम् आदेशः भवति। बहुश्रेयसी+ङि इत्यत्र आमि कृते बहुश्रेयसी+आम् इत्यत्र 'ह्रस्वनाद्यापो नुट्' इति तु न भवति, परत्वात् 'आण्नद्याः' इत्यनेन बाधात्। बहुश्रेयसी+आ+आम् आटश्चवृद्धौ यणि बहुश्रेयस्याम् इति रूपम्। लक्ष्मीम् अतिक्रान्तः इति अतिलक्ष्मीः। लक्ष्मीशब्दः ईप्रत्ययान्तः (लक्षेर्मुट्च) अतः नायं ङ्यन्तः शब्दः। अस्य नदीत्वेऽपि ङ्यन्तत्वाभावात् प्रथमैकवचने ''हल्ङ्याब्भ्यः.'' इत्यस्य अप्रवृत्त्या सस्य लोपः न, अतः विसर्गः श्रूयते अतिलक्ष्मीः इति। शेषं तु नदीत्वात् बहुश्रेयसीवत् कार्यम्।

**प्रधीः** – प्रध्यायति इति प्रधीः। ध्यै धातोः सम्प्रसारणं क्विप् च। 'ध्यायतेः सम्प्रसारणं च' इति। पूर्वरूपे 'हलि च' इति दीर्घे प्रधीइति कृदन्तः शब्दः। तस्य कृदन्तत्वात् प्रातिपदिकसंज्ञा। ततश्च सुविभक्तौ अनुबन्धलोपे सस्य रुत्वं विसर्गः प्रधीः इति। अत्र अङ्यन्तत्वात् हल्ङ्यादिलोपः न। प्रधी + औ इत्यत्र इयङः प्राप्तिप्रसङ्गम् अवतारयति

८५. श्नुश्च धातुश्च भ्रूश्च इति द्वन्द्वः, तेषां श्नुधातुभ्रुवाम्। श्नु इति प्रत्ययः अतः श्नुप्रत्ययान्तस्य ग्रहणम्। इश्च उश्च इति यू, तयोः य्वोः। य्वोः इति धातोः विशेषणम् अतः तदन्तविधिः। अतः इवर्णान्तस्य उवर्णान्तस्य च धातोः। भ्रू इत्यस्य अङ्गस्य च अजादौ प्रत्यये परे इवर्णस्य इयङादेशः, उवर्णस्य च उवङादेशः। अचि इत्यस्य सप्तम्यन्तत्वात् ''यस्मिन्.'' इति तदादेः ग्रहणात् अजादौ इत्यर्थः। अनयोः इयङुवङोः ङित्त्वात् अन्त्यस्य स्थाने आदेशः, न तु अनेकाल्त्वात् सर्वादेशः। प्रधी+औ इत्यत्र धी इति ईवर्णान्तः धातुः वर्तते तस्माच्च परतः 'औ' इति अजादिप्रत्ययः। अतः अनेन सूत्रेण इयङ् प्राप्तः, किन्तु न भवति, परः यण् एव भवति – 'एरने.' इति –

८६. अत्र ''इणो यण्'' इत्यतः यण् अनुवर्तते। ''अचिश्नु.'' सूत्रात् षष्ठ्यन्तं धातोः इति पृथक्कृत्य अनुवर्तते। 'एः' इति इवर्णस्य षष्ठ्यन्तं रूपम्, तच्च धातोः विशेषणम्। अतः तदन्तविधिः। 'अचि' इत्यपि पूर्वसूत्रात् अनुवर्तते, तच्च प्रत्ययस्य विशेषणम्। सप्तमीनिर्देशात् तदादिविधिः। इत्थम् सूत्रस्य अयमर्थः – यस्मात् पूर्वः धात्ववयवसंयोगः न भवति, तादृशः यः इवर्णः, स अन्ते यस्य तादृशः यः धातुः, स धातु अन्ते यस्य, तादृशम् अनेकाच् यद् अङ्गम्, तस्य अङ्गस्य अजादौ प्रत्यये परे यण् स्यात्। ''अलोऽन्त्यस्य'' इति दिशा अन्त्यस्य इकारस्य। प्रधी+औ इत्यत्र ''अचिश्नु.'' इति इयङि प्राप्ते, तं प्रबाध्य अनेन यणि प्रध्यौ इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८७. **गतिश्च १/४/६०**

प्रादयः क्रियायोगे गतिसंज्ञाः स्युः। (गतिकारकेतरपूर्वपदस्य यण् नेष्यते) शुद्धधियौ।

८८. **न भूसुधियोः ६/४/८५**

एतयोरचि सुपि यण् न। सुधियौ। सुधियः इत्यादि। सुखमिच्छति इति सुखीः। सुतमिच्छतीति सुतीः। सुख्यौ। सुत्यौ। सुख्युः। सुत्युः। शेषं प्रधीवत्। शम्भुर्हरिवत्। एवं भान्वादयः।

---

**प्रध्यौ** – प्रधीशब्दात् कृतप्रातिपदिकसंज्ञकात् प्रथमाद्विवचने औ विभक्तौ''अचिश्नुधातु.'' इत्यादिना ईकारस्य इयङादेशे प्राप्ते तं प्रबाध्य ''एरनेकाचोऽसंयोगपूर्वस्य'' इति सूत्रेण यणि कृते प्रध्यौ इति सिद्धम्। एवमेव ग्रामीणः, ग्रामण्यौ इत्यादि। ग्रामणीशब्दस्य सप्तम्येकवचने ङिविभक्तौ तु ''ङेराम्नद्याम्नीभ्यः'' इति आमि सति यणि कृते ग्रामण्याम् इति रूपम्।

**विशेषः** – नयति इति नीः। केवलात् नीधातोः क्विपि नी प्रातिपदिकात् तु अजादौ प्रत्यये यण् न भवति, सूत्रे अनेकाचः इति अङ्गविशेषणत्वात्। प्रकृते अनेकाच्त्वाभावात् यणः अभावे इयङ् भवति नियौः, नियः इत्यादि। अमि शसि चापि क्रमशः पूर्वरूपं, पूर्वसवर्णदीर्घं च प्रबाध्य परत्वात् इयङ्। नियम्। नियः। शसि पुंसि अस्य नत्वम् अपि न, पूर्वसवर्णदीर्घाभावात्। ङे विभक्तौ ''ङेराम्नद्याम्भीम्यः'' इति आमि इयङि नियाम् इति।सुश्री, यवक्री शब्दाभ्याम् अजादौ परे यण् न, असंयोगपर्वूत्वाभावात्, अतः इयङ् एव भवति सुश्रियौ, यवक्रियौ इत्यादि। शोभनाश्रीः अस्य सुश्रीः। यवान् क्रीणाति इति यवक्रीः।

८७. क्रियायोगे प्रादयः गतिसंज्ञाः भवन्ति। शुद्धा धीः यस्य सः शुद्धधीः। अस्मात् प्रातिपदिकात् अजादौ औ प्रत्यये परे शुद्धधी+औ इत्यत्र ''एरनेकाचः.'' इति सूत्रेण यणः प्राप्तिः अत्र यण्निषेधकम् आह – ''गतिकारकेतर. '' इति। गतिश्च कारकं च गतिकारके, ताभ्याम् इतरत् (अन्यत्) गतिकारकेतरत्। गतिकारकेतरत् पूर्वं पदं यस्मात् तद् गतिकारकेतरपूर्वपदम्, तस्य। अर्थात् यस्मात् पूर्वं पदं गतिकारकाभ्याम् अन्यत् भवेत्, तस्य इवर्णस्य ''एरनेकाचोऽसंयोगपूर्वस्य'' इति सूत्रेण यण् न भवतीति भावः (इवर्णान्तस्य इति)। प्रकृते शुद्धधी इत्यत्र धीशब्दात् पूर्वं स्थितं शुद्धपदं न गतिसंज्ञकं न च कारकपदं तत्, अतः ''एरनेकाचः.'' इति यण् न भवति। अतः ''अचिश्नुधातुः.'' इत्यादिना इयङादेशः शुद्धधियौः, शुद्धधियः इत्यादि।

८८. भूशब्दस्य सुधीशब्दस्य च अजादौ सुप्प्रत्यये परे यण् न भवति। अतः ''अचिश्नुधातु.'' इति इयङ् एव भवति। सुधी+औ = सुधियौ। सुधियः।

**सुखीः**–सुखम् आत्मनः इच्छति इति सुखीः। सुतम् आत्मनः इच्छति इति सुतीः। (क्यचि ईत्वे धातुसंज्ञायां क्विपि अल्लोपे यलोपे च सुखी, सुती इति)

**सुख्यौ – सुत्यौ** – सुखी + औ, सुती : औ ''एरनेकाचः.'' इति यणि सुख्यौ, सुत्यौ।

**सुख्युः सुत्युः** – सुखी+ङस्, सुती+ङस् अनुबन्धलोपे कृते ''एरनेकाचः'' – इति यणि सुख्य् + अस्, सुत्य् + अस् इत्यत्र ''ख्यत्यात्परस्य'' इत्यनेन अकारस्य उत्वे सस्य रुत्वे विसर्गे च कृते सुख्युः सुत्युः इति। शेषं प्रधीशब्दवत्।

**विशेषः** – शम्भुशब्दस्य हरिशब्दवत् रूपाणि। अर्थात् घिसंज्ञा, जसि चइति उकारस्य ओकार गुणः अवादेशः, टाविभक्तौ ना आदेशः, घेर्ङिति इति गुणः ङसिङसोश्च इति पूर्वरूपम्, ''अच्च घेः'' इति कार्यञ्च हरिवदेव भवति। एवमेव भानुशब्दस्य शम्भुवत् रूपाणि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८९. **तृज्वत्क्रोष्टुः ७/१/९५**
असम्बुद्धौ सर्वनामस्थाने परे। क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्यः इत्यर्थः।

९०. **ऋतो ङिसर्वनामस्थानयोः ७/३/११०**
ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च। इति प्राप्ते –

९१. **ऋदुशनस्पुरुदंसोऽनेहसाञ्च ७/१/९४**
ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ।

९२. **अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६/४/११**
अबादीनामुपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। क्रोष्टून्।

---

८९. सम्बुद्धिभिन्ने सर्वनामस्थाने परे क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दस्य प्रयोगः कर्तव्यः। क्रोष्टुशब्दस्य 'क्रोष्टृ' इति आदेशः इति भावः। सम्बोधने प्रथमायाः एकवचनं सम्बुद्धिसंज्ञं भवतीति पूर्वम् उक्तम् अस्ति। तस्माद् भिन्ने सर्वनामस्थानसंज्ञके प्रत्यये परे इति। क्रोष्टुशब्दात् लब्धप्रातिपदिकसंज्ञात् प्रथमैकवचने सुप्रत्यये सर्वनामस्थानसंज्ञायां कृतायां क्रोष्टुशब्दस्य 'क्रोष्टृ' आदेशे क्रोष्टृ+स् इति स्थिते–

९०. सर्वनामस्थाने परे, ङिप्रत्यये च परे ऋकारान्तस्य अङ्गस्य गुणः भवति। प्रकृते च क्रोष्टृ इति ऋकारान्तम् अङ्गसंज्ञकमस्ति, ततश्च परतः सर्वनामस्थानसंज्ञकः प्रत्ययः (सु=स्)। अनने ऋकारस्य गुणे प्राप्ते –

९१. ऋदन्तानाम्, उशनस्, पुरुदंसस्, अनेहस् इति शब्दानाञ्च सम्बुद्धिभिन्ने सुप्रत्यये परे 'ङिच्च' इति दिशा अन्त्यस्य अनङ् आदेशः भवति। अतः क्रोष्टृशब्दस्य ऋदन्तत्वात् अनङि कृते क्रोष्टन्+स् इति स्थितौ –

९२. सूत्रे परिगणितानाम् अबादीनाम् उपधायाः असम्बुद्धौ सर्वनामस्थाने परे दीर्घः स्यात्। क्रोष्टन्+स् इत्यस्य एकदेशविकृतस्य अनन्यत्वात् तृजन्तत्वात् ''अप्तृन.'' इत्यादिना उपधादीर्घे हल्ङ्यादिलोपे नलोपे क्रोष्टा।

**क्रोष्टा** – क्रोष्टु शब्दात् प्रातिपदिकात् सुविभक्तौ अनुबन्धलोपे सोः सर्वनामस्थानसंज्ञायां ''तृज्वत्क्रोष्टुः'' इति सूत्रेण क्रोष्टुस्थाने तृज्वद्भावेन 'क्रोष्टृ आदेशे क्रोष्टृ+स् इति जाते'' ऋतो ङिसर्वनामस्थानयोः'' इति सूत्रेण गुणे प्राप्ते तं गुणं प्रबाध्य ''ऋदुशनस्.'' इत्यादिना अन्त्यस्य ऋकारस्य स्थाने अनङादेशेऽनुबन्धलोपे क्रोष्टन्+स् इति जाते ''अप्तृन्तृच्. इत्यादिना एकदेशविकृतस्य अनन्यत्वात् तृजन्तं मत्वा उपधादीर्घे क्रोष्टान् स् इति जाते ''हल्ङ्याब्भ्यो दीर्घात्.'' इत्यादिना अपृक्तसस्य लोपे ''नलोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नस्य लोपे 'क्रोष्टा' इति सिद्धम्।

**क्रोष्टारौ** – क्रोष्टुशब्दस्य प्रातिपदिकसंज्ञायां ततः प्रथमाद्विवचने औ विभक्तौ क्रोष्टु+औ इति दशायां सर्वनामस्थानसंज्ञायां च कृतायां ''तृज्वत्क्रोष्टुः'' इति सूत्रेण तृज्वद्भावे क्रोष्टृ+औ इति जाते ''ऋतो ङिसर्वनामस्थानयोः'' इति सूत्रेण गुणे रपरत्वे क्रोष्ट् अर्= क्रोष्टर्+औ इति स्थिते ''अप्तृन्तृच्.'' इत्यादिना सूत्रेण उपधादीर्घे 'क्रोष्टारौ' इति सिद्धम्। शसि विभक्तौ शसः सर्वनामस्थानत्वाभावात् न तृज्वद्भावः अतः क्रोष्टु+अस् इत्यत्र पूर्वसवर्णदीर्घे ''तस्माच्छसो नः पुंसि'' इति सस्य नत्वे क्रोष्टून् इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९३. **विभाषा तृतीयादिष्वचि ७/१/९७**

अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे।

९४. **ऋत उत् ६/१/१११**

ऋतो ङसिङसोरति उदेकादेश:। रपर:।

९५. **रात्सस्य ८/२/२४**

रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य। रस्य विसर्ग:। क्रोष्टु:। क्रोष्टु:। क्रोष्ट्रो:२। (नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन) क्रोष्टूनाम्। क्रोष्टरि। पक्षे हलादौ शम्भुवत्। हूहू:। हूह्वौ। हूह्व:। हूहूम् इत्यादि। अतिचमूशब्दे तु नदीकार्यं विशेष:। हे अतिचमु। अतिचम्वै। अतिचम्वा:। अतिचूमनाम्। खलपू:।

९६. **ओ: सुपि ६/४/८३**

धात्ववयवसंयोगपूर्वो न भवति य: उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि। खलप्वौ। खलप्व:। एवं सुल्वादय:। स्वभू:। स्वभुवौ। स्वभुव:। वर्षाभू:।

---

९३. तृतीयादिषु अजादिषु विभक्तिषु क्रोष्टुशब्दस्य विकल्पेन तृज्वद्भाव:। अत: क्रोष्टु+टा (आ) – क्रोष्टृ+आ, यण् क्रोष्ट्रा इति। क्रोष्टु+ङे (ए) – क्रोष्टृ+ए – यणि क्रोष्ट्रे इति। तृज्वद्भावस्य अभावपक्षे शम्भुवत् क्रोष्टुना, क्रोष्टवे इति।

९४. ऋत: ङसिङसो: अति परे पूर्वपरयो: 'उत्' एकादेश: (उ) इति। क्रोष्टुशब्दात् पञ्चमीषष्ठ्यो: ङसिङसो: प्रत्यययो: अनुबन्धलोपे विकल्पेन तृज्वद्भावे क्रोष्टृ+अस् इति स्थितौ प्राप्तं यणं प्रबाध्य ''ऋत उत्'' इति सूत्रेण पूर्वपरयो: ऋकार-अकारयो: स्थाने 'उ' इत्येकादेशे ''उरण् रपर:'' इत्यनेन रपरत्वे च कृते क्रोष्टुर्+स् इति जाते।

९५. सूत्रार्थ: स्पष्ट:। क्रोष्टुर्+स् इत्यत्र अनेन संयोगान्तस्य सस्य लोप: रेफस्य च ''खरवसानयोर्विसर्जनीय:'' इति सूत्रेण विसर्ग:। **क्रोष्टु:** – क्रोष्टुशब्दात् प्रातिपदिकात् पञ्चम्येकवचने ङसि प्रत्ययेऽनुबन्ध लोपे क्रोष्टुस् इति स्थितौ ''विभाषा तृतीयादिष्वचि'' इति सूत्रेण विकल्पेन तृज्वद्भावे क्रोष्टृ+अस् इति जाते ''इको यणचि'' इति प्राप्तं यणं प्रबाध्य ''ऋत उत्'' इतिसूत्रेण ऋकार-अकारयो: 'उ' इत्येकादेशे रपरत्वे च कृते क्रोष्टुर्+स् इति जाते 'रात्सस्य' इति सूत्रेण संयोगान्तस्य सस्य लोपे कृते ''खरवसानयोर्विसर्जनीय:'' इति सूत्रेण रेफस्य विसर्गे 'क्रोष्टु:' इति सिद्धम्।

**विशेष:** – चमूम् अतिक्रान्त: इति अतिचमू:। अत्र चमूशब्दस्य गौणत्वेऽपि ''प्रथमलिङ्गग्रहणञ्च'' इति वचनात् प्रथमलिङ्गम् आश्रित्य नदीसंज्ञा कार्या। अत: अस्य नदीकार्यं ह्रस्वविधानम्। हे अतिचमु। ङिद्विभक्तिषु 'आण्नद्या:' इति आडागम: अतिचम्वै। अतिचम्वा:। आमि ''ह्रस्वनद्यापोनुट्'' इति नुटि अतिचमूनाम्। ङिप्रत्यये ''ङेराम्नद्याम्नीभ्य:'' इति आमि अतिचम्वाम्। खलं पुनाति इति खलपू:।

९६. अत्र ''एरनेकाचोऽसंयोगपूर्वस्य'' 'ए:' इति पदं विहाय सम्पूर्णं सूत्रम् अनुवर्तते। तत्र यत् किमपि अन्यत: अनुवर्तते तदपि। अत्र 'ओ:' इति उवर्णस्य षष्ठ्येकवचनम्। अत: सूत्रस्य अयमर्थ: – यस्मात्पूर्व: धात्ववयवसंयोग:



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**९७. वर्षाभ्वश्च ६/४/८४**

अस्य यण् स्यादचि सुपि। वर्षाभ्वौ इत्यादि। दृन्भूः। (दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः) दृन्भ्वौ। एवं करभूः। धाता। धातारौ। धातारः (ऋवर्णान्नस्य णत्वं वाच्यम्) धातृृणाम्। एवं नप्त्रादयः। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम्। तेनेह न पिता। पितरौ। पितरः। पितरम्। शेषं धातृवत्। एवं जामात्रादयः। ना। नरौ।

-----------------------------------------------------------------------

न भवति, तादृशः यः उवर्णः, स अन्ते यस्य तादृशः यः धातुः, स अन्ते यस्य तादृशम् अनेकाच् यद् अङ्गम्, तस्य अङ्गस्य अजादौ सुपि प्रत्यये परे यण् स्यात् इति। यण् ''अलोऽन्त्यस्य'' इति परिभाषया अन्त्यस्य अलः अर्थात् 'उ' वर्णस्य इति बोध्यम्।

**खलप्वौ**–खलपू शब्दात् प्रातिपदिकात् प्रथमाद्विवचने औ प्रत्यये खलपू+औ इत्यत्र ''अचिश्नुधातुभ्रुवाम्0'' इत्यादिना उवङि प्राप्ते तं प्रबाध्य ''ओः सुपि'' इति सूत्रेण यणि कृते खलप्व्+औ वर्णसम्मेलने खलप्वौ इति सिद्धम्। एवमेव सुष्ठु लुनाति इति सुलूः, सुल्वौ, सुल्वः इत्यादि।

**स्वभुवौ** – स्वस्मात् भवति इति स्वभूः। स्वभू शब्दात् प्रातिपदिकात् औ विभक्तौ स्वभू+औ इत्यत्र कारकपूर्वत्वात् ''ओ. सुपि'' इति सूत्रेण यणि प्राप्ते, ''न भूसुधियोः'' इति यणः निषेधे कृते ''अचिश्नुधातु.'' इत्यादिना उकारस्य उवङादेशेऽनुबन्धलोपे वर्णसम्मेलने **स्वभुवौ** इति रूपम्।

९७. अजादौ सुप्प्रत्यये परे वर्षाभूशब्दस्य यण् स्यात्। ''न भूसुधियोः'' इति यण्निषेधकं सूत्रम्। तत् बाधितुम् एतत् सूत्रम्।

**वर्षाभ्वौ** – प्रातिपदिकसंज्ञकात् वर्षाभूशब्दात् प्रथमाद्विवचने औप्रत्यये ''वर्षाभ्वश्च'' इत्यनेन यणि कृते वर्षाभ्वौ इति रूपम्।

**वार्तिकम्** – (दृन्करपुनः) दृन्पूर्वकस्य करपूर्वकस्य पुनःपूर्वकस्य 'भू' इत्यस्य अजादौ सुपि परे यण् भवतीति भावः। अतः दृन्भू+औ = दृन्भ्वौ। करभ्वौ। पुनर्भ्वौः।

**धाता** – धातृशब्दात् सुविभक्तौ ''ऋदुशनस्पुरुदंसोऽनेहसाञ्च'' इत्यनेन अन्त्यस्य अनङि कृतेऽनुबन्धन्लोपे च धातन्+स् इत्यवस्थायामेकदेशविकृतस्य अनन्यत्वात् तृजन्तत्वात् ''अप्तृन्तृच्.'' इत्यादिना उपधादीर्घे धातान्+स् इति जाते हल्ङ्यादिलोपे ''नलोपः प्रातिपदिकान्तस्य'' इति नलोपे कृते धाता इति सिद्धम्।धातृ+औ इत्यत्र ''ऋतो ङिसर्वनामस्थानयोः'' इति गुणे, रपरत्वे ''अप्तृन्तृच्0'' इत्युपधादीर्घे धातारौ। धातारः। धातृ+आम् इत्यत्र नुडागमे ''ऋवर्णान्नस्य णत्वं वाच्यम्'' इति वार्तिकेन नस्य णत्वे 'नामि' इति दीर्घे धातृृणाम् इति।

**विशेषः** – धातृ+नाम् इत्यत्र रषाभ्यां परत्वाभावात् ''रषाभ्यां नो णः समानपदे'' इत्यस्य अप्राप्तौ विशेषवचनम्।

**अत्र प्रश्नः** – 'नप्तृ' आदीनां तृन्तृजन्तत्वात् एव ''अप्तृन्तृच्.'' इत्यादिना उपधादीर्घः सिद्धः, किम् एषां पृथक् ग्रहणेन?अतः उत्तरति–''नप्त्रदीनांग्रहणं नियमार्थम्। स च नियमः उणादिसिद्धानां तृन्तृजन्तानां यदि दीर्घः, तर्हि नप्त्रादीनामेव सप्तानां भवेत्, नान्येषाम्। अतः 'पितृ' आदीनां न दीर्घः। (अयं नियमः व्युत्पत्ति पक्षे एव)। पितरौ, पितरः इत्यादौ दीर्घः न भवति इति भावः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९८. **नृ च ६/४/६**
अस्य नामि वा दीर्घः। नृणाम्, नॄणाम्।

९९. **गोतो णित् ७/१/९०**
ओकाराद्विहितं सर्वनामस्थानं णिद्वत् गौः, गावौ, गावः।

१००. **औतोऽम्शसोः ६/१/९३**
ओतोऽम्शसोरचि आकार एकादेशः। गाम्। गावौ। गाः। गवा। गवे। गोः इत्यादि।

---

९८. **ना** – नृ शब्दात् सौ विभक्तौ अनुबन्धलोपे अनङादेशे नन्+स् इत्यत्र नान्तस्योपधायाः ''सर्वनामस्थाने.'' इति दीर्घे हल्ङ्यादिलोपे नलोपे ना इति रूपम्। नरौ, नरः। अत्रापि न दीर्घः।

९८. नामि परे नृ शब्दस्य विकल्पेन दीर्घः। 'नामि' इत्यनेन नित्ये दीर्घे प्राप्ते विकल्पार्थम् एतत् सूत्रम्।

**नॄणाम-नृणाम्**- नृशब्दात् प्रातिपदिकात् षष्ठीबहुवचने आम् प्रत्यये ''ह्रस्वनद्यापो नुट्'' इति सूत्रेण नुडागमेऽनुबन्धलोपे ''नामि'' इति सूत्रेण नित्ये दीर्घे प्राप्ते तं प्रबाध्य 'नृ च' इति सूत्रेण विकल्पेन दीर्घे ''ऋवर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन नस्य णत्वे नॄणाम इति रूपम्। दीर्घाभावे नृणाम् इति द्वितीयं रूपम्।

९९. ओकारात् विहितं सर्वनामस्थानं णिद्वद्भावं लभते। गोशब्दस्यापि ओकारान्तत्वात् ततः परमपि तथा।

**गौः**– गोशब्दात् प्रातिपदिकसंज्ञायां प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे ''सुडनपुंसकस्य'' इति सूत्रेण सुप्रत्ययस्य सर्वनामस्थानसंज्ञायां कृतायां ''गोतो णित्'' इति सूत्रेण सर्वनामस्थानसंज्ञकस्य णिद्वद्भावे कृते ''अचो ञ्णिति'' इति सूत्रेण वृद्धौ कृतायां गौ स् इति जाते सस्य रुत्वे विसर्गे गौः इति रूपम्। गो+औ इत्यत्र णिद्वद्भावे वृद्धौ गौ+औ इति जाते आवादेशे गावौ इति। जसि गावः। अमि तु गो+ अम् इत्यत्र सर्वनामस्थानस्य णिद्वद्भावात् वृद्धौ प्राप्तायां तदपवादम् आह – ''औतोऽम्शसोः'' इति –

१००. आ ओतः अम्शसोः इतिच्छेदः। ओकारात् अमः शसश्च अचि परे पूर्वपरयोः स्थोन 'आ' इति एकादेशः इति।

**गाम्** – गोशब्दात् प्रातिपदिकात् अमि विभक्तौ ''गोतो णित्'' इति सूत्रेण णिद्वद्भावे ''अचोञ्णिति'' इति वृद्धौ प्राप्तायां तां प्रबाध्य ''औतोऽम्शसोः'' इति सूत्रेण पूर्वपरयोः 'आ' इत्येकादेशे कृते 'गाम्' इति रूपम्। शसि एकादेशे सस्य रुत्वे विसर्गे गाः।

**गोः** – गोशब्दात् ङसि/ ङस् विभक्तौ गो+अस् इत्यवस्थायां ''ङसिङसोश्च'' इति पूर्वरूपे सस्य रुत्वे विसर्गे गोः इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१०१. रायो हलि १/२/८५**

अस्याकारादेशो हलि विभक्तौ। रा: रायौ। राय:। राभ्याम् इत्यादि। ग्लौ:, ग्लावौ, ग्लाव:। ग्लौभ्याम् इत्यादि।

**॥ इत्यजन्तपुँल्लिङ्गाः शब्दाः ॥**

---

१०१. रैशब्दस्य हलादौ विभक्तौ आकार: अन्तादेश: भवति।

**रा:** – रैशब्दात् प्रातिपदिकात् सुविभक्तौ अनुबन्धलोपे रै+स् इत्यवस्थायां ''रायो हलि'' इति सूत्रेण आकारान्तादेशे रा+स् इति जाते रुत्वे विसर्गे रा: इति। अजादौ विभक्तौ तु आयादेशे रायौ, राय:, इत्यादि। राभ्याम्, राभि: राभ्य:, रासु इत्यादि।ग्लौ: चन्द्रमा:। ग्लौ शब्दस्य अजादौ विभक्तौ आवादेश: ग्लावौ। ग्लाव:। इत्यादि।

**॥ इति अजन्तपुँल्लिङ्गप्रकरणम् ॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अथ अजन्तस्त्रीलिङ्गप्रकरणम्

**रमा**

१०२. **औङ आपः ७/१/१८**

आबन्तादङ्गात्परस्यौङः शी स्यात्। औङ् इत्यौकारविभक्तेः संज्ञा। रमे। रमाः।

१०३. **सम्बुद्धौ च ७/३/१०६**

आप एकारः स्यात् सम्बुद्धौ। एङ्ह्रस्वादिति सम्बुद्धिलोपः। हे रमे। हे रमे। हे रमाः। रमाम्। रमे। रमाः।

१०४. **आङि चापः ७/३/१०५**

आङि ओसि चाप एकारः। रमया। रमाभ्याम्। रमाभिः।

---

**रमा**– रमा इति आबन्तः (टाप्प्रत्ययान्तः) शब्दः। ''ङ्याप्प्रातिपदिकात्'' इत्यत्र ङ्यापोः ग्रहणात् अस्मात् शब्दात् प्रथमाया एकवचने सुप्रत्यये अनुबन्ध लोपे रमा+स् इति स्थिते सस्य अपृक्तसंज्ञायां ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण अपृक्तस्य सस्य लोपे रमा इति रूपम्।

**१०२.** आबन्तं यद् अङ्गम्, तस्मात् परतः स्थितस्य औङः स्थाने शी आदेशःभवति। औङ् इति 'औ' इति विभक्तेः संज्ञा अस्ति। औ विभक्तिस्तु औ औट् इति ज्ञेयम्।

**रमे** – रमाशब्दात् प्रथमाद्विवचने औ विभक्तौ रमा+औ इति स्थितौ ''औङ आपः'' इति सूत्रेण औ इत्यस्य स्थाने शी आदेशे ''लशक्वतद्धिते'' इति सूत्रेण आद्यशकारस्य इत्संज्ञायां तस्य लोपः इति लोपे च कृते रमा+ई इति स्थितौ ''आद्गुणः'' इति सूत्रेण गुणैकादेशे रमे इति सिद्धम्।

**रमाः** – जसि विभक्तौ तु रमा+अस् इत्यत्र ''प्रथमयोः पूर्वसवर्णः'' इत्यनेन प्राप्तस्य पूर्वसवर्णदीर्घस्य ''दीर्घाज्जसि च'' इति निषेधे कृते ''अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे सस्य रुत्वे विसर्गे रमाः।

**१०३.** सम्बुद्धिसंज्ञके सुप्रत्यये परे आबन्तस्य अन्त्यस्य अलः एकारः भवति। अन्त्यस्य 'आ' इत्यस्य स्थाने इति भावः।

**हे रमे** – रमाशब्दात् सम्बोधने प्रथमायाः एकवचने सुप्रत्ययेऽनुबन्धलोपे सम्बुद्धिसंज्ञायां सत्यां रमा+स् इत्यवस्थायां 'सम्बुद्धौ च'' इति सूत्रेण 'रमा' शब्दस्य अन्त्यस्य आकारस्य एकारे हेशब्दस्य प्राक्प्रयोगे च हे रमे+स् इति जाते ''एङ्ह्रस्वात्सम्बुद्धेः'' इति सूत्रेण सम्बुद्धिलोपे कृते हे रमे इति रूपम्। औ विभक्तौ शी आदेशे गुणे हे रमे। अमि तु 'अमिपर्वूः' इति पूर्वरूपे रमाम्। औटः 'शी' आदेशे रमे। शसि – रमा + अस् इत्यत्र ''प्रथमयोः पूर्वसवर्णः'' इति पूर्वसवर्णदीर्घे रमाः। पुंस्त्वस्य अभावात् सस्य नत्वं तु न भवति ''तस्माच्छसो नः पुंसि'' इति।

**१०४.** आपः इति षष्ठ्यन्तम्। अत्र 'ओसि च' इति पूर्वसूत्रम् अनुवर्तते। ''बहुवचने झल्येत्'' इत्यतः एत् इति अनुवर्तते। अधिकारप्राप्तम् 'अङ्गस्य' इति आपः इत्यनेन विशिष्यते। अतः तदन्तविधिः। सूत्रस्य फलितः अर्थः – आबन्तं यद् अङ्गं तस्य अन्त्यस्य (अलोऽन्त्यस्य) एकारः स्यात् ओसि आङि च परे। आङ् इति टाविभक्तेः संज्ञा।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१०५. याडाप: ७/३/११३**

आपो ङित: याट्। वृद्धि:। रमायै। रमाभ्याम्। रमाभ्य:। रमाया:। रमयो:। रमाणाम्। रमायाम्। रमासु। एवं दुर्गाम्बिकादय:।

**१०६. सर्वनाम्न: स्याड्ढ्रस्वश्च ७/३/११४**

आबन्तात्सर्वनाम्नो ङित: स्याट् स्यादापश्च ह्रस्व:। सर्वस्यै। सर्वस्या:। सर्वासाम्। सर्वस्याम्। शेषं रमावत्। एवं विश्वादय: आबन्ता:।

**१०७. विभाषा दिक्समासे बहुव्रीहौ १/१/२८**

सर्वनामता वा। उत्तरपूर्वस्यै। उत्तरपूर्वायै। तीयस्येति वा सर्वनामसंज्ञा। द्वितीयस्यै, द्वितीयायै। एवं तृतीया। अम्बार्थेति ह्रस्व:। हे अम्ब: हे अक्क। हे अल्ल। जरा। जरसौ इत्यादि। पक्षे रमावत्। गोपा: विश्वपावत्। मती:। मत्या।

---

**रमया** – रमा इति आबन्तात् शब्दात् तृतीयैकवचने टाप्रत्यये 'चुटू' इति टकारस्य इत्संज्ञायां लोपे च कृते रमा+आ इति स्थितौ अङ्गसंज्ञायाम् ''आङि चाप:'' इति सूत्रेण ''अलोऽन्त्यस्य'' इति सहकारेण रमा इति अङ्गस्य अन्त्यस्य आकारस्य एत्वे रमे+आ इति स्थितौ ''एचोऽयवायव:'' इति सूत्रेण एकारस्य अयादेशे रमया इति रूपं सिद्धम्।

**१०५. याडाप:** – याट् + आप: इतिच्छेद:। आप: परस्य ङित: (ङित्प्रत्ययस्य) आद्यवयव: याड् भवति इति।

**रमायै** – रमा इति आबन्तात् शब्दात् चतुर्थ्या: एकवचने ङेप्रत्यये अनुबन्धलोपे रमा+ए इति स्थितौ ''याडाप:'' इति सूत्रेण एकारस्य आद्यवयवे याडागमेऽनुबन्धलोपे रमा या ए इति स्थितौ ''वृद्धिरेचि'' इति सूत्रेण पूर्वपरयो: वृद्ध्येकादेश **रमायै** इति रूपम्। ङसिङसो: परयो: याडागमे सवर्णदीर्घे रमाया:। ओसि तु रमा+ओस् इत्यत्र 'आङि चाप:' इति एत्वे अयादेशे 'रमयो:'। आमि तु ''ह्रस्वनद्यापो नुट्'' इत नुडागम: (आबन्तत्वात्) रमाणाम्। नस्य णत्वम्। ङिप्रत्यये रमा+ङि इत्यत्र याडागमे, ''ङेराम्नद्याम्नीभ्य:'' इति ङे स्थाने आम् आदेश: रमा+या+आम् इति स्थितौ सवर्णदीर्घे **रमायाम्** इति रूपम्। एवमेव दुर्गा, अम्बिका, उमा, लता इत्यादीनां शब्दानां रूपाणि भवन्ति इति बोध्यम्।

**१०६.** आबन्त: य: सर्वनामसंज्ञक: शब्द:, तस्मात्परस्य ङित्प्रत्ययस्य 'स्याट्' इति आगम: आबन्तस्य च ह्रस्व: भवति।

**सर्वस्या:** – सर्वा इति आबन्त: सर्वनामसंज्ञ: शब्द:। अस्मात् चतुर्थ्येकवचने ङे प्रत्ययेऽनुबन्धलोपे सर्वा+ए इति स्थितौ ''याडाप:'' इत्यनेन याडागमे प्राप्ते तं प्रबाध्य ''सर्वनाम्न: स्याड्ढ्रस्वश्च'' इति सूत्रेण स्याडागमेऽनुबन्धलोपे आपश्च ह्रस्वत्वे कृते सर्व+स्या+ए इति जाते ''वृद्धिरेचि'' इति सूत्रेण पूर्वपरयो: वृद्ध्येकादेशे कृते सर्वस्यै इति रूपं सिद्धम्।ङसिङसो: सर्वस्या:। आमि तु सुडागम: सर्वासाम्। ङिविभक्तौ स्याडागम: आपश्च ह्रस्व: ङे:स्थाने आमादेश: सवर्णदीर्घ: सर्वस्याम् इति। विश्वाशब्द: अपि एवमेव।

**१०७.** दिशावाचिनां शब्दानां यत्र समास: स दिक्समास:, तत्र बहुव्रीहौ सर्वनामसंज्ञा विकल्पेन भवति।

**उत्तरपूर्वस्यै, उत्तरपूर्वायै** – उत्तरस्या: पूर्वस्याश्च दिशो: अन्तरालम् उत्तरपूर्वा।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१०८. ङिति ह्रस्वश्च १/४/६**

इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ, ह्रस्वौ चेवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तः ङिति। मत्यै, मतये। मत्याः२। मतेः२।

---

अत्र ''दिङ्नामान्यन्तराले'' इति समासः। अस्य शब्दस्य ''विभाषा दिक्समासे बहुव्रीहौ'' इति सूत्रेण सर्वनामसंज्ञा विकल्पेन भवति। अतः अस्मात् ङिद्विभक्तिषु स्याड्आगमः आपश्च ह्रस्वत्वं भवति। उत्तरपूर्वा + ङे॰ उत्तरपूर्व + स्या + ए = उत्तरपूर्वस्यै इति। सर्वनामसंज्ञायाः अभावे तु याडागमः उत्तरपूर्वायै इति।

**तीयस्य इति** – तीयप्रत्ययान्तस्य आबन्तस्य अपि विकल्पेन सर्वनामसंज्ञा भवति। अत्र आधारस्तु ''तीयस्य ङित्सूपसंख्यानम्'' इति। अतः द्वितीयाशब्दात् चतुर्थ्या एकवचने सर्वनामसंज्ञायां स्याडागमः आबन्तस्य ह्रस्वत्वञ्च अनेन विधीयते द्वितीयस्यै इति। तदभावे तु द्वितीयायै इति। एवमेव तृतीयस्यै। तृतीयायै इति।अम्बा, अक्का, अल्ला इति अम्बार्थकाः शब्दाः। एषां सम्बुद्धौ ''अम्बार्थनद्योर्ह्रस्वः'' इति ह्रस्वत्वे ''एङ्ह्रस्वात्सम्बुद्धेः'' इति सम्बुद्धि लोपे हे अम्ब। हे अक्क। हे अल्ल इति।

**जरसौ** – जराशब्दात् आबन्तात् प्रथमायाः द्विवचने औ प्रत्यये जरा+ औ इति जाते ''जरायाः जरसन्यतरस्याम्'' इति सूत्रेण जरसादेशे **जरसौ** इति रूपम्। जरसादेशाभावे तु रमावत् जरे इति।

**गोपाः** – गाः पातीति स्त्री गोपाः। अत्र गोपा शब्दस्य आबन्तत्वाभावात् सुविभक्तौ हल्ङ्यादिलोपः न भवति। अस्य विश्वपावत् रूपाणि।

**विशेष** – मतिशब्दः ह्रस्वेकारान्तः। अतः अस्य घिसंज्ञा। विकल्पेन ङित्सु नदीसंज्ञा अपि अस्य। अतः नदीकार्यं घिसंज्ञाप्रयुक्तकार्यञ्च अस्य भवति। मतिः, मती, मतयः, मतिम्, मती इति। शसि तु मतीः इति। अत्र ''प्रथमयोः पूर्वसवर्णः'' इति पूर्वसवर्णदीर्घे सस्य रुत्वविसर्गौ मतीः। न चात्र ''तस्माच्छसः'' इति नत्वं, पुंस्त्वाभावात्। तृतीयैकवचने स्त्रीत्वात् ना आदेशः न, अतः यणि मत्या इति।

**१०८.** इयङ्उवङ्इत्यनयोः प्राप्तियोग्यौ स्त्रीशब्दाद् अन्यौ नित्यस्त्रीलिङ्गौ यौ ईवर्णोवर्णौ, ह्रस्वौ च इवर्णोवर्णौ (इ,उ) स्त्रीलिङ्गे विकल्पेन नदीसंज्ञकौ भवतः ङिद्विभक्तिषु। 'मति' इति शब्दः ह्रस्व–इकारान्तः स्त्रीलिङ्गशब्दः। अतः अस्य विकल्पेन नदीसंज्ञा ङेङसिङस्ङिषु।

**मत्यै, मतये** – नित्यस्त्रीलिङ्गात् मतिशब्दात् प्रातिपदिकात् चतुर्थ्येकवचने ङे विभक्तौ ''ङिति ह्रस्वश्च'' इति सूत्रेण नदीसंज्ञायां विकल्पेन कृतायां ''आण्नद्याः'' इति सूत्रेण आडागमे मति+आ+ए इति स्थितौ ''आटश्च'' इति सूत्रेण वृद्धौ यणि च कृते मत्यै इति सिद्धम्। नदीसंज्ञाया अभावे घिसंज्ञात्वात् ''घेर्ङिति'' इति गुणेऽयादेशे मतये इति। ङसिङसोः नदीत्वपक्षे आडागमः वृद्धिः यण् मत्याः इति। घिसंज्ञायां तु गुणः ''ङसिङसोश्च'' इति पूर्वरूपे मतेः इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०९. **इदुद्भ्याम्** ७/३/११७

इदुद्भ्यां नदीसंज्ञकाभ्यां परस्य ङेराम्। मत्याम्। शेषं हरिवत्। एवं बुद्ध्यादय:।

११०. **त्रिचतुरो: स्त्रियां तिसृचतसृ** ७/२/९९

स्त्रीलिङ्गयोरेतौ स्तो विभक्तौ।

१११. **अचि र ऋत:** ७/२/१००

तिसृचतसृ एतयोर्ऋकारस्य रेफादेश: स्यादचि। गुणदीर्घोत्वानामपवाद:। तिस्र:। तिस्र:। तिसृभि:। तिसृभ्य:। आमि नुट्।

११२. **न तिसृचतसृ** ६/४/४

एतयोर्नामि दीर्घो न। तिसृणाम्। तिसृषु। द्वे। द्वे। द्वाभ्याम्**३**। द्वयो:**२**। गौरी। गौर्यौ। गौर्य:। हे गौरि। गौर्यै इत्यादि। एवं नद्यादय:। लक्ष्मी:। शेषं गौरीवत्। एवं तरीतन्त्र्यादय:। स्त्री। हे स्त्रि।

---

१०९. नदीसंज्ञकाभ्याम् इकारान्तोकारान्ताभ्यां परस्य 'ङि' इत्यस्य आम् स्यात्।

**मत्याम्, मतौ** – मतिशब्दात् नित्यस्त्रीलिङ्गात् सप्तम्या: एकवचने ङि प्रत्यये ''ङिति ह्रस्वश्च'' इति सूत्रेण मतिशब्दस्य विकल्पेन नदीसंज्ञायां कृतायां ''आण्नद्या:'' इति आडागमे ''इदुद्भ्याम्'' इति सूत्रेण ङे: स्थाने आम् आदेशे मति+आ+आम् इति जाते सति ''आटश्च'' इति वृद्ध्येकादेशे ''इको यणचि'' इत्यनेन इकारस्य स्थाने यणि यकारे कृते **मत्याम्** इति रूपम्। नदीसंज्ञाया: अभावपक्षे घिसंज्ञायाम् ''अच्च घे:'' इत्यनेन इकारस्य अकारे विभक्तेश्च औकारादेशे मत औ इत्यवस्थायां ''वृद्धिरेचि'' इति सूत्रेण वृद्ध्येकादेशे ''मतौ'' इति रूपम्। शेषं तु हरिवत्। यत्र नदीसंज्ञा न तत्र, अङिद्विभक्तिषु इति भाव:। बुद्धि:, गति:, स्थिति: इत्यादय: शब्दा अपि एवमेव।

११०. स्त्रीलिङ्गे त्रिशब्दस्य चतुर्शब्दस्य च विभक्तौ परत: क्रमश: तिसृ, चतसृ इति आदेशौ भवत:।

१११. अचि परे तिसृशब्दस्य चतसृशब्दस्य य: ऋवर्ण:, तस्य रेफादेश: भवति। अयञ्च रेफादेश: ''ऋतो ङिसर्वनामस्थानयो:'' इति गुणस्य, ''प्रथमयो: पूर्वसवर्ण:'' इति पूर्वसवर्णदीर्घस्य, ''ऋत उत्'' इति उत्वस्य च अपवाद:। अत: अयं रेफादेश: एतानि कार्याणि बाधते इति भाव:।

**तिस्र:** – त्रिशब्दात् प्रातिपदिकात् (स्त्रीलिङ्गे विद्यमानात्) प्रथमाबहुवचने जस् विभक्तौ अनुबन्धलोपे ''त्रिचतुरो: स्त्रियां तिसृचतसृ'' इति सूत्रेण त्रिस्थाने तिसृ आदेशे कृते तिसृ+अस् इति स्थिते जस: सर्वनामस्थानसंज्ञत्वात् ''ऋतो ङिसर्वनामस्थानयो:'' इति सूत्रेण इति ऋकारस्य गुणे प्राप्ते तं प्रबाध्य ''अचि र ऋत:'' इत्यनेन रेफादेशे तिस् र् + अस् वर्णसम्मेलने तिस्र: इति। शसि तु ''प्रथमयो:'' इति पूर्वसवर्णदीर्घे प्राप्ते सति तदपवादत्वेन रेफादेश:, तिस्र:। तिसृ+आम् इत्यत्र नुडपेक्षया ''अचि ऋत:'' इत्यस्य परत्वेऽपि ''नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'' इति वार्तिकेन पूर्वविप्रतिषेध द्वारा नुड् एव भवति तिसृ+नाम् इति जाते –

११२. तिसृशब्दस्य चतसृशब्दस्य च नामि परे दीर्घ: न भवति। ''नामि'' इति सूत्रेण प्राप्तस्य दीर्घस्य निषेध: अनेन विधीयते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

११३. **स्त्रियाः ६/४/७९**

अस्येयङ् स्यादजादौ प्रत्यये परे। स्त्रियौ। स्त्रियः।

११४. **वाम्शसोः ६/४/८०**

अमि शसि च स्त्रिया इयङ् वा स्यात्। स्त्रियम्, स्त्रीम्। स्त्रियः, स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः। परत्वान्नुट्। स्त्रीणाम्। स्त्रियाम्। स्त्रीषु। श्रीः। श्रियौ। श्रियः।

---

**तिसृणाम्** – स्त्रीलिङ्गे त्रिशब्दात् प्रातिपदिकात् षष्ठीबहुवचने आम्प्रत्यये त्रि+आम् इति स्थितौ ''त्रिचतुरोः स्त्रियां तिसृचतसृ'' इति सूत्रेण त्रिस्थाने 'तिसृ' आदेश तिसृ+आम् इति जाते ''ह्रस्वनद्यापो नुट्'' इत्यनेन नुटः प्राप्तिः, ''अचि र ऋतः'' इत्यनेन ऋकारस्य रेफादेशस्य च प्राप्तिः भवति, अनयोः मध्ये रेफादेशस्य परत्वेऽपि ''नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'' इति वचनात् पूर्वविप्रतिषेधेन नुटि कृते 'तिसृ+नाम्' इति जाते 'नामि' इसि सूत्रेण दीर्घे प्राप्ते ''न तिसृचतसृ'' इत्यनेन निषेधे कृते ''ऋवर्णान्नस्य णत्वं वाच्यम्'' इति वार्तिकेन नस्य णत्वे कृते 'तिसृणाम्' इति रूपं सिद्धम्।

**द्वे** – द्विशब्दस्य 'त्यदादीनामः' इति अत्वे स्त्रीत्वविवक्षायां टापि द्वा इति शब्दात् (आबन्तात्) प्रथमायाः द्विवचने औ विभक्तौ ''औङ आपः'' इति सूत्रेण 'शी' आदेशेऽनुबन्धलोपे द्वा+ई इति जाते गुणैकादेशे द्वे इति।

**गौरीशब्दः**–'गौरी' शब्दस्य ङ्यन्तत्वात् सोः हल्ङ्यादिलोपः। सम्बोधने ''अम्बार्थ.'' इति ह्रस्वः हे गौरि। अस्य नदीसंज्ञकत्वात् चतुर्थ्यादिङिद्विभक्तिषु ''आण्नद्याः'' इति आडागमः ''आटश्च'' इति वृद्धिः ततश्च यण् गौर्यै इति। गौर्याः। गौर्याम् इति सप्तम्येकवचने। 'नदी' भगवती, देवी इत्यादयः अपि एवमेव। लक्ष्मीशब्दस्य अङ्यन्तत्वात् सुलोपः न, लक्ष्मीः। शेषं गौरीवत्।

११३. स्त्रीशब्दस्य अजादौ प्रत्यये परे ईकारस्य इयङ् आदेशः भवति।

**स्त्रियौ** – स्त्रीशब्दात् प्रातिपदिकात् प्रथमाद्विवचने औप्रत्यये स्त्री+औ इति जाते ''इको यणचि'' इति यणि प्राप्ते तदपवादत्वेन ''स्त्रियाः'' इति सूत्रेण ईकारस्य 'इयङ्' इत्यादेशे कृते स्त्रिय् + औ इति जाते वर्णसम्मेलने कृते 'स्त्रियौ' इति रूपम्। जसि – स्त्रियः। अमि शसि च विशेषम् आह – 'वाम्शसोः' इति –

११४. अमि शसि च प्रत्यये परे स्त्रियाः विकल्पेन इयङ् भवति। **स्त्रियम्, स्त्रीम्** – स्त्रीशब्दात् द्वितीयायाः एकवचने अम्प्रत्यये आगते स्त्री + अम् इति स्थितौ ''स्त्रियाः'' इति सूत्रेण नित्यम् इयङि प्राप्ते ''वाऽम्शसोः'' इत्यनेन विकल्पेन इयङादेशेऽनुबन्धलोपे स्त्रिय्+अम् इति स्थितौ वर्णसम्मेलने स्त्रियम् इति रूपम्। इयङभावे ''अमि पूर्वः'' इति सूत्रेण पूर्वरूपैकादेशे 'स्त्रीम्' इति रूपम्। शस् प्रत्ययेऽपि विभाषया इयङादेशः, अतः स्त्रियः इति रूपम्। इयङभावे तु 'प्रथमयोःपूर्वसवर्णः' इत्यनेन पूर्वः सवर्णदीर्घः स्त्रीः इति। पुंस्त्वाभावात् सस्य नत्वं तु न। टाविभक्तौ ''स्त्रियाः'' इति इयङ् – स्त्रिया। ङिद्विभक्तिषु तु विशेषकार्यम् – नदीसंज्ञकत्वात् आडागमः आटश्चेति वृद्धिः ततश्च इयङ् 'स्त्रियै' इति चतुर्थ्येकवचने। ङसिङसोः – स्त्रियाः, स्त्रियाः, इति। आमि तु नदीत्वात् नुटः ''स्त्रियाः'' इति इयङश्च प्राप्तिः, तत्र ''विप्रतिषेधे परं कार्यम्'' इति परत्वात् नुट् – स्त्रीणाम्। ङिप्रत्यये तु नदीत्वात् आमागमः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**११५. नेयङुवङ्स्थानावस्त्री १/४/४**

इयङुवङो: स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्त:, न तु स्त्री। हे श्री:। श्रियै, श्रिये। श्रिया:, श्रिय:।

**११६. वामि १/४/५**

इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्त:, न तु स्त्री। श्रीणाम्, श्रियाम्। श्रियि, श्रियाम्। धेनुर्मतिवत्।

---

ततश्च इयङ् – स्त्रियाम्। श्री शब्दस्य ङ्यन्तत्वाभावात् सो: लोप: न भवति श्री:। अजादिषु ''अचिश्नु.'' इति इयङ् श्रियौ, श्रिय:।

**११५.** न इयङ्उवङ्स्थानौ + अस्त्री इतिच्छेद:। नदीसंज्ञाया: निषेधकं सूत्रम्। यत्र इयङ: उवङ: च स्थिति: संभवा अर्थात् इयङुवङ्प्राप्तियोग्यौ यौ ई, ऊ: (ईकारान्त: ऊकारान्तश्च) तौ नदीसंज्ञौ न भवत:, स्त्रीशब्दं वर्जयित्वा। अत: स्त्रीशब्दस्य तु नदीसंज्ञा भवति इति लब्धम्।

**हे श्री:** – श्रयन्त्येताम् इति श्री:। श्रीशब्दात् प्रातिपदिकात् सम्बोधने प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे हे श्री+स् इति जाते 'यू स्त्र्याख्यौ नदी' इति सूत्रेण नदीसंज्ञायां प्राप्तायाम् अस्य धातुत्वात् इयङ्योग्यत्वात् ''नेयङुवङ्स्थानावस्त्री'' इति सूत्रेण नदीसंज्ञाया: निषेधे 'अम्बार्थनद्योर्ह्रस्व:' इति ह्रस्वत्वस्य अप्राप्तौ (नदीत्वाभावात्) सस्य रुत्वे विसर्गे हे श्री: इति।

**श्रियै, श्रिये** – श्रीशब्दात् प्रातिपदिकात् चतुर्थ्येकवचने ङे प्रत्ययेऽनुबन्धलोपे श्री+ए इति जाते ''नेयङुवङ्स्थानावस्त्री'' इति सूत्रेण ''यू स्त्र्याख्यौ नदी'' इति प्राप्ताया: नदीसंज्ञाया: निषेधेऽपि ''ङिति ह्रस्वश्च'' इति सूत्रेण विकल्पेन नदीसंज्ञायां कृतायाम् ''आण्नद्या:'' इति सूत्रेण आडागमेऽनुबन्धलोपे श्री+आ+ए इति स्थितौ ''आटश्च'' इति वृद्ध्येकादेशे श्री+ऐ इति जाते ''अचिश्नुधातुभ्रुवाम्.'' इत्यादिना सूत्रेण ईकारस्य इयङादेशे श्रियै इति रुपं सिद्धम्।नदीत्वाभावपक्षे इयङादेशे कृते श्रिये इति। ङसिङसो: – श्रिया:, श्रिय:। अत्रापि नदीत्वविकल्प:, तत्र च आट्।

**११६.** एयङुवङ्योग्यौ नित्यस्त्रीलिङौ यौ ईवर्णोवर्णौ, तौ आमि परे विकल्पेन नदीसंज्ञकौ भवत:, स्त्रीशब्दस्य तु न नदीसंज्ञा।

**श्रीणाम्, श्रियाम्** – प्रातिपदिकात् श्रीशब्दात् षष्ठीबहुवचने आम् प्रत्यये ''नेयङुवङ्.'' इति नदीत्वनिषेधेऽपि ''वाऽमि'' इति सूत्रेण आमि परे विकल्पेन नदीसंज्ञायां ''ह्रस्वनद्यापो नुट्'' इति सूत्रेण नुडागमेऽनुबन्धलोपे श्री+नाम् इति जाते''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नस्य णत्वे कृते ''श्रीणाम्'' इति रूपम्। नदीत्वाभावे तु नुडभावे इयङादेशे श्रियाम्। सप्तम्येकवचने ङिप्रत्यये ''ङिति ह्रस्वश्च'' इति विकल्पेन नदीत्वात् ''ङेराम्नद्याम्नीभ्य:'' इति ङे: आमादेशे इयङि ''श्रियाम्'' इति रूपम्। नदीत्वाभावे तु आम: अभाव:, तत्र इयङि 'श्रियि' इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

११७. **स्त्रियाञ्च ७/१/९६**

स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते।

११८. **ऋन्नेभ्यो ङीप् ४/१/५**

ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप्। क्रोष्ट्री गौरीवत्। भ्रूः श्रीवत्। स्वयम्भूः पुवंत्।

११९. **न षट्स्वस्रादिभ्यः ४/१/१०**

ङीप्टापौ न स्तः। स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा। यातामातेति सप्तैते स्वस्रादय उदाहृताः। स्वसा, स्वसारौ। माता पितृवत्। शसि मातृः। द्यौर्गौवत्। राः पुंवत्। नौग्लौवत्।

॥ इत्यजन्तस्त्रीलिङ्गाःशब्दाः॥

---

११७. स्त्रीलिङ्गे क्रोष्टुशब्दः तृज्वद्भावं प्राप्नोति। अर्थात् स्त्रीलिङ्गे 'क्रोष्टृ' इति ऋदन्त एव शब्दः प्रयोक्तव्यः इति फलितम्।

११८. ऋदन्तेभ्यः नकारान्तेभ्यश्च शब्देभ्यः स्त्रीत्वविवक्षायां ङीप् भवति। स्त्रियां क्रोष्टुशब्दस्य तृज्वद्भावे (स्त्रियाञ्च सूत्रेण) ''ऋन्नेभ्यो ङीप्'' इति सूत्रेण ङीप्प्रत्ययेऽनुबन्धलोपे क्रोष्टृ+ई इति स्थिते 'इको यणचि' इति सूत्रेण ऋकारस्य स्थाने रेफे (यणि) कृते क्रोष्ट्र्+ई इति दशायां वर्णसम्मेलने क्रोष्ट्री इति शब्दः। अस्मात् प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे सस्य अपृक्तसंज्ञायां हल्ङ्यादिलोपे क्रोष्ट्री इति गौरीवत् रूपम्। अस्य नदीत्वात् ङित्प्रत्ययेषु आडागमः। आमि नुट्। ङि प्रत्ययस्य आमादेशः।

**(क)** भ्रूः श्रीवत्, अतः यथा श्रीशब्दे इयङ् तथा भ्रूः शब्दे उवङ् भवति। भ्रुवौ, भ्रुवः, भ्रुवै, भ्रुवे। भ्रुवाः, भ्रुवः। भ्रुणाम्, भ्रूणाम्। भ्रुवाम्, भ्रुवि इत्यादि।

**(ख)** स्वयम्भूशब्दः पुंवत् अर्थात् पुंसि यथा अस्य रूपाणि तथैव स्त्रियां बोध्यानि। स्वयम्भू+औ इत्यादौ ''न भूसुधियोः'' इति निषेधात् ''ओः सुपि'' इति यण् न भवति, अतः ''अचिश्नुधातुभ्रुवाम्.'' इत्युवङ् स्वयम्भुवौ, स्वयम्भुवः इत्यादि।

११९. षट्संज्ञकेभ्यः स्वस्रादिशब्देभ्यश्च स्त्रियां ङीप्टापौ न भवतः। के स्वस्रादयः ?- शृणु - स्वसृ, तिसृ, चतसृ, ननान्दृ, दुहितृ, यातृ, मातृ इत्येते सप्त स्वस्रादयः उच्यन्ते। एभ्यः ङीप् टाप् च न भवतः। स्वसृशब्दात् सौ ''ऋदुशनस्.'' इति अनङ् ''अप्तृन्तृच्.'' इति उपधादीर्घः सलोपनलोपौ स्वसा। स्वसारौ। मातृशब्दस्य पितृशब्दवत् रूपाणि। शसि तु मातॄः इति। पुंस्त्वाभावात् नत्वं न। पितृशब्दस्य तु पितॄन् इति। द्यौः द्यावः, द्यावः इति गोशब्दवत् रूपाणि। अत्र 'द्यो' इति ओकारान्तः शब्दः। 'गोतो णित्' इत्यत्र ''ओतो णिद्'' इति वक्तव्यम्। अतः अस्य णिद्वद्भावः। रैशब्दस्य यथा पुंसि तथा राः रायौ रायः इति रूपाणि। नौ शब्दः ग्लौशब्दवत्। नौः नावौ नावः।

॥ इत्यजन्तस्त्रीलिङ्गप्रकरणम्॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथाजन्तनपुंसकलिङ्गप्रकरणम्

१२०. **अतोऽम् ७/१/२४**
अतोऽङ्गात् क्लीबात्स्वमोरम्। अमिपूर्वः। ज्ञानम्। एङ्ह्रस्वादिति हल्लोपः। हे ज्ञान।

१२१. **नपुंसकाच्च ७/१/१९**
क्लीबादौङः शी स्यात्। भसंज्ञायाम्।

१२२. **यस्येति च ६/४/१४८**
ईकारे तद्धिते च परे भस्येवर्णावर्णयोर्लोपः। इत्यल्लोपे प्राप्ते। (औङःश्यां प्रतिषेधो वाच्यः) ज्ञाने।

---

**१२०.** अदन्ताद् अङ्गात् नपुंसकात् सु, अम् इत्यनयोः स्थाने अमादेशः भवति। सोः स्थाने अमादेश इति तु युज्यते, कथम् अमः स्थाने अमादेशः?किम् तेन?अत्र वक्तव्यम् – 'स्वमोर्नपुंसकात्' इत्यनेन स्वमोः लुकि प्राप्ते तद्बाधनार्थं अमः अम्विधानम्। सति अमादेशे ''अमि पूर्वः'' इत्यनेन पूर्वरूपम्।

**ज्ञानम्** – ज्ञानशब्दात् ''कृत्तद्धितसमासाश्च'' इति सूत्रेण प्रातिपदिकसंज्ञायां प्रथमैकवचने सुप्रत्यये ''यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्'' इति सूत्रेण अङ्गसंज्ञायाम् 'स्वमोर्नपुंसकात्' इति प्राप्तं लुकं प्रबाध्य ''अतोऽम्'' इति सूत्रेण सोः स्थाने अमादेशे कृते ज्ञान+अम् इति जाते ''अमि पूर्वः'' इति सूत्रेण पूर्वपरयोः स्थाने पूर्वरूपैकादेशे ज्ञानम् इति सिद्धम्।

**हे ज्ञान** – प्रातिपदिकसंज्ञाकात् ज्ञानशब्दात् सम्बोधने प्रथमैकवचने सुप्रत्यये अङ्गसंज्ञायां सोः सम्बुद्धिसंज्ञायाम् ''अतोऽम्'' इति सोः अमादेशे हे ज्ञान+ अम् इत्यवस्थायाम् ''अमिपूर्वः'' इति पूर्वरूपे हे ज्ञानम् इति स्थितौ ''एङ् ह्रस्वात्सम्बुद्धेः'' इत्यनेन सम्बुद्धेः हलः (मकारस्य) लोपे कृते हे ज्ञान इति रूपम्।

**१२१.** अत्र ''औङ आपः'' इति सूत्रात् ''औङः'' इति अनुवर्तते। अतः सूत्रस्य अयमर्थः – नपुसंकाद् अङ्गात् औङः (औ इत्यस्य) स्थाने ''शी आदेशः भवति। नपुसंकलिङ्गे सुटः सर्वनामस्थानसंज्ञायाः अभावात् 'यचिभम्' इत्यनेन औविभक्तौ अपि नपुसंकलिङ्गे भसंज्ञा विधीयते, इति विशेषतः अवधेयम्।

**१२२.** यस्येति च। यस्य + ईति च इतिच्छेदः। इश्च अश्च इति यं, तस्य। इकारस्य अकारस्य इति भावः। अतः अयमर्थः – भसंज्ञकस्य इकारस्य अकारस्य च लोपः भवति ईवर्णे तद्धिते वा परे। **( औङःश्याम् )** औङः स्थाने यः 'शी' आदेशः, तस्मिन् परे भसंज्ञकस्य (यस्येति च प्राप्तः) इवर्णस्य अवर्णस्य लोपः प्रतिषिध्यते।

**ज्ञाने** – ज्ञानशब्दात् प्रातिपदिकात् औविभक्तौ ''नपुंसकाच्च'' इति औस्थाने 'शी' आदेशेऽनुबन्धलोपे ज्ञान+ई इति स्थितौ ''यचिभम्'' इति भसंज्ञायां ''यस्येति च'' इत्यनेन अल्लोपे प्राप्ते ''औङःश्यां प्रतिषेधो वाच्यः'' इति निषेधे 'आद्गुणः' इति गुणैकादेशे ज्ञाने इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१२३. **जश्शसोः शिः** ७/१/२०

क्लीबादनयोः शि स्यात्।

१२४. **शि सर्वनामस्थानम्** १/१/४२

'शि' इत्येतदुक्तसंज्ञं स्यात्।

१२५. **नपुंसकस्य झलचः** ७/१/७२

झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने।

१२६. **मिदचोऽन्त्यात्परः** १/१/४७

अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात्। उपधादीर्घः। ज्ञानानि। पुनस्तद्वत्। शेषं पुंवत्। एवं धनवनफलादयः।

१२७. **अद्ड्डतरादिभ्यः पञ्चभ्यः** ७/१/२५

एभ्यः क्लीबेभ्यः स्वमोरद्डादेशः स्यात्।

---

१२३. नपुंसकाद् अङ्गात् परयोः जश्शसोः (जसः शसश्च) स्थाने 'शि' आदेशः भवति।

१२४. 'शि' इत्यस्य (जश्शसोः शिः इति विहितस्य) सर्वनामस्थानसंज्ञा भवति।

१२५. झल् च अच्च इति समाहारद्वन्द्वः। तेन अधिकारप्राप्तम् ''अङ्गस्य'' इति विशिष्यते, अतस्तदन्तविधिः। अयमर्थः – झलन्तस्य अजन्तस्य च नपुंसकस्य अङ्गस्य सर्वनामस्थानसंज्ञके प्रत्यये परे नुमागमः भवति। अत्र (नुमि)''उमौ'' इति इतौ। अतः अयम् – मित् (मकारः अवयवः इत् यस्य)। नुमागमः कुत्र स्यात् इति जिज्ञासायाम् – उच्यते –

१२६. मिदचोऽन्त्यात्परः इति। मित्+अचः अन्त्यात् परः इतिच्छेदः। यस्य मिद् आगमः उक्तः, तत्र यावन्तः अज्वर्णाः सन्ति, तेषां मध्ये यः अन्त्यः अच्, ततः परः तस्य एव अन्त्याचः अन्तावयवत्वेन स आगमः भवति इति व्यवस्था। (तस्मात् परः इति भावः।)

**ज्ञानानि** – ज्ञानशब्दात् प्रातिपदिकात् प्रथमाबहुवचने जस् प्रत्यये ज्ञान + जस् इत्यवस्थायाम् अङ्गसंज्ञायां ''जश्शसोः शि'' इति सूत्रेण जसः स्थाने 'शि' आदेशे अनुबन्धलोपे ''शि सर्वनामस्थानम्'' इति सूत्रेण शेः सर्वनामस्थानसंज्ञायां कृतायां ''मिदचोऽन्त्यात्परः'' इति सूत्रसहकारेण ''नपुंसकस्य झलचः'' इति सूत्रेण नकारोत्तरावर्णात्परतः अन्तावयवत्वेन नुमागमेऽनुबन्धलोपे ज्ञानन् + इ इति स्थितौ ''सर्वनामस्थाने चासम्बुद्धौ'' इति सूत्रेण उपधायाः दीर्घे ज्ञानान्+इ = ज्ञानानि इति रूपं सिद्धम्। द्वितीयायां पुनस्तद्वत् ज्ञानं ज्ञाने ज्ञानानि इति। शेषं तृतीयातः सप्तमीं यावत् पुंवत् (रामवत्) ज्ञानेन ज्ञानैः ज्ञानाय इत्यादि। एवमेव धनवनफलादिशब्दानां रूपाणि।

१२७. डतर, डतम, अन्य, अन्यतर, इतर इति डतरादयः सर्वादिगणे पठिताः। तत्र डतरडतमौ प्रत्ययौ, अतः 'प्रत्ययग्रहणे तदन्ताः ग्राह्याः' इति परिभाषया डतरान्तस्य डतमान्तस्य च ग्रहणम्। एभ्यः पञ्चभ्यः क्लीबेभ्यः (नपुंसकेभ्यः) परयोः स्वमोः (सु,अम् इत्यनयोः) स्थाने अद्ड्आदेशः भवति। तत्र डकारस्य इत्संज्ञा, लोपश्च। अत अयं डित्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१२८. टे: ६/४/१४३**

डिति भस्य टेर्लोप:। कतरत्, कतरद्। कतरे। कतराणि। हे कतरत्। शेषं पुंवत्। एवं कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य अन्यतमम् इत्येव। (एकतरात्प्रतिषेधो वक्तव्य:) एकतरम्।

**१२९. ह्रस्वो नपुंसके प्रातिपदिकस्य १/२/४७**

अजन्तस्येत्येव। श्रीपं ज्ञानवत्।

**१३०. स्वमोर्नपुंसकात् ७/१/२३**

लुक् स्यात्। वारि।

**१३१. इकोऽचि विभक्तौ ७/१/७३**

इगन्तस्य क्लीबस्य नुमचि विभक्तौ। वारिणी। वारीणि। न लुमता इत्यस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुण:। हे वारे, हे वारि। 'घेर्ङिति' गुणे प्राप्ते (वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन) वारिणे। वारिण:। वारिणो:। नुमचिरेति नुट्। वारीणाम्। वारिणि। हलादौ हरिवत्।

---

१२८. डिति परे भसंज्ञकस्य टे: लोप: भवति। 'टि' इति व्याकरणशास्त्रे काचित्संज्ञा इति पूर्वमुक्तम्।

**कतरत्, कतरद्** – (किम् + डतर) डतरप्रत्ययान्तस्य (नपुंसके) कतर श्शब्दस्य ''कृत्तद्धितसमासाश्च'' इति प्रातिपदिकसंज्ञायां सौ विभक्तौ कतर+सु इति दशायाम् ''अद्ड्डतरादिभ्य: पञ्चभ्य:'' इति सूत्रेण सो: स्थाने 'अद्ड्' आदेशेऽनुबन्धलोपे च कृते कतर+अद् इति जाते ''यचिभम्'' इति सूत्रेण कतरशब्दस्य भसंज्ञायां ''टे:'' इति सूत्रेण टिलोपे कतर्+अद् = कतरद् इति स्थिते ''वाऽवसाने'' इति सूत्रेण विकल्पेन चर्त्वेन दस्य तकारे कतरत् इति रूपम्। चर्त्वाभावे कतरद् इति रूपम्।कतर+औ इत्यत्र ''नपुंसकाच्च'' इति 'शी' आदेशे भत्त्वात् यस्येतिचेति अल्लोपे प्राप्ते ''औङ:श्यां प्रतिषेधो वाच्य:'' इति निषेधात् कतर+ई ''आद्गुण:'' इति गुणे कतरे इति। कतर+जस् = कतराणि इति ''ज्ञानानि'' इतिवत्। सम्बुद्धौ हे कतरत् इति। शेषं पुंवत्।एवमेव कतमत्, इतरत्, अन्यत्, अन्यतरत् इत्यपि ज्ञेयम्। अन्यतम शब्दस्य तु न अद्डादेश:, अस्यशब्दस्य डतमप्रत्ययान्तत्वाभावात् (अव्युत्पन्नप्रातिपदिकम् एतत् इति)। किं रूपं तर्हि – अन्यतमम् इति 'ज्ञानम्' इतिवत्। एकतरशब्दादपि अद्ड्आदेश: न भवति ''एकतरात् प्रतिषेधो वक्तव्य:'' इति वार्तिकनिषेधात्। एकतरम् इति रूपम्।

१२९. ह्रस्वत्वादिधर्मा: अचाम् एव। अत: उपस्थितम् 'अच:' इति पदं 'प्रातिपदिकस्य' इति पदस्य विशेषणम्, अत: तदन्तविधि:। सूत्रस्य अयमर्थ: – नपुंसकलिङ्गे अजन्तस्य प्रातिपदिकस्य ह्रस्व: स्याद् इति। श्रियं पाति इति श्रीपाशब्द: क्विबन्त:। अस्य नपुंसके ''ह्रस्वो नपुंसके प्रातिपकिदस्य'' इति सूत्रेण ह्रस्वे कृते श्रीपम् इति ज्ञानवत् रूपम्, अदन्तत्वात्। श्रीपाणि, श्रीपेण, श्रीपाणाम् इत्यादौ ''एकाजुत्तरपदे ण:'' इत्यनेन णत्वं भवतीति ज्ञेयम्।

१३०. नपुंसकात् परयो: स्वमो: (सु अम् इत्यनयो:) लुक् भवति। वारि इति नपुंसकात् प्रातिपदिकात् सुविभक्तौ वारि+सु इति स्थिते ''स्वमोर्नपुंसकात्'' इति सूत्रेण सो: लुकि वारि इति।

१३१. अजादौ विभक्तौ इगन्तस्य नपुंसकस्य अन्त्याद् अच: पर: तस्य अन्तावयव: 'नुम्' इति आगम: भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१३२. **अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः** ७/१/७५

एषामनङ् स्याट्टादावचि।

१३३. **अल्लोपोऽनः** ६/४/१३४

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः। दध्ना। दध्ने। दध्नः२। दध्नोः२।

------------------------------------------------------------------------

**वारिणी** – वारि इति प्रातिपदिकात् औ विभक्तौ ''नपुंसकाच्च'' इति सूत्रेण औङः श्यादेशेऽनुबन्धलोपे वारि+ई इति स्थितौ ''इकोऽचि विभक्तौ'' इति सूत्रेण अन्त्यस्य अचः इकारस्य अन्तावयवे नुमागमेऽनुबन्धलोपे वारिन्+ई इति स्थितौ ''अट्कुप्वाङ्.'' इत्यादिना नस्य णत्वे 'वारिणी' इति रूपं सिद्धम्। वारि+जस् इत्यत्र जसः शि आदेशे तस्य सर्वनामस्थानसंज्ञायां नुमागमे वारिन्+इ इत्यवस्थायां ''सर्वनामस्थाने चासम्बुद्धौ'' इति उपधादीर्घे णत्वे वारीणि इति रूपम्।

**हे वारे, हे वारि**–सम्बुद्धौ सौ तस्य ''स्वमो.'' इति लुकि 'न लुमताङ्गस्य' इति निषेधस्य अनित्यत्वपक्षे प्रत्ययलक्षणम् आदाय 'ह्रस्वस्य गुणः' इति गुणे हे वारे इति। प्रत्ययलक्षणाभावे तु हे वारि।

**वारिणे** – वारि इति प्रातिपदिकात् चतुर्थ्यां ङे विभक्तौ अनुबन्धलोपे वारि+ए इत्यत्र ''घेर्ङिति'' इति घित्वात् गुणे प्राप्ते ''इकोऽचि विभक्तौ'' इति नुमागमे च प्राप्ते गुणस्य परत्वेऽपि ''वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन'' इति वातिकेन पूर्वविप्रतिषेधेन नुमि णत्वे च कृते 'वारिणे' इति रूपं सिद्धम्। (वृद्ध्यौत्व.) इति – 'अचो ञ्णिति' इति वृद्धिः, 'अच्च घेः' इति औत्वं, तृज्वत्क्रोष्टुः इति तृज्वद्भावः, घेर्ङिति इति गुणः, एते सर्वेऽपि विधयः ''इकोऽचि विभक्तौ'' इति विधेः परवर्तिनः सन्ति। नुमा सह एषां प्राप्तौ ''विप्रतिषेधे परं कार्यम्'' इति दिशा परत्वात् एतैः भाव्यं किन्तु वार्तिका नुसारं एतेभ्यः पूर्वविप्रतिषेधेन पूर्वविधिः नुम् एव भवति इति विशेष व्यवस्था। अतः वारि+ए इत्यत्र 'घेर्ङिति' इति गुणापेक्षया नुम् एव भवति वारिणे इति। वारीणाम् इत्यत्र तु वारि+आम् इति स्थितौ ''ह्रस्वनद्यापः'' इति नुटः

''इकोऽचि.'' इति नुमश्च सह प्राप्तिः तत्र ''नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन'' इति वार्तिकेन नुड् एव भवति, तश्च नामीति दीर्घे वारीणाम् इति।

१३२. अस्थि, दधि, सक्थि, अक्षि इत्येतेषां प्रथमाद्वितीययोः वारिवद्रूपाणि, तृतीयादिषु अजादिषु विशेषकार्यं करिष्यन् आह 'अस्थिदधि.' इति। एतेषां शब्दानां टादौ अजादौ विभक्तौ अनङ् आदेशः भवति, स च ङित्त्वात् अन्त्यस्य अचः स्थाने। दधि+टा इत्यत्र अनङ्आदेशे दधन्+आ इति जाते भसंज्ञायां च जातायाम् –

१३३. यस्मात्परः असर्वनामस्थानयजादिस्वादिः, तादृशः यः अङ्गस्य अवयवः अन्, तस्य अकारस्य लोपः भवति। इत्थं दधन्+आ इत्यत्र अनः अकारस्य लोपे दध्ना इति।

**दध्ना**–दधि इति प्रातिपदिकात् तृतीयाया एकवचने टाप्रत्यये अनुबन्धलोपे दधि+आ इति स्थितौ भसंज्ञायाम् ''अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः'' इति सूत्रेण अन्त्यस्य स्थाने अनङादेशेऽनुबन्धलोपे दधन्+आ इति जाते ''अल्लोपोऽनः'' इति सूत्रेण अनः अकारस्य लोपे दध्न्+आ = दध्ना इति सिद्धम्। दधि+ङे = दध्ने। ङसिङसोः दध्नः। ओसि दध्नोः इति ज्ञेयम्। सप्तम्येकवचने तु विशेषम् आह – ''विभाषा ङिश्योः'' इति –



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१३४. विभाषा ङिश्योः ६/४/१३६**

अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा ङिश्योः। दध्नि, दधनि। शेषं वारिवत्। एवमस्थिसक्थ्यक्षि। सुधि। सुधिनी। सुधीनि। हे सुधे, हे सुधि।

**१३५. तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य ७/१/७४**

प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि। सुधिया, सुधि नेत्यादि। मधु। मधुनी। मधूनि। हे मधो, हे मधु। सुलुनी। सुलूनि। सुलुनेत्यादि। धातृ। धातृणी। धातॄणि। हे धातः, हे धातृ। धातॄणाम्। एवं ज्ञात्रादयः।

---

**१३४.** असर्वनामस्थानयजादिस्वादिपरः अङ्गावयवः यः अन्, तस्य अनः अकारस्य विकल्पेन लोपः भवति ङिपरे, शीपरे च। अत्र 'जश्शसोः' इति शि न ग्राह्यम्, तस्मिन् परे भत्वाभावात्, तस्य 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञकत्वात्।

**दध्नि, दधनि** – दधि इति प्रातिपदिकात् सप्तम्येकवचने ङिविभक्तौ अनुबन्धलोपे 'यचिभम्' इति भसंज्ञायाम् ''अस्थिदधि सक्थ्य-क्ष्णामनङुदात्तः'' इत्यनेन सूत्रेण अनङादेशेऽनुबन्धलोपे च कृते दधन् + इ इति जाते ''अल्लोपोऽनः'' इत्यनेन नित्ये अल्लोपे प्राप्ते तत्प्रबाध्य ''विभाषा ङिश्योः'' इति सूत्रेण विकल्पेन अल्लोपे दध्न् + इ = दध्नि इति रूपम्। अल्लोपाभावपक्षे तु दधनि इति। सु शोभना धीः यस्य इति विग्रहे सुधी शब्दस्य नपुंसके ''ह्रस्वो नपुंसके प्रातिपदिकस्य'' इति ह्रस्वत्वे सुधि इति। अस्मात् सौ ''स्वमोर्नपुसंकात्'' इति सोः लुकि सुधि। सम्बोधने तु हे सुधे, हे सुधि इति वारिवत् हे वारे, हे वारि इति।

**१३५.** भाषितपुंस्कम् – यः शब्दः यम् अर्थं निमित्तीकृत्य नपुंसकलिङ्गे (स्त्रियां वा) प्रवृत्तः भवति, तम् एव अर्थं निमित्तीकृत्य पुँल्लिङ्गेऽपि यदि प्रवर्तेत, स भाषितपुंस्क इति उच्यते। यथा शोभना धीः यस्य सः इति अर्थे पुंसि प्रवृत्तः सुधीशब्दः, शोभना धीः यस्य तत् इत्यर्थे एव नपुंसकेऽपि (सुधिशब्दः) प्रवृत्तः। उभयत्रापि एकमेव ''शोभना धीः'' इति अर्थम् उपादाय प्रवत्तर्मानः अयं शब्दः भाषितपुंस्कः अस्ति। भाषितपुंस्कम् इगन्तं नपुंसकं विकल्पेन पुंवद्भवति टादौ अजादौ विभक्तौ इति सूत्रार्थः।

**सुधिया, सुधिना** – भाषितपुंस्कात् सुधिशब्दात् प्रातिपदिकात् तृतीयैकवचने टाप्रत्ययेऽनुबन्धलोपे ''तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य'' इत्यनेन विकल्पेन पुंवद्भावे कृते सुधी+आ इत्यवस्थायाम् ''एरनेकाचः'' इत्यादिना यणि प्राप्ते ''न भूसुधियो'' इति निषेधे कृते ''अचिश्नुधातु.'' इति इयङि सुधिया इति। पुंवद्भावस्य अभावे तु ''इकोऽचि विभक्तौ'' इति नुमागमे सुधि+न्+आ = सुधिना इति रूपं सिद्धम्। मधुशब्दस्य मधु, मधुनी, मधूनि इति। सम्बोधने तु ''न लुमताङ्गस्य'' इत्यस्य अनित्यत्वपक्षे सम्बुद्धिनिमित्तः गुणः हे मधो इति। पक्षे हे मधु इति। सुष्ठु लुनाति इति विग्रहे नपुंसकलिङ्गे सुलु, सुलुनी, सुलूनि इति। अत्र 'सुलू' शब्दस्य ''ह्रस्वो नुपंसके'' इति ह्रस्वे सुलु इति। अस्य भाषितपुंस्कत्वात् टादौ विभक्तौ विकल्पेन पुंवद्भावः, अतः ह्रस्वत्वाभावे सुलू+आ इत्यत्र ''औः सुपि'' इति यणि सुल्वा इति। पुंवत्त्वस्य अभावे तु

सुलु+आ इत्यत्र 'इकोऽचि विभक्तौ'' इति नुमि 'सुलुना' इति रूपम्। धातृशब्दस्य धातृ, धातृणी, धातॄणि इति प्रथमाद्वितीययोः। सम्बोधने तु 'न लुमता' इति निषेधस्य अनित्यत्वपक्षे सम्बुद्धिनिमित्तकः गुणः ( अर्) हे धातः। पक्षे हे धातृ इति। अस्यापि भाषितपुंस्कत्वात् पुंवत्त्वविकल्पे टादौ धात्रा इति। पक्षे तु ''इकोऽचि'' इति नुमि धातृणा। धात्रे, धातृणे। धातुः, धातृणः इत्यादि। षष्ठीबहुवचने तु नुमपेक्षया पूर्वविप्रतिषेधेन ''ह्रस्वनद्यापः'' इत्यादिना नुट् (नुमचिरतृज्वद्भावेभ्यः) ततश्च नामीति दीर्घे णत्वे धातॄणाम् इति। एवमेव ज्ञातृशब्दादयः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१३६. एच इग्घ्रस्वादेशे १/१/४८**

आदिश्यमानेषु ह्रस्वेषु मध्ये एच इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्युना इत्यादि। प्ररि। प्ररिणी। प्रीणि। प्ररिणा। एकदेशविकृतमनन्यवत्। प्राभ्याम्। प्रीणाम्। सुनु। सुनुनी। सुनूनि। सुनुनेत्यादि।

**॥ इत्यजन्तनपुंसकलिङ्गाःशब्दाः॥**

---

**१३६.** अत्र ह्रस्वाः आदिश्यन्ते तेषु एचः स्थाने इक् भवति। एचां स्वभावतः ह्रस्वत्वाभावात्। **प्रद्यु** – प्रकृष्टा द्यौः यस्य इति प्रद्योशब्दस्य नपुंसकलिङ्गे ''ह्रस्वो नपुंसके प्रातिपदिकस्य'' इत्यनेन ''एच इग्घ्रस्वादेशे'' इति नियमानुसारम् ओकारस्य ह्रस्वत्वेन उत्वे कृते प्रद्यु इति स्थितिः। ततः सोः ''स्वमोर्नपुंसकात्'' इति लुकि प्रद्यु इति। प्रद्युनी। प्रद्यूनि।

**प्ररि** – प्रकृष्टः राः धनं यस्य इति विग्रहे प्रै शब्दः। तस्य नपुंसके ह्रस्वे कृते प्ररि इति। प्ररि। प्ररिणी। प्रीणि। प्ररि+भ्याम् इत्यत्र एकदेशे विकृतेऽपि अनन्यत्वात् 'रायो हलि' इति आत्वे कृते प्राभ्याम्। प्ररि+आम् इत्यत्र 'नुमचिर.' इति पूर्वविप्रतिषेधेन नुटि नामीति दीर्घे प्रीणाम् इति रूपम्।

**सुनु** – सुशोभना नौः यस्य इति विग्रहे नपुंसके ह्रस्व उकारः सुनु इति। सुनु, सुनुनी, सुनूनि।

**॥ इत्यजन्तनपुंसकलिङ्गप्रकरणम्॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासप्रश्नाः

### अजन्तपुँल्लिङ्गे

१. निम्नलिखिताः प्रयोगाः साधु साध्याः –

राम:, रामान्, रामैः, रामाणाम्, सर्वे, सर्वस्मै, सर्वेषाम्, द्वितीयस्मै, हरीन्, हरिणा, हरौ, सखा, पत्युः, द्वौ, द्वयोः, बहुश्रेयस्यै, क्रोष्टा, क्रोष्टूनाम्, धाता, पितरः गाम्, राः।

२. सरूपाणामेकशेष एकविभक्तौ इति सूत्रार्थं लिखत।

३. स्थानिवदादेशोऽनल्विधौ इति सूत्रस्य अर्थं स्पष्टयत।

४. सर्वनामानि कानि?तानि लिखत।

५. भसंज्ञा कुत्र, कुत्र च पदसंज्ञा भवतीति विवेचयत।

६. उपधासंज्ञाविधायकं नदीसंज्ञाविधायकं च सूत्रं विलिख्य तयोः अर्थः लेख्यः।

### अजन्तस्त्रीलिङ्गे

७. अधस्तनप्रयोगाः साधनीयाः –

सर्वस्याम्, रमे, हे रमे, रमया, रमायाम्, सर्वस्याः, सर्वस्याम्, मत्याम्, तिस्रः, तिसृणाम्, हे गौरि, स्त्रियम्, श्रियाम्, क्रोष्ट्री, स्वसा, मातृॠः, नौः।

८. सर्वनाम्नः स्याड्ढ्रस्वश्च, त्रिचतुरोः स्त्रियां तिसृचतसृ, नेयङुवङ्स्थानावस्त्री इत्येतेषु कयोश्चिद् द्वयोः अर्थः लेखनीयः।

९. मतिशब्दस्य सर्वासु विभक्तिषु रूपाणि लिखत। तत्र किं वैशिष्ट्यम्?

१०. 'न षट्स्वस्रादिभ्यः' इति सूत्रार्थं सोदाहरणं स्पष्टयत।

### अजन्तनपुंसकलिङ्गे

११. ज्ञानम्, हे ज्ञान, ज्ञानानि, कतरत्, वारि, वारीणि, दध्ना, दधनि, हे मधो, प्ररि, सुनु इत्येतेषु यथेच्छं अष्टौ प्रयोगाः साधनीयाः।

१२. शि सर्वनामस्थानम्, मिदचोऽन्त्यात्परः, तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य एषु द्वयोः सूत्रयोः व्याख्या विधेया।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ हलन्तपुँल्लिङ्गप्रकरणम्

१. **हो ढः ८/२३**

हस्य ढः स्याज्झलि पदान्ते च। लिट्-लिड्। लिहौ। लिहः। लिड्भ्याम्। लिट्त्सु-लिट्सु।

२. **दादेर्धातोर्घः ८/२/३२**

उपदेशे दादेर्धातोर्हस्य घः स्याज्झलि पदान्ते च।

३. **एकाचो बशो भष् झषन्तस्य स्ध्वोः ८/२/३७**

धात्ववयवस्यैकाचो झषन्तस्य बशो भष् स्यात् सकारे ध्वे पदान्ते च। धुक्-धुग्। दुहौ। दुहः। धुग्भ्याम्।

४. **वा द्रुहमुहष्णुहष्णिहाम् ८/२/३३**

एषां हस्य वा घो झलि पदान्ते च। ध्रुक्-ध्रुग्-ध्रुट्-ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्याम्-ध्रुड्भ्याम्। ध्रुक्षु-ध्रुट्त्सु-ध्रुट्सु। एवं मुक्-मुग्-मुट्-मुड् इत्यादि।

---

१. **सूत्रार्थः** हकारस्य स्थाने ढकारादेशो भवति झलि परे तथा च पदान्ते। झलि इत्यस्य उदाहरणम्-सोढा वोढा इत्यादि।

**लिट्-लिड्** = लिह् धातोः क्विपि तस्य सर्वापहारिलोपे लिह् इत्यस्य प्रातिपदिकसंज्ञायां सुप्रत्यये अनुबन्धलोपे ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इत्यनेन सलोपे ''हो ढः'' इति हस्य ढकारे जश्त्वे ''वाऽवसाने'' इति विकल्पेन चर्त्वे 'लिट्' इति सिद्धम्। चर्त्वाभावे - लिड् इति।

**लिट्त्सु, लिट्सु** - क्विबन्तात् लिह्शब्दात् प्रातिपदिकसंज्ञायां सप्तमीबहुवचने सुप्प्रत्ययेऽनुबन्धलोपे 'हो ढः' इति हस्य ढकारे जश्त्वेन डकारे ''ड: सि धुट्'' इति धुडागमेऽनुबन्धलोपे धस्य चर्त्वेन तकारे डस्यापि चर्त्वेन टकारे 'लिट्त्सु' इति रूपम्। धुडभावपक्षे डस्य चर्त्वेन टकारे 'लिट्सु' इति।

२. दादेः धातोः घः इति पदच्छेदः। 'हो ढः' इत्यतो ह इत्यनुवर्तते।

**सरलार्थः** - झलि परे तथा च पदान्ते उपदेशे यो दकारादिः धातुः तस्य हकारस्य स्थाने घकारादेशः स्यात्।

३. अस्मिन् सूत्रे स्ध्वोर्ग्रहणात् हो ढः इतिवत् झलि इति पदं न सम्बध्यते।

**धुक्-धुग्** - दुह् प्रपूरणे धातोः कर्तरि क्विपि सर्वापहारिलोपे दुह् प्रातिपदिकत्वात् सौ हल्ङ्यादिलोपे ''दादेर्धातोर्घः'' इत्यनेन हस्य घकारे ''एकाचो बशो भष् झषन्तस्य स्ध्वोः'' इति भष्भावेन दकारस्य धकारे जश्त्वे विकल्पेन चर्त्वे ''धुक्'' इति। चर्त्वाभावे = धुग् इति।

**धुक्षु** - दुह् शब्दात् प्रातिपदिकात् सप्तम्याः बहुवचने सुपि 'स्वादिष्वसर्वनामस्थाने' इति पदसञ्ज्ञायां ''दादेर्धातोर्घः'' इत्यनेन

हस्य घकारे 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन दस्य धकारे धुघ् सु इति जाते जश्त्वे 'खरि च' इति चर्त्वेन ककारे सस्य षत्वे वर्णसम्मेलने 'धुक्षु' इति।

४. दादेर्धातोर्घः इत्यतो घ इत्यनुवर्तते। उभयत्र विभाषेयम्।

**सरलार्थः** - द्रुहादीनां चतुर्णां हकारस्य विकल्पेन घादेशो भवति झलि परे तथा च पदान्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. **धात्वादेः षः सः ६/१/६४**

स्नुक् - स्नुग् - स्नुट् - स्नुड्। स्निक् - स्निग् - स्निट् - स्निड्। विश्ववाट्, विश्ववाड्। विश्ववाहौ। विश्वावाहः। विश्ववाहम्। विश्ववाहौ।

६. **इग्यणः सम्प्रसारणम् १/१/४५**

यणः स्थाने प्रयुज्यमानो य इक् स सम्प्रसारणसञ्ज्ञः स्यात्।

७. **वाह ऊठ ६/४/१३२**

भस्य वाहः सम्प्रसारणमूठ्।

८. **सम्प्रसारणाच्च ६/१/१०८**

सम्प्रसारणादचि परे पूर्वरूपमेकादेशः। एत्येधत्यूठ्स्विति वृद्धिः। विश्वौहः इत्यादि।

---

**ध्रुक् - ध्रुग् - ध्रुट् - ध्रुड्** - द्रुह् धातोः क्विपि तस्य सर्वापहारिलोपे द्रुह् इत्यस्मात् प्रातिपदिकात् सुविभक्तौ तस्य हल्ङ्यादिलोपे ढत्वं प्रबाध्य नित्यघत्वमपि प्रबाध्य ''वा द्रुहमुह.'' इत्यनेन विकल्पेन घकारे भष्भावेन दकारस्य धकारे जश्त्वे विकल्पेन चर्त्वे ध्रुक् - ध्रुग् इति। घकाराभावपक्षे ढकारे ध्रुट् - ध्रुड्। एवं मुह् इत्यादिशब्दानामपि रूपाणि ज्ञेयानि।

५. **सरलार्थः** -धातोः आदेः षस्य स्थाने सकारो भवति। अस्य सूत्रस्य प्रवृत्त्या ष्णुह् धातोः तथा च ष्णिह् धातोः षस्य सत्वं भवति। 'निमित्तापाये नैमित्तिकस्याप्यपायः' इति न्यायेन षत्वविनाशे णकारस्यापि नकारो भवति। रूपाणां सिद्धि प्रक्रिया तु द्रुह्शब्दवदेव ज्ञेया।

६. इक् यणः सम्प्रसारणम् इतिच्छेदः। यणः इति षष्ठी इक् इति प्रथमा। सम्प्रसारणमिति सञ्ज्ञा। अतः सरलार्थः - यणः स्थाने य इक् विधीयते तस्य सम्प्रसारणसञ्ज्ञा भवति।

७. सरलार्थः - भसञ्ज्ञकस्य 'वाह्' इति वस्य स्थाने ऊठ् सम्प्रसारणं स्यात्।

८. 'एकः पूर्वपरयोः' इत्यधिकारे वर्तते सूत्रमिदम्। 'इको यणचि' इत्यतो अचि इति तथा च 'अमिपूर्वः' इत्यतः पूर्व इति अनुवर्तते।

**सूत्रार्थः** - सम्प्रसारणात् अचि परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशः स्यात्।

**विश्वौहः** - विश्वं वाहयति इति विग्रहे णिजन्ताद वाहि धातोः विचि तस्य सर्वापहारिलोपे णिलोपे विश्ववाह् शब्दस्य प्रातिपदिकसंज्ञायां शसि अनुबन्धलोपे भसञ्ज्ञायां 'इग्यणः सम्प्रसारणम्' इति सम्प्रसारणसञ्ज्ञायां 'वाह ऊठ्' इति वकारस्य सम्प्रसारणमूठि 'सम्प्रसारणाच्च' इति पूर्वरूपे 'एत्येधत्यूठ्सु' इति वृद्धौ सस्य रुत्वे विसर्गे च कृते 'विश्वौहः' इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९. **चतुरनडुहोरामुदात्तः ७/१/९८**
अनयोराम् स्यात् सर्वनामस्थाने परे।

१०. **सावनडुहः ७/१/८२**
अस्य नुम् स्यात् सौ परे। अनड्वान्।

११. **अम् सम्बुद्धौ ७/१/९९**
हे अनड्वन्। हे अनड्वाहौ। हे अनड्वाहः। अनुडुहः। अनडुहा।

१२. **वसुस्रंसुध्वंस्वनडुहां दः ८/२/७२**
सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात् पदान्ते। अनडुद्भ्यामित्यादि। सान्तेति किम् ?विद्वान्। पदान्ते किम् ? स्रस्तम्। ध्वस्तम्

-------------------------------------------------------------------

९. **सरलार्थः** – सर्वनामस्थाने परे चतुर् शब्दस्य अनडुह् शब्दस्य च आमागमः स्यात्, स आगमः उदात्तश्च भवति।

१०. ''आच्छीनद्योर्नुम्'' इत्यतः नुम् इत्यनुवर्तते नुमि मकार इत् उकार उच्चारणार्थः। मित्वादन्त्यादचः परो भवति। तदाह सूत्रस्य अर्थः – अनडुह् शब्दस्य नुमागमो भवति सु प्रत्यये परे। **अनड्वान्** – अनडुह् शब्दात् प्रातिपदिकात् सौ सर्वनामस्थानसंज्ञायां 'चतुरनडुहोरामुदात्तः' इति आमागमे यणि 'सावनडुहः' इति नुमि दीर्घे सकारस्य हल्ङ्यादिलोपे हस्य संयोगान्तलोपे 'अनड्वान्' इति।

**विशेषः** – संयोगान्तहकारलोपस्य असिद्धत्वात् नलोपो न भवति नुम्विधानात् 'वसुस्रंसु ....' इति दत्वमपि न भवति।

११. **सरलार्थः** – सम्बोधनस्य एकवचने परे अनुडुह्शब्दस्य अमागमो भवति।

**हे अनड्वन्** – अनडुह्शब्दात् प्रातिपदिकात् सम्बोधने सु प्रत्यये 'चतुरनडुहोरामुदात्तः' इति आमं प्रबाध्य 'अम् सम्बुद्धौ' इति अमागमे मित्वादन्त्यादचः परे कृते अनडुअह् स् इति जाते यणि नुमि सुलोपे संयोगान्तलोपे च कृते 'हे अनड्वन्' इति।

१२. वसुः प्रत्ययः तेन तदन्तग्रहणम्। स्रुंसुध्वंसु च धातू स्तः। स्रंस्ध्वंसोः साहचर्यात् वसुप्रत्ययान्तोऽपि सान्तमेव गृह्यते।

**अतः सूत्रार्थः** – सान्तवसुप्रत्ययान्तस्य स्रंसुशब्दस्य ध्वंसु शब्दस्य तथा च अनडुह् शब्दस्य दकारः स्यात् पदान्ते। ''अलोऽन्त्यस्य'' इति अन्त्यस्य स्थाने एव भवति।

**अनडुद्भ्याम्** – अनडुह् शब्दात् भ्यामि 'स्वादिष्वसर्वनामस्थाने इति पदसञ्ज्ञायां 'वसुस्रंसुध्वंस्वनडुहां दः' इति हकारस्य दकारे 'अनडुद्भ्याम्'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१३. **सहेः साडः सः ८/३/५६**

साड्रूपस्य सहेः सस्य मूर्धन्यादेशः। तुराषाट् तुराषाड्। तुरासाहौ। तुरासाहः। तुराषाड्भ्यामित्यादि।

१४. **दिव औत् ७/१/८४**

दिविति प्रातिपदिकस्यौत्स्यात्सौ। सुद्यौः। सुदिवौ।

१५. **दिव उत् ६/१/१३१**

दिवोऽन्तादेशः उकारः स्यात् पदान्ते। सुद्युभ्यामित्यादि। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः।

१६. **षट्चतुर्भ्यश्च ७/१/५५**

एभ्य आमो नुडागमः।

---

१३. **'अपदान्तस्य मूर्धन्यः'** इत्यधिकारे वर्तते सूत्रमिदम्। तदाह सूत्रार्थः साड्रूपप्राप्तस्य सह्धातोः सकारस्य स्थाने षकारःमूर्धन्यादेशो भवति।

**तुराषाट्**– तुरासाह् शब्दात् प्रातिपदिकात् सौ हल्ङ्यादिलोपे 'हो ढः' इति हस्य ढकारे तस्य जश्त्वेन डकारे 'सहेः साडः सः' इति सस्य षत्वे विकल्पेन चर्त्वे तुराषाट् – तुराषाड् इति।

१४. दिव इति षष्ठ्यन्तं। सावनडुहः इत्यतः सौ इत्यनुवर्तते। तदार्थः – दिव्
इति प्रातिपदिकस्य स्थाने औकारादेशः स्यात्। 'अलोऽन्त्यस्य' इति अन्त्यवकारस्य स्थाने भवति।

**सुद्यौः** – सुदिव् इति प्रातिपदिकात् सौ प्रत्यये 'दिव औत्' इति वकारस्य औकारादेशे सुदि औ स् इति जाते यणि सस्य रुत्वे विसर्गे च कृते 'सुद्यौः' इति सिद्धम्।

१५. दिव इति षष्ठ्यन्तं पदम्। अन्तादेशः इति अलोन्त्यसूत्रलभ्यम् अनुवृत्तं पदान्तपदं सप्तम्या विपरिणम्यते। तदाह अस्य सरलार्थः – दिवः वकारस्य स्थाने उकारादेशो भवति पदान्ते।

**सुद्युभ्याम्** – सुदिव् शब्दात् भ्यामि पदसंज्ञायां 'दिव उत्' इति वकारस्य उकारे यणि 'सुद्युभ्याम्' इति।

**चत्वारः** – चतुर् शब्दात् प्रथमाबहुवचने जसि अनुबन्धलोपे

'चतुरनडुहोरामुदात्तः' इति आमागमे अनुबन्धलोपे चतु आ र् अस् इति जाते यणि सस्य रुत्वे विसर्गे 'चत्वारः'।

१६. **सूत्रार्थः** – षट्सञ्ज्ञकेभ्यः तथा च चतुर्शब्दात् परो यः आम्प्रत्ययः तस्य नुडागमो भवति। नुटि टकार इत्, उकारः उच्चारणार्थः, टित्वादादौ भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१७. **रषाभ्यां नो णः समानपदे ८/४/१**

१८. **अचो रहाभ्यां द्वे ८/४/४६**

अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः। चतुर्ण्णाम्- चतुर्णाम्।

१९. **रोः सुपि ८/३/१६**

रोरेव विसर्गः सुपि। षत्वम्। षस्य द्वित्वे प्राप्ते।

२०. **शरोऽचि ८/४/४९**

अचि परे शरो न द्वे स्तः। चतुर्षु।

२१. **मो नो धातोः ८/२/६४**

धातोर्मस्य नः पदान्ते। प्रशान्।

---

१७. **सूत्रार्थः** – रेफषकाराभ्यां परस्य नकारस्य स्थाने णकार स्यात् एकपदे।

१८. 'यरोऽनुनासिकेऽनुनासिको वा' इत्यतः यर इति षष्ठ्यन्तं तथा च वा इति अनुवर्तते। अचः इति दिग्योगे पञ्चमी, रहाभ्याम् इत्यपि पञ्चमी। सूत्रार्थस्तु स्पष्टः एव।

**चतुर्ण्णाम्** – चतुर् शब्दात् प्रातिपदिकात् आमि 'षट्चतुर्भ्यश्च' इति नुडागमे अनुबन्धलोपे 'रषाभ्यां नो णः समानपदे' इति नस्य णत्वे 'अचो रहाभ्यां द्वे' इति विकल्पेन णकारस्य द्वित्वे 'चतुर्ण्णाम्'। चतुर्णाम् इति।

१९. इदं नियमसूत्रम्। अस्यार्थः सप्तमीबहुवचने सुपि परे रोः रेफस्य एव विसर्गः अन्यरेफस्य स्थाने विसर्गो न भवति। यथा चतुर्षु इत्यत्र रेफस्य विसर्गो न भवति, रोः रेफाभावात्। (रुत्वसम्बन्धिरेफाभावात्)।

२०. 'अचो रहाभ्यां द्वे' इत्यतो द्वे इति, 'नादिन्याक्रोशे पुत्रस्य' इत्यतो न इति चानुवर्तते। तथा सूत्रार्थो भवति – अचि परे शरो द्वित्वं न भवति। यथा चतुर्षु इति षस्य न द्वित्वम्। **चतुर्षु** – चतुर् शब्दात् सप्तम्याः बहुवचने सुपि अनुबन्धलोपे रेफस्य विसर्गे प्राप्ते 'रोः सुपि' इति निषेधे 'आदेश प्रत्यययोः' इति षत्वे 'अचो रहाभ्यां द्वे इति षस्य द्वित्वे प्राप्ते 'शरोऽचि' इत्यनेन निषेधे 'चतुर्षु' इति।

२१. मः इति षष्ठ्यन्तं धातोः विशेषणम्। तदन्तविधिः। 'पदस्य' इत्यधिकारे वर्तते। 'स्कोः संयोगाद्योरन्ते च' इति अन्ते च इत्यनुवर्तते।

**सूत्रार्थः** – मान्तस्य धातोः नकारादेशः स्यात् पदान्ते। 'अलोऽन्त्यस्य' इति मकारस्य भवति।

**प्रशान्** – प्रशाम्यति इति विग्रहे क्विपि सर्वापहारिलोपे उपधादीर्घे प्रशाम् शब्दात् प्रातिपदिकत्वात् सौ हल्ङ्यादिलोपे 'मो नो धातोः' इति मकारस्य नकारे प्रशान् इति सिद्धम्। अत्र नकारस्य असिद्धत्वात् नलोपो न भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२२. **किमः कः** ७/२/१०३

किमः कः स्याद्विभक्तौ। कः। कौ। के इत्यादि। शेषं सर्ववत्।

२३. **इदमो मः** ७/२/१०८

सौ। त्यदाद्यत्वापवादः।

२४. **इदोऽय् पुंसि** ७/२/११

इदम इदोऽय् सौ पुंसि। अयम्। त्यदाद्यत्वे।

२५. **अतो गुणे** ६/१/४७

अपदान्तादतो गुणे पररूपमेकादेशः।

२६. **दश्च** ७/२/१०९

इदमो दस्य मः स्याद्विभक्तौ। इमौ। इमे। त्यदादेः सम्बोधनं नास्तीत्युत्सर्गः।

-----------------------------------------------------------------------

२२. 'अष्टन आ विभक्तौ' इत्यतो विभक्तौ इत्यनुवर्तते। **सूत्रार्थः** – किम् शब्दस्य स्थाने कादेशो भवति विभक्तौ। अनेकाल्त्वात् सर्वादेशः। **कः** – किम् शब्दात् प्रातिपदिकात् सौ अनेकाल्त्वात् 'किमः कः' इत्यनेन किमः स्थाने कादेशे सस्य रुत्वे विसर्गे च कृते सिद्ध्यति।

२३. **सूत्रार्थः** – इदम् शब्दस्य मकारस्य स्थाने म् स्यात् सुपरे। इदं सूत्रं 'त्यदादीनामः' इत्यस्यापवादः।

२४. इदः इति स्थानषष्ठी एषा अवयवषष्ठी अपि। 'यः सौ' इत्यतः सौ इत्यनुवर्तते।

**सूत्रार्थः** – पुल्लिङ्गे इदम् शब्दस्य अवयवो य इद् तस्य स्थाने अय् आदेशः स्यात् सुपरे।

**अयम्** – इदम् इत्यस्मात् प्रातिपदिकात् सौ अनुबन्धलोपे 'त्यदादीनामः' इति सूत्रं प्रबाध्य 'इदमो मः' इति मस्य मकारे 'इदोऽय् पुंसि' इत्यनेन इद्भागस्य अयादेशे हल्ङ्यादिलोपे 'अयम्' इति।

२५. 'एङि पररूपम्' इत्यतः पररूपम् इत्यनुवर्तते। 'उस्य पदान्तात्' इत्यतः अपदान्तात् इति च। 'एकः पूर्वपरयोः' इत्यस्याधिकारे वर्तते। अत इति

पञ्चमी। **सूत्रार्थः** – अपदान्तात् अकारात् गुणे (अ ए ओ) परे पूर्वपरयोः स्थाने पररूपमेकादेशः स्यात्।

२६. इदमो मः इत्यनुवर्तते।

**सूत्रार्थः** – इदम् शब्दस्य दकारस्य स्थाने मादेशो भवति विभक्तौ परे।

**इमौ** – इदम् शब्दात् प्रातिपदिकात् औ विभक्तौ 'त्यदादीनामः' इति मकारस्य अकारे इद अ औ इति जाते 'अतो गुणे' इति पररूपे 'दश्च' इत्यनेन दकारस्य मकारादेशे वृद्धौ 'इमौ' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२७. **अनाप्यकः ७/२/११२**

अककारस्येदम इदोऽनापि विभक्तौ। आबिति प्रत्याहारः। अनेन।

२८. **हलि लोपः ७/२/११३**

अककारस्येदम इदो लोप आपि हलादौ।

**( नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे। )**

२९. **आद्यन्तवदेकस्मिन् १/१/२१**

एकस्मिन् क्रियमाणं कार्यमादाविवान्त इव स्यात्। सुपि चेति दीर्घः। आभ्याम्।

३०. **नेदमदसोरकोः ७/१/११**

अककारयोरिदमदसोर्भिस ऐस् न। एभिः। अस्मै। एभ्यः। अस्मात्। अस्य। अनयोः। एषाम्। अस्मिन्। अनयोः। एषु।

---

२७. अन् आपि अकः इतिच्छेदः। 'इदमो म' इत्यत इदम इति, 'इदोऽय् पुंसि' इत्यतः इद इति, 'अष्टन आ विभक्तौ' इत्यतो विभक्तौ चानुवर्तते। आप् इत्यनेन टादिविभक्तिः।

**सूत्रार्थः** – ककाररहितस्य इदम् शब्दस्य इद् भागस्य स्थाने अनादेशः स्याद् टादिविभक्तौ परतः।

**अनेन** – इदम् शब्दात् तृतीयैकवचने टाप्रत्यये अनुबन्धलोपे अत्वे पररूपे इद आ इति जाते 'अनाप्यकः' इति इद्भागस्य अनादेशे टा स्थाने इनादेशे गुणे 'अनेन' इति।

२८. **सूत्रार्थः**–ककाररहितस्य इदमः इद् भागस्य लोपो तृतीयादौ हलादौ विभक्तौ परतः।

**वार्तिकार्थः** – अभ्यासविकारं विहाय अनर्थके 'अलोऽन्त्यस्य' इति सूत्रस्य प्रवृत्तिर्न भवति। अत एव इद्अभ्याम् इति स्थिते अन्त्यदकारस्य लोपो न भवति अपितु सम्पूर्णस्य इद्भागस्य लोपो भवति।

२९. अस्मिन् सूत्रे एकशब्दः असहायवाची। तदा

**सूत्रार्थः** – तदादितदन्तयोः विधीयमानं कार्यं तदादौ तदन्त इव असहायेऽपि भवति। यथा अ+भ्याम् इत्यत्र 'सुपि च' इति सूत्रेण अकारे एकस्मिन्नपि वर्णे अकारान्तबुद्धौ दीर्घः।

**आभ्याम्** – इदम् शब्दात् प्रातिपदिकात् भ्यामि मस्य त्यदाद्यत्वे पररूपत्वे च इदभ्याम् इति जाते 'नानर्थकेऽलोन्त्यविधिरनभ्यासविकारे' इति वार्तिकसाहाय्येन 'अलोऽन्त्यस्य' इति सूत्रस्य अप्रवृत्त्या 'हलि लोपः' इति इद् भागस्य लोपे 'आद्यन्तवदेकस्मिन्' इति अन्तवद्भावेन अदन्तं मत्वा'सुपि च' इति दीर्घे 'आभ्याम्' इति।

३०. **सूत्रार्थः** – ककाररहिताद् इदं शब्दात् अदस् शब्दाच्च परे भिसः स्थाने ऐसादेशो न स्यात्।

**एभिः** – इदम् शब्दात् प्रातिपदिकात् भिसि त्यदाद्यत्वे पररूपत्वे 'अतो भिसऐस्' इत्यनेन भिस् स्थाने ऐसादेशे प्राप्ते 'नेदमदसोरकोः' इति सूत्रेण निषेधे 'बहुवचने झल्येत्' इत्यनेन अकारस्य एत्वे सस्य रुत्वे विसर्गे 'एभिः'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**३१. द्वितीया टौस्स्वेनः २/४/३४**

इदमेतदोरेनादेशः स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथा – अनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति। एनम्। एनौ। एनान्। एनेन। एनयोः। राजा।

**३२. न ङिसम्बुद्ध्योः ८/२/८**

नस्य लोपो न ङौ सम्बुद्धौ च। हे राजन्। (ङावुत्तरपदे प्रतिषेधो वक्तव्यः) ब्रह्मनिष्ठः। राजानौ। राजानः। राज्ञः।

**३३. नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति ८/२/२**

सुब्विधौ स्वरविधौ सञ्ज्ञाविधौ कृति तुग्विधौ च नलोपोऽसिद्धो नान्यत्र – राजा श्व इत्यादौ। इत्यसिद्धत्वादात्वमेत्वमैस्त्वं च न। राजभ्याम्। राजभिः। राज्ञि–राजनि। राजसु। यज्वा। यज्वानौ। यज्वानः।

---

३१. द्वितीया च टा च ओस् च इति द्वितीयाटौसः, तेषु इति द्वन्द्वसमासः।

**सरलार्थः** – द्वितीया विभक्तौ परे टा परे ओसि च परे इदम् शब्दस्य तथा च एतद् शब्दस्य स्थाने एन आदेशो भवति अन्वादेशे। अन्वादेशस्य सोदाहरणं परिभाषा – उक्तोदाहरणे व्याकरणम् अध्ययनरूपं कार्यं वर्तते तस्य विधातुं 'इदम्' (अनेन) शब्दो गृहीतः। पुनः छन्दः अध्ययनरूपं कार्यान्तरं विधातुं अपि इदम् (एनम्) शब्दः कथितः। अतः पुनः कथनमेव अन्वादेशः। एवं द्वितीये उदाहरणेऽपि बोध्यम्।

३२. सूत्रार्थस्तु स्पष्ट एव। 'नलोपः प्रातिपदिकान्तस्य' इत्यस्य निषेधकं सूत्रमिदम्। हे राजन् – राजन् शब्दात् सम्बोधने सौ हल्ङ्यादिलोपे 'नलोपः'

प्रातिपदिकान्तस्य इति नलोपे प्राप्ते 'न ङिसम्बुद्ध्योः' इत्यनेन निषेधे 'हे राजन्'।

**वार्तिकार्थः** – उत्तरपदपरके ङि परे तु नलोपनिषेधस्यापि प्रतिषेधो भवति अर्थात् नलोपो भवति एव। यथा ब्रह्मन्+ङि निष्ठा+सु इत्यत्र समासे विभक्तिलोपे प्रत्ययलक्षणमाश्रित्य ङि परे नलोपः प्राप्नोति तस्य 'न ङि सम्बुद्ध्योः' इत्यनेन निषेधोऽपि प्राप्नोति परमनेन वार्तिकेन निषेधस्यापि प्रतिषेध अतः 'नलोपः प्राति.' इत्यनेन नलोपो भवत्येव।

**राज्ञः** – राजन् शब्दात् शसि अनुबन्धलोपे भसंज्ञायां 'अल्लोपोऽनः' इति अकारलोपे श्चुत्वेन नकारस्य ञकारे वर्णसम्मेलने सस्य रुत्वे विसर्गे च 'राज्ञः' इति।

३३. इदं नियमसूत्रम्। ''पूर्वत्रासिद्धम्'' इत्येव सिद्धे नियमयति उक्तविधिषु एव नलोपः असिद्धः, अन्यत्र तु न। यथा नलोपस्य असिद्धत्वात् राज + भ्याम् इत्यत्र 'सुपि च' इति दीर्घः, राज + भिस् इत्यत्र भिसः स्थाने ऐस्, राज + भ्यस् इत्यत्र च 'बहुवचने झल्येत्' इति एत्वं च न भवति। राजाश्वः इत्यादौ तु सवर्णदीर्घः भवत्येव।

**राजभ्याम्** = राजन् शब्दात् भ्यामि 'स्वादिष्वसर्वनामस्थाने' इति पदसञ्ज्ञायां नलोपे 'सुपि च' इति दीर्घे प्राप्ते 'नलोपः सुप्स्वरसञ्ज्ञातुग्विधिषु कृति' इत्यनेन नलोपस्य असिद्धत्वात् दीर्घाभावे 'राजभ्याम्' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३४. **न संयोगाद्वमन्तात् ६/४/१३७**
वमन्तसंयोगादनोऽकारस्य लोपो न। यज्वनः। यज्वना। यज्वभ्याम्। ब्रह्मणः। ब्रह्मणा।

३५. **इन्हन्पूषार्यम्णां शौ ६/४/१२**
एषां शावेवोपधाया दीर्घो नान्यत्र। इति निषेधे प्राप्ते।

३६. **सौ च ६/४/१३**
इन्नादीनामुपधाया दीर्घोऽसम्बुद्धौ सौ।

३७. **एकाजुत्तरपदे णः ८/४/१२**
एकाजुत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थान्निमितात् परस्य प्रातिपदिकान्तनुम्विभक्तिस्थस्य नस्य णः। वृत्रहणौ।

३८. **हो हन्तेर्ञ्णिन्नेषु ७/३/५४**
ञिति णिति च प्रत्यये नकारे च परे हन्तेर्हकारस्य कुत्वम्। वृत्रघ्नः इत्यादि।

---

३४. व श्च मश्च इति वमौ तौ अन्तौ यस्य इति विग्रहः। 'अल्लोपोऽनः'' इति अनुवर्तते। **सूत्रार्थः** – वकारान्तसंयोगात् तथा च मकारान्तसंयोगात् परस्य अनः यः अकारः तस्य लोपो न भवति। **यज्वनः** – यज्वन् शब्दात् शसि अनुबन्धलोपे भसञ्ज्ञायाम् 'अल्लोपोऽनः'इति अलोपे प्राप्ते 'न संयोगाद्वमन्तात्' इत्यनेन अलोपनिषेधे सस्य रुत्वे विसर्गे च 'यज्वनः'।

३५. इदं नियमसूत्रम्। **सूत्रार्थः** – इन् हन् पूषन् अर्यमन् इत्यन्तानाम् उपधाया दीर्घो भवति शि परे एव। अतो वृत्रहन्+स् इत्यत्र शेः अभावात् उपधादीर्घस्य निषेधः प्राप्नोति।

३६. **सूत्रार्थः** – सम्बुद्धिभिन्ने सुपरे इन्हनाद्यन्तानाम् उपधाया दीर्घो भवति। 'इन्हन्...' इत्यस्य अपवादोऽस्ति सूत्रमिदम्।

**वृत्रहा** – वृत्रं हतवान् इति विग्रहे क्विपि सर्वापहारिलोपे समासकार्ये वृत्रहन् शब्दस्य प्रातिपदिकसंज्ञायां सौ अनुबन्धलोपे 'इन्हन्पूषार्यम्णां शौ' इति नियमं प्रबाध्य 'सौ च' इत्यनेन उपधादीर्घे हल्ङ्यादिलोपे नलोपे च कृते 'वृत्रहा' इति।

३७. णत्वविधायकम् इदं सूत्रम्। अत्र 'रषाभ्यां नो णः इति 'पूर्वपदात्सञ्ज्ञायामगः' इत्यतः पूर्वपदात् इति च 'प्रातिपदिकान्तनुमविभक्तिषु च' इति चानुवर्तते। वृत्रहन् औ इत्यवस्थायाम् अनेन सूत्रेण नकारस्य स्थाने णकारो भवति।

३८. सूत्रार्थस्तु स्पष्ट एव। 'चजोः कु घिण्यतोः' इत्यतः कु इत्यनुवर्तते।

**वृत्रघ्नः** – वृत्रहन् शब्दात् प्रातिपदिकात् शसि भसञ्ज्ञायां 'अल्लोपोऽनः' इति अलोपे 'हो हन्तेर्ञ्णिन्नेषु' इति हस्य कुत्वेन घकारे सस्य रुत्वे विसर्गे च 'वृत्रघ्नः'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३९. **मघवा बहुलम् ६/४/१२८**

मघवन् शब्दस्य वा तृ इत्यन्तादेशः। ऋ इत्।

४०. **उगिदचां सर्वनामस्थानेऽधातोः ७/१/७०**

अधातोरुगितो नलोपिनोऽञ्चतेश्च नुम् स्यात् सर्वनामस्थाने परे। मघवान्। मघवन्तौ। मघवन्तः। हे मघवन्। मघवद्भ्याम्। तृत्वाभावे मघवा सुटि राजवत्।

४१. **श्वयुवमघोनामतद्धिते ६/४/१३३**

अन्नन्तानां भानामेषामतद्धिते सम्प्रसारणम्। मघोनः। मघवभ्याम्। एवं श्वन् युवन्।

४२. **न सम्प्रसारणे सम्प्रसारणम् ६/१/३७**

सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात्। इति यकारस्य नेत्वम्। अत एव ज्ञापकादन्त्यस्य यणः पूर्वं सम्प्रसारणम्। यूनः। यूना। युवभ्यामित्यादि। अर्वा। हे अर्वन्।

---

३९. 'अर्वणस्त्रसावनञः' इत्यतः तृ इत्यनुवर्तते, मघवा इति षष्ठ्यर्थे प्रथमा।

**सूत्रार्थः** – मघवन् शब्दस्य स्थाने विकल्पेन तृ इत्यन्तादेशः स्यात्। ऋकारस्य इत्संज्ञायाम् अनेकाल्त्वाभावात् सर्वादेशत्वं न भवति।

४०. 'इदितो नुम् धातोः' इत्यतो नुम् इत्यनुवर्तते। नुमविधायकं सूत्रमिदम्। नुम् तु मित्त्वाद् अन्त्यादचः परे एव भवति।

**मघवान्** – मघवन् शब्दात् सौ 'मघवा बहुलम्' इति तृ अन्तादेशे अनुबन्धलोपे मघवत् स् इति जाते 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमि अनुबन्धलोपे हल्ङ्यादिलोपे संयोगान्तलोपे उपधादीर्घे मघवान् इति सिद्धम्। अत्र संयोगान्तलोपस्य असिद्धत्वात् नलोपो न भवति। बहुलग्रहणात् उपधादीर्घः तु भवति। तृत्वाभावे तु मघवा इति रूपम्।

४१. 'भस्य' इत्यधिकृतम्। 'अल्लोपोऽनः' इत्यतः अनः इत्यपकृष्यते 'वसोः सम्प्रसारणम्' इत्यतः सम्प्रसारणम् इत्यनुवर्तते। श्वशब्दे युवशब्दे तथा च मघवत्शब्दे ''इग्यणः सम्प्रसारणम्'' इति वकारस्य उकारः सम्प्रसारणं भवति भसंज्ञायां अतद्धिते प्रत्यये।

**मघोनः** – मघवन् शब्दात् तृत्वाभावे शसि अनुबन्धलोपे भसंज्ञायां 'श्वयुवमघोनामतद्धिते' इति वकारस्य सम्प्रसारणमुकारे मघ उ अन् अस् इति जाते पररूपे गुणे सस्य रुत्वे विसर्गे च मघोनः। तृत्वपक्षे तु मघवतः इति।

४२. सम्प्रसारणे परे पूर्वस्य यणः स्थाने सम्प्रसारणं न भवति। अस्मात् निषेधात् एव युवन् शब्दस्य यकारस्य न सम्प्रसारणम् इकारः। अस्मात् ज्ञापकसामर्थ्यात् यणद्वये सति परस्य यणः स्थाने एव पूर्वं सम्प्रसारणं भवति।

**यूनः** – युवन् शब्दस्य प्रातिपदिकसञ्ज्ञायां शसि भसञ्ज्ञायां 'श्वयुवमघोनामतद्धिते' इत्यनेन वकारस्य सम्प्रसारणे उकारे यु उ अन् अस् इति जाते 'सम्प्रसारणाच्च' इति पूर्वरूपे सवर्णदीर्घे यून् अस् इत्यवस्थायाम् उक्तसूत्रेणैव सम्प्रसारणे प्राप्ते 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधे सस्य रुत्वे विसर्गे च कृते सिद्ध्यति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४३. **अर्वणस्त्रसावनञः ६/४/१२७**
नञा रहितस्यार्वन्नित्यस्याङ्गस्य तृ इत्यन्तादेशो न तु सौ। अर्वन्तौ। अर्वन्तः। अर्वद्भ्यामित्यादि।

४४. **पथिमथ्यृभुक्षामात् ७/१/८५**
एषामाकारोऽन्तादेशः स्यात् सौ परे।

४५. **इतोऽत्सर्वनामस्थाने ७/१/८६**
पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।

४६. **थो न्थः ७/१/८७**
पथिमथोस्थस्य न्थादेशः सर्वनामस्थाने। पन्थाः। पन्थानौ। पन्थानः।

४७. **भस्य टेर्लोपः ७/१/८८**
भस्य पथ्यादेष्टेर्लोपः। पथः। पथा। पथिभ्याम्। एवं मथिन् ऋभुक्षिन्।

---

४३. **सूत्रार्थः** – सुभिन्ने प्रत्यये परे अर्वन् शब्दस्य तृ अन्तादेशः भवति, नञ् युक्तस्य अनर्वन् इत्यस्य तु न भवति।

**अर्वन्तौ** – अर्वन् प्रातिपदिकात् औ विभक्तौ 'अर्वणस्त्रसावनञः' इत्यनेन नकारस्य तृ आदेशे अनुबन्धलोपे उगिदचां सर्वनामस्थानेऽधातोः इत्यनेन नुमि अनुबन्धलोपे अनुस्वारे परसवर्णे अर्वन्तौ इति।

४४. **सूत्रार्थः** – पथिन्शब्दस्य मथिन्शब्दस्य ऋभुक्षिन्शब्दस्य आकार अन्तादेशो भवति। अर्थात् उक्तानां सर्वेषां शब्दानां नकारस्य आ आदेशो भवति।

४५. 'पथिमथ्यृभुक्षामात्' इत्यतः आत् विहाय सर्वमनुवर्तते। तदार्थः – पथिन्शब्दस्य मथिन्शब्दस्य ऋभुक्षिन्शब्दस्य च यः इकारः तस्य स्थाने अकारादेशो भवति सर्वनामस्थाने परे।

४६. थः न्थः इतिच्छेदः। थः इति स्थानषष्ठी। पूर्वसूत्रात् सर्वनामस्थाने इत्यनुवर्तते। ऋभुक्षिशब्दे थकाराभावात् न तस्य ग्रहणम्। अतः सूत्रस्य

**अयमर्थः**–पथिन्शब्दस्य मथिन्शब्दस्य यः थकारः तस्य स्थाने न्थ आदेशो भवति।

**पन्थाः** – पथिन् शब्दात् प्रातिपदिकात् सौ 'पथिमथ्यृभुक्षामात्' इत्यनेन नकारस्य आत्वे 'इतोऽत्सर्वनामस्थाने' इति इकारस्य अकारे 'थोन्थः' इति सूत्रेण थकारस्य न्थादेशे पन्थ आ स् इति जाते सवर्णदीर्घे सस्य रुत्वे विसर्गे च रूपं सिद्धम्।

४७. 'पथिमथ्यृभुक्षाम्' इत्यनुवर्तते

**सूत्रार्थः** – भसञ्ज्ञकस्य पथिशब्दस्य मथिशब्दस्य ऋभुक्षिशब्दस्य च टिलोपो भवति।

**पथः** – पथिन् शब्दात् शसि अनुबन्धलोपे भसञ्ज्ञायां 'भस्य टेर्लोपः' इति सूत्रेण इनो लोपे पथ् अस् इति जाते सस्य रुत्वे विसर्गे च 'पथः'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४८. **ष्णान्ता षट् १/१/२४**

षान्ता नान्ता च सङ्ख्या षट्सञ्ज्ञा स्यात्। पञ्चन् शब्दो नित्यं बहुवचनान्तः। पञ्च। पञ्च। पञ्चभिः। पञ्चभ्यः। पञ्चभ्यः। नुट्।

४९. **नोपधायाः ६/४/७**

नान्तस्योपधाया दीर्घो नामि। पञ्चानाम्। पञ्चसु।

५०. **अष्टन आ विभक्तौ ७/२/८४**

हलादौ वा स्यात्।

५१. **अष्टाभ्य औश् ७/१/२१**

कृताकारादष्टनो जश्शसोरौश्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। अष्टौ। अष्टौ। अष्टाभिः। अष्टानाम्। अष्टासु।

५२. **ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च ३/२/५९**

एभ्यः क्विन्। अञ्चेः सुप्युपपदेः, युजिक्रुञ्चोः केवलयोः क्रुञ्चेर्नलोपाभावश्च निपात्यते। कनावितौ।

---

४८. 'बहुगणवतु इति सङ्ख्या' 'इत्यतः संख्या इत्यनुवर्तते।

**अर्थः** – षकारान्ता तथा च नकारान्ता संख्या षट्सञ्ज्ञा भवति।

**पञ्च** – पञ्चन् शब्दात् प्रातिपदिकात् जसि शसि च विभक्तौ। 'ष्णान्ताषट्' इति षट्सञ्ज्ञायां 'षड्भ्यो लुक्' इत्यनेन जश्शसोः लोपे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे 'पञ्च' इति।

४९. सूत्रार्थः स्पष्टः। **पञ्चानाम्** – पञ्चन् शब्दात् षष्ठीबहुवचने आमि 'ष्णान्ताः षट्' इत्यनेन षट्संज्ञायां 'षट्चतुर्भ्यश्च' इति नुटि अनुबन्धलोपे 'नोपधायाः' इति उपधादीर्घे 'नलोपः प्रातिपदिकान्तस्य' इति नलोपे 'पञ्चानाम्' इति।

५०. 'रायो हलि' इत्यतः हलि इत्यपकृष्यते। **सूत्रार्थः** – अष्टन आत्वं वा स्याद् हलादौ विभक्तौ।

५१. **'जश्शसोः शि'** इत्यतो जश्शसोः इत्यनुवर्तते।

**सूत्रार्थः** – नकारस्य आत्वे कृते सति यः अष्टाशब्दः तस्मात् परयोः जश्शसोः स्थाने औश् आदेशः स्यात्। ननु अष्टशब्दस्य भ्यसि अष्टभ्य अष्टाभ्य इति रूपद्वये सत्यपि सूत्रे लाघवात् अष्टभ्य इति निर्देशः उचितः तथापि आकारनिर्देशात् विज्ञायते जश्शस्सम्बन्धिनि अचि परेऽपि आत्वं भवति।

**अष्टौ** – अष्टन् शब्दात् प्रातिपदिकात् जसि शसि च विभक्तौ 'अष्टन् आ विभक्तौ' इति नकारस्य आत्वे सवर्णदीर्घे अष्टा अस् इति जाते 'अष्टाभ्य औश्' इति जश्शसोः स्थाने औशि शित्वात् सर्वादेशे वृद्धौ 'अष्टौ' इति। आत्वाभावे तु अष्ट इति पञ्चवद्रूपम्।

५२. 'स्पृशोऽनुदके क्विन्' इत्यतः क्विन् इत्यनुवर्तते। **सूत्रार्थः** ऋतौ उपपदे यज्धातोः, धृष्-धातोः, सृज्धातोः दिश्धातोः उत्पूर्वकात् ष्णिह्धातोः अञ्चुधातोः केवलात् युज्धातोः तथा च क्रुञ्च्धातोः क्विन् प्रत्ययः स्यात्। सूत्रतः प्रत्यक्षम् अनुपदिष्टं कार्यं निपातनाद् बोध्यम्। सिद्धप्रक्रियस्य निर्देशो निपातनम् भवति। क्रुञ्च्धातोः क्विन्प्रत्यये कित्वात् नलोपः प्राप्नोति निपातनात् नलोपो न भवति। एवमन्योदाहरणेषु अपि ज्ञेयम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५३. **कृदतिङ् ३/१/९३**

अत्र धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्सञ्ज्ञः स्यात्।

५४. **वेरपृक्तस्य ६/१/६७**

अपृक्तस्य वस्य लोपः।

५५. **क्विन्प्रत्ययस्य कुः ८/२/६२**

क्विन्प्रत्ययो यस्मात् तस्य कवर्गोऽन्तादेशः पदान्ते। तस्यासिद्धत्वात् 'चोः कुः' इति कुत्वम्। ऋत्विक्-ऋत्विग्। ऋत्विजौ। ऋत्विग्भ्याम्।

५६. **युजेरसमासे ७/१/७१**

युजेः सर्वनामस्थाने नुम् स्यादसमासे। सुलोपः। संयोगान्तलोपः। कुत्वेन नस्य ङः। युङ्। अनुस्वारपरसवर्णौ। युञ्जौ। युञ्जः।

---

५३. **सूत्रार्थः** – धातोः इत्यधिकारे तिङ्भिन्नप्रत्ययस्य कृत्सञ्ज्ञा भवति। अतः क्विन् प्रत्ययस्यापि कृत्सञ्ज्ञा।

५४. लोपो व्योर्वलि इत्यतो लोपः इत्यनुवर्तते।

**सरलार्थः** – अपृक्तसञ्ज्ञकस्य वकारस्य लोपः स्यात्।

५५. पदस्य इत्यधिकृतम्। 'झलां जशोऽन्ते' इति सूत्रात् अन्तःशब्दस्य अनुवर्तनम्। सूत्रार्थस्तु स्पष्टः।

**ऋत्विक्-ऋत्विग्** – ऋतौ यजति इति विग्रहे ऋतुपूर्वात् यज्धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजि क्रुञ्चां च' इति क्विनि अनुबन्धलोपे ऋतु ङि युज् व् इति जाते अपृक्तसंज्ञाया 'वेरपृक्तस्य' इति वलोपे 'वचिस्वपियजादीनां किति' इति यकारस्य सम्प्रसारणमिकारे पूर्वरूपे उपपदसमासे विभक्तिलोपे यणि ऋत्विज् इत्यस्य प्रातिपदिकसञ्ज्ञायां सौ हल्ङ्यादिलोपे 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन जकारस्य गकारे विकल्पेन चर्त्वे ऋत्विक् – ऋत्विग् इति।

**विशेषः** – ऋत्विक् इत्युदाहरणे 'क्विन्प्रत्ययस्य कुः' इत्यनेनैव कुत्वं विधेयम् सूत्रारम्भसामर्थ्यात्। मूले तु 'पूर्वत्रासिद्धम्' इति दृष्टौ कृत्वा अस्यासिद्धत्वात्... इति पाठो लिखितः।

५६. अत्र 'इदितो नुम्धातोः' इत्यतो नुम् इति 'उगिदचां सर्वनामस्थाने' इत्यतः सर्वनामस्थाने इति-अनुवर्तनमस्ति। अतो मूले सूत्रार्थ उक्तः।

**युङ्** = युज् धातोः 'ऋत्विग्दधृक्' इति क्विनि सर्वापहारिलोपे युज् इत्यस्य प्रातिपदिकसंज्ञायां सौ 'युजेरसमासे' इत्यनेन नुमि युन्ज्स् इति जाते हल्ङ्यादिलोपे संयोगान्तलोपे 'क्विन्प्रत्ययस्य कुः' इत्यनेन नकारस्य कुत्वेन ङकारे युङ् इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५७. **चोः कुः ८/२/३०**

चवर्गस्य कवर्गः स्याज्झलि पदान्ते च। सुयुक्-सुयुग्। सुयुजौ। सुयुग्भ्याम्। खन्। खञ्जौ। खन्भ्याम्।

५८. **व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ८/२/३६**

झलि पदान्ते च। जश्त्वचर्त्वे। राट्-राड्। राजौ। राजः। राड्भ्याम्। एवं विभ्राट्, देवेट्, विश्वसृट्। (परौ व्रजेः षः पदान्ते) परावुपपदे व्रजेः क्विप् स्याद्दीर्घश्च पदान्ते षत्वमपि। परिव्राट्। परिव्राजौ।

५९. **विश्वस्य वसुराटोः ६/३/१२८**

विश्वशब्दस्य दीर्घोऽन्तादेशः स्याद्वसौ राट्शब्दे च परे। विश्वाराट्-विश्वाराड्। विश्वराजौ। विश्वाराड्भ्याम्।

६०. **स्कोः संयोगाद्योरन्ते च ८/२/२९**

पदान्ते झलि च परे यः संयोगस्तदाद्योः स्कोर्लोपः। भृट्। भृड्। सस्य श्चुत्वेन शः 'झलां जश् झशि' इति शस्य जः। भृज्जौ। भृड्भ्याम्। त्यदाद्यत्वं पररूपत्वञ्च।

---

५७. पदस्य इत्यधिकृतम्। 'झलो झलि' इत्यतो झलि इत्यनुवर्तते। 'स्कोः संयोगाद्योरन्ते च' इत्यतः अन्ते इति च। तदाह सरलार्थः झल्परे तथा च पदान्ते चवर्गस्य स्थाने कवर्गादेशो भवति।

**सुयुक्** - सुपूर्वकात् युज्धातोः क्विपि सर्वापहारिलोपे प्रातिपदिकसंज्ञायां सौ हल्ङ्यादिलोपे 'चोः कुः' इति जकारस्य कुत्वेन गकारे वैकल्पिके चर्त्वे सुयुक्- सुयुग् इति।

५८. **सरलार्थः** - व्रश्च् भ्रस्ज् सृज् मृज् यज् राज् भ्राज् इति सप्तानां धातूनां छकारान्तशकारान्तशब्दानां च स्थाने षकारः अन्तादेशः स्यात् झलि पदान्ते च।

**राट्** - राज् धातोः क्विपि सर्वापहारिलोपे राज् शब्दस्य प्रातिपदिकसञ्ज्ञायांसौ हल्ङ्यादिलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति जकारस्य षकारे तस्य जश्त्वेन डकारे तस्य च विकल्पेन चर्त्वे 'राट्'। वार्तिकम् - अर्थस्तु स्पष्ट एव।

**परिव्राट्** - परिपूर्वकात् व्रज् धातोः 'परौ व्रजेः षः पदान्ते'' इति वार्तिकेन क्विपि उपधादीर्घे तथा च जकारस्य षकारे, क्विपः सर्वापहारिलोपे परिव्राष् इत्यस्य प्रातिपदिकस्य संज्ञायां सौ हल्ङ्यादिलोपे जश्त्वेन षस्य डकारे तस्य च विकल्पेन चर्त्वे परिव्राट्-परिव्राड् इति।

५९. अस्मिन् सूत्रे 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रात् दीर्घः इत्यनुवर्तते।

**विश्वाराट्** - विश्वोपपदात् राज् धातोः क्विपि सर्वापहारिलोपे समासकार्ये विश्वराज् इति प्रातिपदिकात् सौ हल्ङ्यादिलोपे 'व्रश्चभ्रस्ज........' इति सूत्रेण जकारस्य षकारे जश्त्वे विकल्पेन चर्त्वे 'विश्वस्य वसुराटोः' इति सूत्रेण अकारस्य दीर्घे कृते' विश्वाराड् इति।

६०. **सूत्रार्थः** - पदान्ते झलि च परे यः संयोगः तत्र (संयोगे) आदौ स्थितयोः सकारककारयोः लोपः भवति।

**भृट्** - भ्रस्ज् धातोः क्विपि सर्वापहारिलोपे प्रातिपदिकत्वात् सौ हल्ङ्यादिलोपे 'स्कोः संयोगाद्योरन्ते च' इत्यनेन स् इत्यस्य लोपे 'व्रश्चभ्रस्ज............' इति जस्य षकारे जश्त्वेन डकारे वैकल्पिकचर्त्वेन टकारे भृट्-भृड् इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६१. **तदोः सः सावनन्त्ययोः ७/२/१०६**
त्यादादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ। स्यः त्यौ। त्ये। सः। तौ। ते। यः। यौ। ये। एषः। एतौ। एते।

६२. **ङे प्रथमयोरम् ७/१/२८**
युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः।

६३. **त्वाहौ सौ ७/२/९७**
अनयोर्मपर्यन्तस्य त्वाहौ आदेशौ स्तः।

६४. **शेषे लोपः ७/२/९०**
एतयोष्टिलोपः। त्वम्। अहम्।

----------------------------------------------------------------------

६१. अत्र 'त्यदादीनामः' इत्यनुवर्तनात् द्विपर्यन्तानामेव ग्रहणम्।

**सरलार्थः** – त्यदादीनाम् अन्त्यभिन्नस्य तकारस्य दकारस्य च स्थाने सकारादेशः स्यात् सुप्रत्यये परे।

**स्यः** – त्यद् शब्दात् प्रातिपदिकात् सौ अनुबन्धलोपे 'त्यदादीनामः' इति दकारस्य अकारे पररूपे च 'तदोः सः सावनन्त्ययोः' इत्यनेन तकारस्थाने सकारादेशे सस्य रुत्वे विसर्गे च 'स्यः'।

६२. अत्र 'युष्मदस्मद्भ्यां ङसोऽश्' इति सूत्रात् युष्मद्स्मद्भ्याम् इत्यनुवर्तते। परशब्दस्य अध्याहारो वर्तते। ङे इति लुप्तषष्ठीकं पदम्। अतः अयमस्ति

**सरलार्थः** – युष्मदस्मद्शब्दाभ्यां परस्य ङे विभक्तेः स्थाने तथा च प्रथमाद्वितीयाविभक्त्योः स्थाने अम् इत्यादेशो भवति।

६३. त्वश्च अहश्च इति त्वाहौ। 'मपर्यन्तस्य' इत्यधिकृतम्। युष्मदस्मदोः पूर्ववदनुवर्तते।

**सूत्रार्थः** – मपर्यन्तस्य युष्मद्शब्दस्य त्व् इत्यादेशः तथा च अस्मद्शब्दस्य अह् इत्यादेशो भवति।

६४. अस्य सूत्रस्य कौमदीषु अर्थद्वयम् उपलभ्यते। एकत्र टिलोपः, अपरत्र अन्त्यस्य लोपः। अत्र टिलोपः स्वीकरणीयः।

**सरलार्थः** –आत्वयत्वनिमित्ताद्भिन्नविभक्तौ युष्मद्शब्दस्य अस्मद्शब्दस्य च टिलोपो भवति।

**त्वम् – अहम्** – युष्मद्शब्दात् अस्मद्शब्दात् प्रथमाविभक्तौ सौ 'ङे प्रथमयोरम्' इत्यनेन सुस्थाने अमादेशे 'त्वाहौ सौ' इति मपर्यन्तस्य क्रमशः त्व तथा अह आदेशे त्व अद् अम्, अह अद् अम् इति जाते पररूपे 'शेषेलोपः' इति टिलोपे 'त्वम् अहम्' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६५. **युवावौ द्विवचने ७/२/९२**
द्वयोरुक्तावनयोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।

६६. **प्रथमायाश्च द्विवचने भाषायाम् ७/२/८८**
औङ्येतयोरात्वं लोके। युवाम्। आवाम्।

६७. **यूयवयौ जसि ७/२/९३**
अनयोर्मपर्यन्तस्य यूयवयौ स्तो जसि। यूयम्। वयम्

६८. **त्वमावेकवचने ७/२/९७**
एकस्योक्तावनयोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।

६९. **द्वितीयायाञ्च ८/२/८७**
अनयोरात्स्यात्। त्वाम्। माम्।

---

६५. **सूत्रार्थः** – द्वित्वविशिष्टार्थस्य वाचिनोः युष्मदस्मदोः मपर्यन्तस्य भागस्य क्रमशः युवावौ (युव, आव) स्तः विभक्तौ परे।

६६. **भाषायाम्** – लौकिके व्यवहारे प्रथमाद्विवचने परे युष्मदस्मदोः आकारादेशः स्यात्।

**युवाम्-आवाम्** –युष्मद् अस्मद् शब्दाभ्यां पृथक् पृथक् औ विभक्तौ 'ङे प्रथमयोरम्' इत्यनेन औस्थाने अम् आदेशे 'युवावौ द्विवचने' इत्यनेन मपर्यन्तस्य युव आव चादेशे पररूपे युवद्-अम् आवद् अम् इति जाते 'प्रथमायाश्च द्विवचने भाषायाम्' इत्यनेन दकारस्य आत्वे सवर्णदीर्घे 'अमि पूर्वः' इति पूर्वरूपे कृते सिद्धम्।

६७. **सरलार्थः** – युष्मदस्मदोः मपर्यन्तस्य यूय वय इत्यादेशौ स्तः जसि परे।

**यूयम्-वयम्** – युष्मद् अस्मद् प्रातिपदिकाभ्याम् जसि 'ङे प्रथमयोरम्' इति जसः अमि 'यूयवयौ जसि' इति मपर्यन्तस्य यूय वय च इत्यादेशयोः पररूपे यूयद् अम् वयद् अम् इति जाते 'शेषे लोपः' इत्यनेन टिलोपे यूयम्, वयम् इति।

६८. **सूत्रार्थ'** – एकत्वार्थस्य वाचिनोः युष्मदस्मदोः मपर्यन्तस्य क्रमशः त्वमौ
(त्व, म) भवतः विभक्तौ।

६९. **सरलार्थः** – द्वितीयाविभक्तौ परतः युष्मदस्मदोः आकारः अन्तादेशः स्यात्।

**त्वाम्-माम्** – युष्मद् अस्मद् प्रातिपदिकाभ्यां पृथक्-पृथक् द्वितीयायां अम् प्रत्यये 'ङेप्रथमयोरम्' इति सूत्रेण अम् स्थाने अम् आदेशे ''त्वमावेकवचने'' इत्यनेन मपर्यन्तस्य त्व म इत्यादेशे त्व अद् अम्। म अद् अम् इति जाते पररूपे 'द्वितीयायाञ्च.' इत्यादिना दकारस्य आत्वे सवर्णदीर्घ पूर्वरूपे कृते 'त्वाम् – माम्' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७०. **शसो न ७/२/२९**

आभ्यां शसो नः स्यात्। अमोऽपवादः। आदेः परस्य। संयोगान्तस्य लोपः। युष्मान्। अस्मान्।

७१. **योऽचि ७/२/८९**

अनयोर्यकारादेशः स्यादनादेशेऽजादौ परतः। त्वया। मया।

७२. **युष्मदस्मदोरनादेशे ७/२/८६**

अनयोरात्स्यादनादेशे हलादौ विभक्तौ। युवाभ्याम्। अवाभ्याम्। युष्माभिः। अस्माभिः।

७३. **तुभ्यमह्यौ ङयि ७/२/९५**

अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। टिलोपः। तुभ्यम्। मह्यम्।

७४. **भ्यसोऽभ्यम् ७/१/३०**

आभ्यां परस्य भ्यसोऽभ्यमादेशः। युष्मभ्यम्। अस्मभ्यम्।

---

७०. 'ङे प्रथमयोरम्' इत्यस्य अमोऽपवादः। युष्मदस्मद्भ्यां परस्य शसः नकारः स्यात्। 'आदेः परस्य' इति सूत्रदिशा शसः अकारस्य स्थाने भवति न तु अलोऽन्त्यस्य इति।

**युष्मान् – अस्मान्** – युष्मद् अस्मद् शब्दाभ्यां पृथक् – पृथक् शसि अनुबन्धलोपे 'ङे प्रथमयोरम्' इति अमादेशं प्रबाध्य 'आदेः परस्य' इति सूत्रबलात् 'शसो नः' इति शसः अकारस्य न इत्यादेशे युष्मद्+न् स्, अस्मद् न् स् इति जाते ''द्वितीयायाञ्च'' इति दमात्रस्य आत्वे सवर्णदीर्घे युष्मान् स् अस्मान् स् 'संयोगान्तस्य लोपः' इति सलोपे।

७१. अनादेशे अजादौ विभक्तौ युष्मदस्मदोः अन्त्यस्य यादेशः स्यात्।

**त्वया-मया** – युष्मद् अस्मद् प्रातिपदिकाभ्यां पृथक्-२ टा विभक्तौ अनुबन्धलोपे 'त्वमावेकवचने' इत्यनेन मपर्यन्तयोः त्व म इत्यादेशे पररूपे त्वद् आ मद् आ इति जाते 'योऽचि' इति सूत्रेण दकारस्य यकारादेशे (त्वय् आ, मय् आ) ''त्वया मया''।

७२. 'रायो हलि' इत्यतो हलि 'अष्टन आ विभक्तौ' इत्यत आ विभक्तौ चानुवर्तते। तदादिविधिः।

**सरलार्थः** – आदेशभिन्नहलादौ विभक्तौ युष्मदस्मदोः अन्त्यस्य दकारस्य आकारादेशः स्यात्।

**युवाभ्याम् – आवाभ्याम्** – युष्मद् अस्मद् शब्दाभ्यां पृथक्-२ भ्यामि 'युवावौ द्विवचने' इत्यनेन क्रमशः मपर्यन्तस्य युव आव इत्यादेशे पररूपे युवद्भ्याम् आवद्भ्याम् इति जाते 'युष्मदस्मदोरनादेशे' इति सूत्रेण दकारस्य आकारे सवर्णदीर्घे युवाभ्याम् अवाभ्याम्।

७३. ङे विभक्तौ युष्मदस्मदोः मपर्यन्तस्य क्रमशः तुभ्यमह्यौ आदेशौ स्तः।

**तुभ्यम् – मह्यम्** – युष्मद् अस्मद् प्रातिपदिकाभ्यां चतुर्थ्येकवचने ङे विभक्तौ 'ङे प्रथमयोरम्' इति ङे स्थाने अमादेशे स्थानिवद्भाव माश्रित्य 'तुभ्यमह्यौ ङयि' इति सूत्रेण मपर्यन्तस्य क्रमशः तुभ्य मह्य इत्यादेशे पररूपे तुभ्यद् अम् मह्यद्अम् इति जाते 'शेषे लोपः' इत्यनेन टिलोपे सिद्धम्।

७४. युष्मदस्मद्शब्दाभ्यां परस्य भ्यस्स्थाने अभ्यम् इत्यादेशः स्यात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७५. **एकवचनस्य च ७/१/३२**
आभ्यां ङसेरत्। त्वत्। मत्।

७६. **पञ्चम्या अत् ७/१/३१**
आभ्यां पञ्चम्या भ्यसोऽत् स्यात्। युष्मत्। अस्मत्।

७७. **तवममौ ङसि ७/२/९६**
अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि।

७८. **युष्मदस्मद्भ्यां ङसोऽश् ७/१/२७**
तव। मम। युवयोः आवयोः।

७९. **साम आकम् ७/१/३३**
आभ्यां परस्य साम आकं स्यात्। युष्माकम्। अस्माकम्। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु।

---

**युष्मभ्यम्** – **अस्मभ्यम्** – युष्मदस्मद् शब्दाभ्यां चतुर्थीबहुवचने भ्यसि 'भ्योऽभ्यम्' इत्यनेन भ्यसः स्थाने अभ्यम् इत्यादेशे युष्मद् अभ्यम् अस्मद् अभ्यम् इति जाते 'शेषे लोपः' इत्यनेन टिलोपे कृते सिद्धम्।

७५. युष्मदस्मद्भ्यां परस्य ङसिस्थाने अत् आदेशः स्यात्। **त्वत्-मत्** – युष्मदस्मद् शब्दाभ्यां पञ्चम्येकवचने ङसि विभक्तौ 'एकवचनस्य च' इत्यनेन क्रमशः मपर्यन्तस्य त्व म इत्यादेशे पररूपे त्वद् अत्, मद् अत् इति जाते 'शेषे लोपः' इत्यनेन टेः (अद् भागस्य) लोपे सिद्ध्यति।

७६. अत्र 'भ्यसोऽभ्यम्' इत्यतो भ्यस इति अनुवर्तते। युष्मदस्मद्भ्यां परस्य पञ्चमीविभक्तेः भ्यसः स्थाने अत् इत्यादेशः स्यात्। **युष्मत्** – **अस्मत्** – युष्मदस्मद् शब्दाभ्यां पृथक्-पृथक् पञ्चमीबहुवचने भ्यसि 'पञ्चम्या अत्' इति सूत्रेण अनेकाल्त्वात् भ्यसः स्थाने अत् इति सर्वादेशे 'शेषे लोपः' इत्यनेन टिलोपे।

७७. युष्मदस्मदोः मपर्यन्तस्य स्थाने क्रमशः तव मम इत्यादेशौ स्तः ङसि परे।

७८. युष्मदस्मद्शब्दाभ्यां परस्य ङस् इत्यस्य स्थाने अश् आदेशः स्यात्। शित्वात् सर्वादेशत्वं भवति।

**तव** – **मम** – युष्मदस्मद् प्रातिपदिकाभ्यां पृथक् – २ षष्ठ्येकवचने ङस् विभक्तौ 'तवममौ ङसि' इति सूत्रेण मपर्यन्तस्य क्रमशः तव मम इति आदेशे पररूपे तवद्ङस् ममद् ङस् इति जाते 'युष्मदस्मद्भ्यां ङसोऽश्' इति सूत्रेण ङसः स्थाने अशादेशे अनुबन्धलोपे 'शेषे लोपः' इति टेर्लोपे 'तव मम' इति।

७९. युष्मदस्मद्भ्यां परस्य षष्ठीबहुवचने सामः स्थाने आकमादेशः स्यात्। भाविनः सुटो निवृत्त्यर्थं ससुट्कनिर्देशः कृतः। टिलोपपक्षे तु सुड्ग्रहणम् व्यर्थम्, अन्त्यलोपपक्षे एव सार्थकम्।

**युष्माकम्** – **अस्माकम्** – युष्मदस्मद् शब्दाभ्यां पृथक्-२ षष्ठीबहुवचने आमि 'साम आकम्' इति सूत्रेण आमः स्थाने आकम् इत्यादेशे 'शेषे लोपः' इत्यनेन टिलोपे कृते सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८०. **युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ८/१/२०**
पदात्परयोरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वां नौ इत्यादेशौ स्तः।

८१. **बहुवचनस्य वस्नसौ ८/१/२१**
उक्तविधयोरनयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।

८२. **तेमयावेकवचनस्य ८/१/२२**
उक्तविधयोरनयोष्षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।

८३. **त्वामौ द्वितीयायाः ८/१/२३**
द्वितीयैकवचनान्तयोस्त्वा मा इत्यादेशौ स्तः। श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म सः। स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः।।सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः। सोऽव्याद्वो नः शिवं वो नो दद्यात् सेव्योऽत्र वः स नः।।(एकवाक्ये युष्मदस्मदादेशा वक्तव्याः) एकतिङ् वाक्यम्। ओदनं पच तव भविष्यति। (एते वान्नावादयोऽनन्वादेशे वा वक्तव्याः। अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति, धाता तव भक्तोऽस्ति वा। तस्मै ते नमः इत्येव। सुपात् सुपाद्। सुपादौ।

---

८०. अत्र तथा च अग्रिमसूत्रत्रयेऽपि 'पदस्य' 'पदात्' 'अनुदात्तं सर्वमपादादौ' इति त्रयाणां सूत्राणामधिकारः अस्ति। अत एवार्थः – पदात् परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीयाविशिष्टयोः (अर्थात् उक्तविभक्तिषु निष्पन्नयोः) युष्मदस्मदोः स्थाने क्रमशः वां नौ इत्यादेशौ भवतः।

८१. अधिकारस्तु पूर्ववदेव। पूर्वसूत्रस्यापवादः। पदात्परयोः अपादादौ स्थितयोः षष्ठीचतुर्थीद्वितीया बहुवचनविशिष्टयोः युष्मदस्मदोः स्थाने क्रमशः वस् नस् इत्यादेशौ स्तः।

८२. पदात्परयोः अपादादौ स्थितयोः षष्ठीचतुर्थ्येकवचनान्तयोः युष्मदस्मदोः सiाने क्रमशः ते मे इत्यादेशौ स्याताम्।

८३. त्वाश्च माश्च इति विग्रहः। एकवचनस्य इति अनुवर्तते। पदात्परयोः अपादादौ स्थितयोः द्वितीयाविभक्तेः एकवचनविशिष्टयोः युष्मदस्मदोः स्थाने त्वा मा इत्यादेशौ भवतः।

**विशेषः** – उक्तानां चतुर्णां सूत्राणाम् द्वितीयाचतुर्थीषष्ठीविभक्तिषु यानि रूपाणि भवन्ति तानि कारिकायां स्पष्टीकृतानि। द्वितीयाचतुर्थीषष्ठी क्रमेण तथा च एकवचनद्विवचनबहुवचनक्रमेण।

अ. विभक्तित्रयस्य एकवचनस्य उदाहरणानि –

(क) श्रीशस्त्वावतु मापीह – अत्र त्वां मां स्थाने 'त्वामौ द्वितीयायाः' इति सूत्रेण त्वा मा इत्यादेशौ कृतौ। (श्रीशः त्वा अवतु मा अपि इह)

(ख) दत्तात्ते मेऽपि शर्म सः – इत्यत्र तुभ्यम् मह्यम् इति स्थाने 'तेमयावेकवचनस्य' इति सूत्रेण ते मे इत्यादेशौ कृतौ।

(ग) स्वामी ते मेऽपि स हरिः – अत्र तव मम इति स्थाने 'तेमयावेकवचनस्य' इति तव मम इति स्थाने ते मे इत्यादेशौ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८४. पाद: पत् ६/४/१३०

पाच्छब्दान्तं यदङ्गं भं तदवयवस्य पाच्छब्दस्य पदादेश:। सुपद:। सुपदा। सुपाद्भ्याम्। अग्निमत् – अग्निमद्। अग्निमथौ। अग्निमथ:।

८५. **अनिदितां हल उपधाया क्ङिति ६/४/२४**

हलन्तानामनिदितामङ्गानामुपधाया नस्य लोप: किति ङिति। नुम्। संयोगान्तस्यलोप:। नस्य कुत्वेन ङ:। प्राङ्। प्राञ्चौ। प्राञ्च:।

---

**आ.** विभक्तित्रयस्य द्विवचनस्य उदाहणानि –

(क) पातु वामपि नौ विभु: – अत्र युवाम् आवाम् स्थाने 'युष्मदस्मदो: षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ' इति सूत्रेण वाम् नौ इत्यादेशौ।

(ख) सुखं वां नौ ददात्वीश: – अत्र चतुर्थीद्विवचने युवाभ्याम् आवाभ्याम् इति स्थाने 'युष्मदस्मदो: ........' इति सूत्रेण वाम् नौ इत्यादेशौ।

(ग) पति: वामपि नौ विभु: – अत्र षष्ठीद्विवचने युवयो: आवयो: सीाने 'युष्मदस्मदो:' ....... इति सूत्रेण वाम् नौ इत्यादेशौ।

**ई.** विभक्तित्रयस्य बहुवचनस्य उदाहरणानि –

(क) सोऽव्याद् व: न:।

(ख) शिवं व: न: दद्यात्।

(ग) सेव्य: अत्र व: स न: – इत्यत्र द्वितीयाचतुर्थीषष्ठीबहुवचने क्रमश: युष्मान्-अस्मान्, युष्मभ्यम्-अस्मभ्यम्, युष्माकम् – अस्माकम् इति स्थाने 'युष्मदस्मदो....' इति सूत्रेण वस् नस् इत्यादेशौ कृतौ सिद्ध्यन्ति रूपाणीमानि।

८४. 'भस्य' 'अङ्गस्य' इति सूत्रद्वयस्य अधिकारे अस्ति इदं सूत्रम्। अत: तदन्तविधि:। निर्दिश्यमानत्वात् पादशब्दस्यैव पदादेश:।

**सरलार्थ:** – पाद्शब्दान्तं यद् भसञ्ज्ञकम् अङ्गम् तदवयवस्य पादशब्दस्य स्थाने पदादेश: स्यात्। **सुपद:** – सुपाद् शब्दात् प्रातिपदिकात् शसि अनुबन्धलोपे भसंज्ञायां 'पाद: पत्' इति सूत्रेण सुपाद्घटकस्य पाद् इत्यस्य स्थाने पद् इत्यादेशे सस्य रुत्वे विसर्गे च कृते 'सुपद:' इति सिद्धम्।

८५. सूत्रार्थस्तु स्पष्ट एव। इत् (इकार:) इत्संज्ञक: येषां अस्ति, तेषाम् अनिदिताम् इति नलोपविधायकं सूत्रम्।

**प्राङ्** – प्र पूर्वकात् अञ्च् धातो: क्विनि तस्य सर्वापहारिलोपे सवर्णदीर्घे 'अनिदितां हल उपधाया: क्ङिति' इति सूत्रेण नलोपे प्राच् इत्यस्य प्रातिपदिकसंज्ञायां सौ 'उगिदचां सर्वनामस्थानेऽधातो:' इत्यनेन नुमि अनुबन्ध लोपे हल्ङ्यादिलोपे चकारस्य संयोगान्तलोपे प्रान् इति जाते 'क्विन्प्रत्ययस्य कु:' इति नस्य कुत्वेन ङकारे प्राङ् इति सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८६. **अचः ६/४/१३८**

लुप्तनकारस्याञ्चतेर्भस्याकारस्य लोपः।

८७. **चौ ६/३/१३८**

लुप्ताकारनकारेऽञ्चतौ परे पूर्वस्याणो दीर्घः। प्राचः। प्राचा। प्राग्भ्याम्। प्रत्यङ्। प्रत्यञ्चौ। प्रतीचः। प्रत्यग्भ्याम्। उदङ्। उदञ्चौ।

८८. **उद ईत् ६/४/१३८**

उच्छब्दात्परस्य लुप्तनकारस्याञ्चतेर्भस्याकारस्य ईत्। उदीचः। उदीचा। उदग्भ्याम्।

८९. **समः समि ६/३/९३**

वप्रत्यान्तेऽञ्चतौ। सम्यङ्। सम्यञ्चौ। समीचः। सम्यग्भ्याम्।

९०. **सहस्य सध्रिः ६/३/९५**

तथा। सध्र्यङ्। सध्रीचः।

---

८६. 'अल्लोपोऽनः' इत्यतो अलोप इत्यनुवर्तते। 'भस्य' इत्यधिकारे अस्ति। अनेन सूत्रेण अलोपः क्रियते।

८७ 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' 'इत्यतः पूर्वस्य दीर्घोऽणः इत्यनुवर्तते।

**प्राचः** – प्र पूर्वकात् अञ्च्धातोः क्विनि सर्वापहारिलोपे 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे प्रअच् इत्यवस्थायां प्रातिपदिकसञ्ज्ञायां शसि अनुबन्धलोपे भसञ्ज्ञायां 'अचः' इति अलोपे प्र च् अस् इति जाते 'चौ' इति सूत्रेण प्र इत्यस्य अकारस्य दीर्घे सस्य रुत्वे विसर्गे च कृते सिद्ध्यति।

८८. 'अच' इति सूत्रस्य अपवादोऽयम्। अत्र 'अचः' इत्यनुवर्तते 'अल्लोपोऽनः' इत्यतः अत् इति च। 'भस्य' इत्यधिकारो वर्तते।

**उदीचः** – उत्पूर्वकात् अञ्च् धातोः क्विनि सर्वापहारिलोपे नलोपे उदच् इत्यस्य प्रातिपदिकत्वात् शसि अनुबन्धलोपे भसञ्ज्ञायां 'अचः' इति सूत्रं प्रबाध्य 'उद ईत्' इति सूत्रेण अकारस्य ईकारे सस्य रुत्वे विसर्गे च कृते 'उदीचः' इति।

८९. **सूत्रार्थः** – वप्रत्ययान्ते अञ्चतौ परे समः स्थाने समि इत्यादेशः स्यात्।

**सम्यङ्** – सम् पूर्वकात् अञ्च् धातोः क्विनि सर्वापहारिलोपे नलोपे 'समः समि' इति सूत्रेण समः स्थाने समि आदेशे यणि सम्यच् इति प्रातिपदिकात् सौ 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमि हल्ङ्यादिलोपे चकारस्य संयोगान्तलोपे 'क्विन्प्रत्ययस्य कुः' इति नकारस्य कुत्वेन ङकारे सम्यङ् इति।

९०. **सूत्रार्थः** – वप्रत्ययान्ते अञ्चतौ परे सहस्य स्थाने सध्रि इत्यादेशः स्यात्।

**सध्र्यङ्** – सह पूर्वकात् अञ्च् धातोः क्विनि सर्वापहारिलोपे नलोपे 'सहस्य सध्रिः' इति सूत्रेण सहस्य स्थाने सध्रि इत्यादेशे शेषप्रक्रिया सम्यङ्वत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९१. **तिरसस्तिर्यलोपे ६/३/९४**

अलुप्ताकारेऽञ्चतावप्रत्ययान्ते परे तिरसस्तिर्यादेशः स्यात्। तिर्यङ्। तिरञ्चौ। तिरश्चः। तिर्यग्याम्।

९२. **नाञ्चेः पूजायाम् ६/४/३०**

पूजार्थस्याञ्चतेरुपधाया नस्य लोपो न स्यात्। प्राङ्। प्राञ्चौ। नलोपाभावादल्लोपो न। प्राञ्चः। प्राङ्भ्याम्। प्राङ्क्षु। एवं पूजार्थे प्रत्यङ्ङादयः। क्रुङ्। क्रुञ्चौ। क्रुङ्भ्याम्। पयोमुक्-पयोमुग्। पयोमुचौ। पयोमुग्भ्याम्। उगित्वान्नुम्।

९३. **सान्तमहतः संयोगस्य ६/४/१०**

सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यात् असम्बुद्धौ सर्वनामस्थाने। महान्। महान्तौ। महान्तः। हे महद्। महद्भ्याम्।

९४. **अत्वसन्तस्य चाधातोः ६/४/१४**

अत्वन्तस्योपधाया दीर्घो धातुभिन्नासन्तस्य चासम्बुद्धौ सौ परे। उगित्त्वान्नुम्। धीमान्। धीमन्तौ। धीमन्तः। हे धीमन्। शसादौ महद्वत्। भातेर्डवतुः। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। भवान्। भवन्तौ। भवन्तः। शत्रन्तस्य भवन्।

---

९१. सूत्रार्थस्तु स्पष्ट एव। भसञ्ज्ञायाः अभावे एव अस्य सूत्रस्य प्रवृत्तिः। भसञ्ज्ञायां तु अलोपो भवति, शसादौ तत्र तिरश्चः इति सिद्ध्यति।

**तिर्यङ्** – तिरस् पूर्वकात् अञ्च् धातोः क्विनि सर्वापहारिलोपे नलोपे 'तिरसस्तिर्यलोपे' इति तिरस् स्थाने तिरि इत्यादेशे शेषा प्रक्रिया पूर्ववदेव।

९२. **सूत्रार्थः** – पूजार्थकाद् अञ्च्धातोः अनिदितां ..... इति सूत्रेण प्राप्तस्य उपधाभूतस्य नकारस्य लोपो न भवति।

**प्राङ्** – प्रपूर्वकात् पूजार्थकाद् अञ्च् धातोः क्विनि सर्वापहारिलोपे नलोपे प्राप्ते 'नाञ्चेः पूजायाम्' इत्यनेन निषेधे सवर्णदीर्घे प्राञ्च् इत्यस्य प्रातिपदिकसञ्ज्ञायां सौ हल्ङ्यादिलोपे चकारस्य संयोगान्तलोपे कुत्वेन नकारस्य ङकारे प्राङ् इति।

९३. **सरलार्थः** – सकारान्तसंयोगस्य तथा च महत् शब्दस्य यो नकारः तस्य उपधाया दीर्घो भवति सम्बुद्धिभिन्ने सर्वनामस्थाने परतः।

**महान्** – महत्शब्दात् प्रातिपदिकात् सौ 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमि अनुबन्धलोपे महन्त् स् इति जाते 'सान्तमहतः संयोगस्य' इति सूत्रेण दीर्घे हल्ङ्यादिलोपे तकारस्य संयोगान्तलोपे 'महान्' इति रूपम्।

९४. सम्बुद्धिभिन्ने सुप्रत्यये परे अत्वन्तस्य धातुभिन्नासन्तस्य च उपधाया दीर्घः स्यात्।

**धीमान्** –धीमत् इति प्रातिपदिकात् सौ 'अत्वसन्तस्य चाधातोः' इति सूत्रेण उपधादीर्घे 'उगिदचां सर्वनामस्थानेऽधातोः' इत्यनेन नुमि अनुबन्धलोपे हल्ङ्यादिलोपे तकारस्य संयोगान्तलोपे 'धीमान्' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**९५. उभे अभ्यस्तम् ६/१/५**

षाष्ठद्वित्वप्रकरणे ये द्वे विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्त:।

**९६. नाभ्यस्ताच्छतु: ६/१/७८**

अभ्यस्तात्परस्य शतुर्नुम् न स्यात्। ददत्, ददद्। ददतौ। ददत:।

**९७. जक्षित्यादय: षट् ६/१/६**

षड्धातवोऽन्ये जक्षितिश्च सप्तम एते अभ्यस्तसंज्ञा: स्यु:। जक्षत् -जक्षद्। जक्षतौ। जक्षत:। एवं जाग्रत्, दरिद्रत्, शासत्, चकासत्। गुप्-गुब्। गुपौ। गुप:। गुब्भ्याम्।

**९८. त्यदादिषु दृशोऽनालोचने कञ्च ३/२/६०**

त्यदादिषूपपदेष्वज्ञानार्थाद्दृशे: कञ् स्यात्। चात् क्विन्।

**९९. आ सर्वनाम्न: ६/३/९१**

सर्वनाम्न आकारोऽन्तादेश: स्याद्दृग्दृशवतुषु। तादृक्-तादृग्।तादृशौ। तादृश:। तादृग्भ्याम्। व्रश्चेति ष:। जश्त्वचर्त्वे विट्-विड्। विशौ। विश:। विड्भ्याम्।

---------------------------------------------------------------------------------------

**भवान्** - डवतुप्रत्ययान्तस्य भवत् शब्दस्य प्रातिपदिकसंज्ञायां सुप्रत्यये 'अत्वसन्तस्य चाधातो:' इति उपधादीर्घे नुमि सुलोपे संयोगान्तलोपे 'भवान्'।

**विशेष:** - शतृप्रत्ययान्तस्य भवत् शब्दस्य तु उपधादीर्घो न भवति अत्वन्तस्याभावात्।

९५. अभ्यस्तसंज्ञाविधायकम् सूत्रम् इदम्। या या सञ्ज्ञा सा सा फलवती। अभ्यस्तसंज्ञाया: फलं तु अग्रिमे सूत्रे वर्तते।

९६. अभ्यस्तसञ्ज्ञकात्परस्य शतृप्रत्ययस्य नुमागमो न भवति। 'उगिदचां सर्वनामस्थानेऽधातो:' इति सूत्रेण प्राप्तस्य नुम: निषेधकमिदम्।

**ददत्** - ददत् शब्दात् 'उभे अभ्यस्तम्' इति अभ्यस्तसंज्ञायां ततश्च प्रातिपदिकत्वात्सौ 'उगिदचां सर्वनामस्थानेऽधातो:' इति नुमि प्राप्ते 'नाभ्यस्ताच्छतु:' इति सूत्रेण नुमागमस्य निषेधे हल्ङ्यादिलोपे कृते सिद्धम्।

९७. जक्ष्, जागृ, दरिद्रा, शासु, चकासृ, दीधीङ् वेवीङ् इत्येतेषां सप्तधातूनाम् अभ्यस्तसञ्ज्ञा भवति।

अभ्यस्तसञ्ज्ञकानां सप्तधातूनां सङ्ग्रह: -जक्षिजागृदरिद्राशासदीधीङ्वेवीङ्चकास्तथा। अभ्यस्तसञ्ज्ञा विज्ञेया धातवो मुनिभाषिता:।।

**जक्षत्** - शतृप्रत्ययान्तस्य जक्षत् शब्दस्य 'जक्षित्यादय: षट्' इति सूत्रेण अभ्यस्तसञ्ज्ञायां ततश्च प्रातिपदिकत्वात् सुप्रत्यये नुमि प्राप्ते 'नाभ्यस्ताच्छतु:' इत्यनेन निषेधे सुलोपे जश्त्वे विकल्पेन चर्त्वे।

९८. त्यदादिषु उपपदेषु ज्ञानभिन्नार्थस्य वाचकाद् दृशधातो: कञ् प्रत्यय: तथा च चकारेण क्विन्प्रत्ययोऽपि स्यात् इति सरलार्थ:।

९९. सर्वनाम्न: स्थाने आकार अन्तादेश: भवति दृक् दृश् वतु च परे।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१००. **नशेर्वा ८/२/६३**

नशेः कवर्गोऽन्तादेशो वा पदान्ते। नक्-नग् । नट्-नड्। नशौ। नशः। नम्भ्याम्-नड्भ्याम्।

१०१. **स्पृशोऽनुदके क्विन् ३/२/५८**

अनुदके सुप्युपपदे स्पृशेः क्विन् स्यात्। घृतस्पृक्-घृतस्पृग्। घृतस्पृशौ। घृतस्पृशः। दधृक् - दधृग्। दधृषौ। दधृषः। दधृग्भ्याम्। रत्नमुट् - रत्नमुड्। रत्नमुषौ। रत्नमुड्भ्याम्। षट्-षड्। षड्भिः। षड्भ्यः२। षण्णाम्। षट्त्सु-षट्सु। रुत्वं प्रति षत्वस्यासिद्धत्वात् ससजुषोरुरिति रुत्वम्।

१०२. **र्वोरुपधाया दीर्घ इकः ८/२/७६**

रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते। पिपठीः। पिपठिषौ। पिपठीर्भ्याम्।

१०३. **नुम्विसर्जनीयशर्व्यवायेऽपि ८/३/५८**

एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां परस्य सस्य मूर्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षः। पिपठीष्षु-पिपठीःषु। चिकीः। चिकीर्षौ। चिकीर्भ्याम्। चिकीर्षु। विद्वान्। विद्वांसौ। हे विद्वन्।

---

**तादृक्** = तद् उपपदात् दृश् धातोः 'त्यदादिषु दृशोऽनालोचने कञ्च' इति सूत्रेण क्विन्प्रत्यये सर्वापहारिलोपे समासकार्ये तद्दृश् इति जाते 'आ सर्वनाम्नः इति सूत्रेण तद् इति दकारस्य स्थाने आकारादेशे सवर्णदीर्घे तादृश् इति प्रातिपदिकात् सौ हल्ङ्यादिलोपे 'व्रश्चभ्रस्ज...' इत्यादिना शस्य षत्वे जश्त्वेन डकारे कुत्वेन गकारे वैकल्पिकचर्त्वेन ककारे 'तादृक्' इति। कञि तु 'तादृशः' इति रामवद्रूपाणि।

१००. पदस्य इत्यधिकृतम्। 'क्विन्प्रत्ययस्य कुः' इत्यतः कुः, स्कोः संयोगाद्योरन्ते च इत्यतः अन्ते इति चानुवर्तते। इदं व्रश्च. इत्यस्य बाधकम्।

**नक्** - नश् धातोः क्विपि सर्वापहारिलोपे प्रातिपदिकत्वात् हल्ङ्यादिलोपे 'व्रश्चभ्रस्ज...' इति सूत्रं प्रबाध्य 'नशेर्वा' इति विकल्पेन शकारस्य कुत्वेन घकारे जश्त्वे वैकल्पिकचर्त्वे नक्-नग् इति। कुत्वाभावे तु 'व्रश्चभ्रस्ज्. इत्यादिना शस्य षत्वे जश्त्वे वैकल्पिकचर्त्वे नट्-नड् इति चत्वारि रूपाणि सिद्ध्यन्ति।

१०१. उदकशब्दभिन्ने सुबन्ते उपपदे स्पृश् धातोः क्विन्प्रत्ययः स्यात्।

**घृतस्पृक्** - घृतशब्दोपपदात् स्पृश् घातोः 'स्पृशोऽनुदके क्विन्' इति क्विन्प्रत्यये सर्वापहारिलोपे समासकार्ये घृतस्पृश् इत्यस्मात् सौ हल्ङ्यादिलोपे 'व्रश्चभ्रस्ज...' इति शस्य षत्वे जश्त्वे ''वाऽवसाने'' इति चर्त्वे सिद्धम्।

**षट् - षड्** - षष् शब्दात् जसि शसि च 'ष्णान्ताषट्' इत्यनेन षट्संज्ञायां 'षड्भ्यो लुक्' इति जश्शसोः लुकि षकारस्य जश्त्वेन डकारे वैकल्पिकचर्त्वेन टकारे षट् - षड् इति।

१०२. रेफान्तस्य तथा च वकारान्तस्य धातोः उपधायाः इकः स्थाने दीर्घः स्यात् पदान्ते।

**पिपठीः** पिपठिष् शब्दात् प्रातिपदिकत्वात् सौ हल्ङ्यादिलोपे षत्वस्य असिद्धतया ''ससजुषो रुः'' इति षस्य रुत्वे अनुबन्धलोपे पिपठिर् इति जाते 'र्वोरुपधाया दीर्घ इकः' ''इति उपधादीर्घे रेफस्य विसर्गे च सिद्ध्यति।

१०३. अस्मिन् सूत्रे 'इण्कोः' इति 'मूर्धन्यः' इति चानुवर्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०४. **वसोः सम्प्रसारणम्** ६/४/१३१

वस्वन्तस्य भस्य सम्प्रसारणं स्यात्। विदुषः। वसुस्रंस्विति दः। विद्वद्भ्याम्।

१०५. **पुंसोऽसुङ्** ७/१/८९

सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्। पुमान्। हे पुमन्। पुमांसौ। पुंसः। पुम्भ्याम्। पुंसु। ऋदुशनेत्यनङ्। उशना। उशनसौ। (अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः) हे उशन, हे उशनन्, हे उशनः। उशनसौ। उशनोभ्याम्। उशनस्सु। अनेहाः। अनेहसौ। हे अनेहः। वेधाः। वेधसौ। हे वेधः। वेधोभ्याम्।

१०६. **अदस औ सुलोपश्च** ७/२/१०७

अदस औकारान्तादेशः स्यात्सौ परे सुलोपश्च। तदोरिति सः। असौ। त्यदाद्यत्वम्। पररूपत्वम्। वृद्धिः।

---

**सरलार्थः**– नुम्, विसर्जनीय, शर् इति एतेषु कस्यापि एकस्य व्यवधाने सति इण्कुभ्यां परस्य सकारस्य षकारः मूर्धन्यादेशः स्यात्।

**पिपठीष्षुः** – पिपठिष् शब्दात् सप्तम्याः बहुवचने सुपि षत्वस्य असिद्धतया 'ससजुषो रुः' इति षस्य रुत्वे 'र्वोरुपधाया दीर्घ इकः' इति उपधादीर्घे रेफस्य विसर्गे 'विसर्जनीयस्य सः' इति सत्वं प्रबाध्य 'वा शरि' इत्यनेन विकल्पेन विसर्गस्य विसर्गे पिपठीः सु इति जाते ''नुम्विसर्जनीयशर्व्यवायेऽपि'' इति सूत्रेण सुपः सकारस्य षत्वे पिपठीः षु इति। विसर्गाभावे विसर्गस्य सत्वे ''नुम्विसर्जनीय'' इति षत्वे ष्टुत्वे 'पिपठीष्षु' इति।

१०४. ''भस्य'' ''अङ्गस्य'' इति चाधिकृतम्। **अर्थः** वसुप्रत्ययान्तस्य भसञ्ज्ञकस्य अङ्गस्य स्थाने सम्प्रसारणं स्यात्। **विदुषः** – विद्वस् शब्दात् प्रातिपदिकात् शसि अनुबन्धलोपे भसञ्ज्ञायां 'वसोः सम्प्रसारणम्' इति सूत्रेण प श्चाद्वर्तिनःवकारस्य उकारे सम्प्रसारणे विद्उ अस् अस् इति जाते पूर्वरूपे ''आदेश प्रत्यययोः'' इति सस्य षकारे सस्य रुत्वे विसर्गे च कृते 'विदुषः' सिद्धम्।

१०५. **सूत्रार्थः** – सर्वनामस्थाने प्रयोक्तुम् इष्टे सति पुंसः असुङ् आदेशः भवति।स च अन्त्यस्य।

**पुमान्** – पुंस् शब्दस्य अन्त्यस्य स्थाने असुङ् आदेशे अनुबन्धलोपे पुमस् इति स्थिते सौ 'उगिदचाम्' इति नुमि 'सान्तमहतः संयोगस्य' इति दीर्घे पुमान् स् स् इति जाते हल्ङ्यादिलोपे संयोगान्तलोपे कृते 'पुमान्' इति।

**वार्तिकार्थः** – सम्बुद्धौ परतः उशनस् शब्दस्य सकारस्य स्थाने विकल्पेन अनङ् इत्यादेशः तथा च नकारस्यापि विकल्पेन लोपो भवति।

**हे उशन–हे उशनन्–हे उशनः** – सम्बुद्धौ उशनस् शब्दात् सौ 'अस्य सम्बुद्धौ वाऽनङ्' इति वार्तिकेन विकल्पेन सकारस्य स्थाने अनङि तथा च विकल्पेन नलोपे पररूपे सुलोपे हे उशन इति। नलोपाभावे हे उशनन् इति। अनङ्ङभावपक्षे तु सुलोपे सस्य रुत्वे विसर्गे च हे उशनः इति।

१०६. **सूत्रार्थः** – सुविभक्तिपरतः अदसः अन्त्यस्य सकारस्य स्थाने औकारादेशः तथा च सुलोपो भवति।

**असौ** – अदस् इत्यस्मात् प्रातिपदिकात् सौ 'त्यदादीनामः' इति सूत्रं प्रबाध्य 'अदस औ सुलोपश्च' इति सूत्रेण सकारस्य औकारादेशे तथा च सुलोपे 'तदोः सः सावनन्त्ययोः' इति दकारस्य सकारे वृद्धौ 'असौ' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०७. **अदसोऽसेर्दादु दो मः ८/२/८०**

अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। आन्तरतम्याद्ध्रस्वस्य उः। दीर्घस्य ऊः। अमू। जसः शी। गुणः।

१०८. **एत ईद्बहुवचने ८/२/८१**

अदसो दात्परस्यैत ईद् दस्य च मो बह्वर्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वम्। अमुम्। अमू। अमून्। मुत्वे कृते घिसञ्ज्ञायां नाभावः।

१०९. **न मु ने ८/२/३**

नाभावे कर्तव्ये कृते च मुभावो नासिद्धः। अमुना। अमूभ्याम्। अमीभिः। अमुष्मै। अमीभ्यः। अमुष्मात्। अमुष्मिन्। अमीषु।

॥ इति हलन्तपुंल्लिङ्गप्रकरणम्॥

---

१०७. **सूत्रार्थः** अविद्यमानसकारान्तस्य – अदस्शब्दस्य दकारात् परवर्णस्य स्थाने उकारः ऊकारो वा भवति तथा च दकारस्य स्थाने मकारादेशोऽपि भवति। अस्मिन् सूत्रे चतुर्विधान्तर्येषु प्रमाणकृतम् आन्तर्यं (सादृश्यं) गृह्यते। अर्थात् दकारात् परे यदि ह्रस्ववर्णः स्यात् तदा ह्रस्वः उकारः, दीर्घस्य स्थाने दीर्घः ऊकारो भवति।**अमू** – अदस् शब्दात् औ प्रत्यये 'त्यदादीनामः' इति सस्य अकारे पररूपे वृद्धौ अदौ इति जाते ''अदसोऽसेर्दादु दोमः इति सूत्रेण औकारस्य ऊत्वे दकारस्य च मत्वे अमू इति।

१०८. बहुत्वविवक्षायाम् अदसः दकारात्परस्य एकारस्य स्थाने ईकारादेशः तथा च दकास्य स्थाने मकारादेशोऽपि भवति।**अमी** – अदस् प्रातिपदिकात् जसि त्यदाद्यत्वे पररूपत्वे च 'जसः शी' इत्यनेन जसः स्थाने शी इत्यादेशे अनुबन्धलोपे गुणे अदे इति जाते ''अदसोऽसेर्दादु दो मः'' इति सूत्रं प्रबाध्य ''एत ईद् बहुवचने'' इति सूत्रेण एकारस्य ईकारे तथा च दकारस्य मकारे अमी इति।

१०९. न इति अव्ययपदम्। म् च उश्च इति मु समाहारद्वन्द्वः। ने इति नाशब्दस्य सप्तम्येकवचनम्। विषयसप्तमी परसप्तमी च बोध्या। पूर्वत्रासिद्धम् इत्यतः असिद्धम् इत्यनुवर्तते। तदनन्तरं उक्तार्थः सम्भवति।**अमुना** – अदस् शब्दात् प्रातिपदिकात् तृतीयैकवचने टाविभक्तौ त्यदाद्यत्वे पररूपत्वे च ''अदसोऽसेर्दादु दो मः'' इति उत्वमत्वे अमु टा इति जाते घिसञ्ज्ञायां ''आङो नाऽस्त्रियाम्'' इत्यनेन टास्थाने नाभावे कर्तव्ये ''न मु ने'' इति सूत्रेण मुभावस्य असिद्धत्वाभावे ना कृते ''अमुना'' इति सिद्धम्।

॥ इति हलन्तपुंल्लिङ्गप्रकरणम्॥



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ हलन्तस्त्रीलिङ्गप्रकरणम्

११०. **नहो धः ८/२/३४**

नहो हस्य धः स्याज्झलि पदान्ते च।

१११. **नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ६/१/११६**

क्विबन्तेषु परेषु पूर्वपदस्य दीर्घः स्यात्। उपानत्, उपानद्। उपानहौ। उपानत्सु। क्विबन्तात् कुत्वेन घः। उष्णिक्, उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्याम्।द्यौः। दिवौ। दिवः। द्युभ्याम्। गीः। गिरौ। गिरः। एवं पूः। चतस्रः। चतसृणाम्। का। के। काः। सर्वावत्।

---

११०. अस्मिन् सूत्रे 'हो ढः' इत्यतः ह इत्यनुवर्तते। 'पदस्य' अधिकृतम्। 'स्कोः संयोगाद्योरन्ते च' इत्यतः अन्ते चानुवर्तते। 'झलो झलि' इत्यतः झलि। तदा सूत्रस्यास्य अयमर्थः – नह् शब्दे यो हकारः तस्य धकारादेशः स्यात् झलि परे तथा च पदान्ते।

१११. सूत्रार्थः स्पष्ट एव।

**उपानत्** = उप पूर्वकात् नह् धातोः क्विपि सर्वापहारिलोपे 'नहिवृतिवृषिव्यधि रुचिसहितनिषु क्वौ' इत्यनेन उप इत्यकारस्य दीर्घे उपानह् इति प्रातिपदिकात् सौ तस्य हल्ङ्यादिलोपे 'नहो धः' इति सूत्रेण हस्य धकारे जश्त्वे विकल्पेन चर्त्वे 'उपानत्' इति। चर्त्वाभावे 'उपानद्' इति। पादत्राणम् इत्यर्थः।

**उपानत्सु** = उपानह् इत्यस्मात्प्रातिपदिकात् सप्तमीबहुवचने सुपि 'नहो धः' इति हकारस्य धकारादेशे 'खरि च' इति चर्त्वे 'उपानत्सु'।

**उष्णिक्** – छन्दो विशेषः। उत् पूर्वकात् स्निह् (ष्णिह्) धातोः क्विन्नन्तनिपातनात् सिद्धस्य उष्णिह् शब्दस्य प्रातिपदिकसंज्ञायां सौ तस्य हल्ङ्यादिलोपे 'क्विन्प्रत्ययस्य कुः' इति हकारस्य कुत्वेन घकारे जश्त्वे विकल्पेन चर्त्वे 'उष्णिक्' इति। चर्त्वाभावे 'उष्णिग्' इति।

**उष्णिग्भ्याम्** = उष्णिह् शब्दात् प्रातिपदिकात् भ्यामि 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां पदान्तत्वात् कुत्वेन हकारस्य घकारे जश्त्वे च उष्णिग्भ्याम् इति सिद्धम्।

**द्यौः** = दिव् शब्दात् प्रातिपदिकत्वात् सौ अनुबन्धलोपे 'दिव ओत्' इति वकारस्य औत्वे दि औ स् इति जाते यणि सस्य रुत्वे विसर्गे 'द्यौः' इति।

**चतस्रः** = स्त्रीत्वविवक्षायां चतुर्शब्दात् प्रथमायाः बहुवचने जसि अनुबन्धलोपे 'त्रिचतुरोः स्त्रियां तिसृचतसृ' इति चतुरः स्थाने चतसृआदेशे यणि सस्य रुत्वे विर्से 'चतस्रः' इति।

**चतसृणाम्** = चतुर् प्रातिपदिकात् आमि चतुरः स्थाने चतसृ आदेशे रेफादेशं प्रबाध्य 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन 'इति वार्तिकनियमात् नुटि अनुबन्धलोपे 'नामि' इति प्राप्तस्य दीर्घस्य 'न तिसृचतसृ' इत्यनेन निषेधे 'ऋर्णान्नस्य णत्वं वाच्यम्' इति वार्तिकेन णत्वे 'चतसृणाम्'।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**११२. यः सौ ७/२/११०**

इदमो दस्य यः स्यात् सौ। इयम्। त्यदाद्यत्वम्। पररूपत्वम्। टाप्। दश्चेति मः। इमे। इमाः। इमाम्। अनया। हलिलोपः। आभ्याम्। आभिः। अस्यै। अस्याः - २। अनयोः२। आसाम्। अस्याम्। आसु। त्यदाद्यत्वम्। टाप्। स्या। त्ये। त्याः। एवं तद्, यद्, एत- दित्यादयः। वाक्-वाग्। वाचौ। वाचः। वाग्भ्याम्। वाक्षु। अप्शब्दो: नित्यं बहुवचनान्तः। अप्तृन्निति दीर्घः। आपः। अपः।

**११३. अपो भिः ७/४/४८**

अपस्तकारः स्याद् भादौ प्रत्यये परे। अद्भिः। अद्भ्यः। अद्भ्यः। अपाम्। अप्सु। दिक्-दिग्। दिशौ। दिशः। दिग्भ्याम्। त्यादिष्विति दृशेः क्विन् विधानादन्यत्रापि कुत्वम्। दृक्-दृग्। दृशौ। दृग्भ्याम्। त्विट्, त्विड्। त्विषौ।त्विड्भ्याम्। ससजुषोरुरिति रुत्वम्। सजूः। सजुषौ। सजूर्भ्याम्। आशीः। आशिषौ। आशीर्भ्याम्।

असौ। उत्वमत्वे। अमू२। अमुया। अमूभ्याम्३। अमूभिः। अमुष्यै। अमुभ्यः। अमुष्याः२। अमुयोः२। अमूषाम्। अमुष्याम्। अमूषु।

।। इति हलन्तस्त्रीलिङ्गप्रकरणम्।।

---

११२. 'इदमो मः' इत्यतः इदमः 'दश्च' इत्यतो दः इत्यनुवर्तते। तदाह सूत्रार्थः - सु विभक्तिपरतः इदम् शब्दस्य यो दकारः तस्य स्थाने यादेशः स्यात्।

**इयम्** = इदम् शब्दात् प्रातिपदिकात् सौ 'त्यदादीनामः' इति अत्वं प्रबाध्य 'इदमो मः' इति मत्वे 'यः सौ' इति दस्य यकारे हल्ङ्यादिलोपे 'इयम्'।

**अनया** = इदम् शब्दस्य प्रातिपदिकसञ्ज्ञायां टा विभक्तौ त्यदाद्यत्वे पररूपे इद आ इति जाते स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे इदा आ इति स्थिते 'अनाप्यकः' इति इद्भागस्य अनादेशे 'आङि चापः' एत्वे अयादेशे 'अनया' इति।

**अस्याः** - इदम् शब्दात् प्रातिपदिकात् ङसि अनुबन्धलोपे त्यदाद्यत्वे, पररूपे टापि सवर्णदीर्घे 'सर्वनामः स्याड्ढ्रस्वश्च' इत्यनेन स्याडागमे ह्रस्वे च कृते 'हलिलोपः' इति इद् भागस्य लोपे सवर्णदीर्घे सस्य रुत्वे विसर्गे च 'अस्याः' इति।

**स्या** - त्यद् शब्दात् प्रातिपदिकत्वात् सु विभक्तौ अत्वे पररूपे स्त्रीत्वविवक्षायां टापि सवर्णदीर्घे 'तदोः सः सावनन्त्ययोः' इत्यनेन आदौ स्थितस्यतकारस्य सकारे सुलोपे 'स्या' इति।

**वाक्षु** - वाच् शब्दात् प्रातिपदिकात् सप्तमीबहुवचने सुपि 'स्वादिष्वसर्वनामस्थाने' इति पदसञ्ज्ञायां कुत्वे 'आदेशप्रत्यययोः' इत्यनेन सस्य षत्वे क् षसंयोगे क्षत्वे 'वाक्षु' इति सिद्धम्।

**आपः** - अप् शब्दात् जसि अनुबन्धलोपे 'अप्तृन्तृच्.' इत्यादिना सूत्रेण अपः अकारस्य दीर्घे सस्य रुत्वे विसर्गे च 'आपः'।

११३. 'अच उपसर्गात्तः' इत्यतो त इत्यनुवर्तते। इदं सूत्रम् अङ्गाधिकारे अस्ति।

**सरलार्थः** - भकारादिप्रत्यये परे अङ्गरूपस्य अपः पकारस्य स्थाने तकारादेशः स्यात्।

**अद्भिः** - अप् शब्दात् प्रातिपदिकात् तृतीयायाः बहुवचने भिस् प्रत्यये 'अपो भि' इत्यनेन पकारस्य तकारादेशे जश्त्वे सस्य रुत्वे विसर्गे च कृते 'अद्भिः' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ हलन्तनपुंसकलिङ्गप्रकरणम्

स्वमोर्लुक्। दत्वम्। स्वनडुत् - स्वनडुद्। स्वनडुही। चतुरनडुहोरित्याम्। स्वनड्वांहि। पुनस्तद्वत्। शेषं पुंवत्। वाः। वारी। वारि। वार्भ्याम्। चत्वारि। किम्। के। कानि। इदम्। इमे। इमानि। वा. - (अन्वादेशे नपुंसके वा एनद् वक्तव्यः)। एनत्, एनद्। एने। एनानि। एनेन। एनयोः। अहः। विभाषा ङिश्योः। अह्नी, अहनी। अहानि।

---

**दिक्-दिग्** - दिश् धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इत्यनेन क्विनि तस्य सर्वापहारिलोपे दिश् शब्दात् प्रातिपदिकत्वात् सौ तस्य हल्ङ्यादिलोपे ''व्रश्चभ्रस्जसृजमृज.'' इत्यादिना शस्य षकारे जत्वेन डकारे 'क्विन्प्रत्ययस्य कुः' इति कुत्वेन डकारस्य गकारे विकल्पेन चर्त्वे 'दिक्' इति। चर्त्वाभावे 'दिग्' इति। **सजूः** = सजुष् शब्दात् प्रातिपदिकात् सौ तस्य हल्ङ्यादिलोपे 'ससजुषो रुः' इति षस्य रुत्वे अनुबन्धलोपे 'र्वोरुपधाया दीर्घ इकः' इति उकारस्य दीर्घे रेफस्य विसर्गे 'सजूः' इति।

**आशीर्भ्याम्** - आशिष्शब्दात् प्रातिपदिकसंज्ञायां भ्याम् प्रत्यये ''स्वादिष्वसर्वनामस्थाने'' इति पदसंज्ञायां षत्वस्य असिद्धत्वात् सस्य रुत्वे ''र्वोरुपधाया दीर्घ इकः'' इति दीर्घे सिद्धम्। **अमू** = अदस् शब्दात् प्रातिपदिकात् औ विभक्तौ अत्वे पररूपे च अद औ इत्यवस्थायां टापि सवर्णदीर्घे 'प्रथमयोः पूर्वसवर्णः' इति पूर्वसवर्णदीर्घे 'अदसोऽसेर्दादु दो मः' इति दकारस्य मकारे आकारस्य च ऊत्वे 'अमू' इति। **अमूभ्याम्** = अदस् शब्दात् भ्यामि त्यदाद्यत्वे 'अतो गुणे' इति पररूपे टापि सवर्णदीर्घे 'अदसोऽसेर्दादु दो मः' इति ऊत्वे मत्वे च कृते 'अमूभ्याम्' इति सिद्धम्। **अमुष्यै** = अदस् शब्दात् चतुर्थ्येकवचने ङे विभक्तौ अनुबन्धलोपे त्यदाद्यत्वे पररूपत्वे च टापि सवर्णदीर्घे 'सर्वनाम्नः स्याड्ढ्रस्वश्च' इति स्याडागमे आपो ह्रस्वे च कृते 'वृद्धिरेचि' इति वृद्धौ अदस्यै इति स्थिते उत्वे मत्वे च कृते 'आदेशप्रत्यययोः' इति षत्वे 'अमुष्यै' इति।

॥ इति हलन्तस्त्रीलिङ्गप्रकरणम् ॥

**स्वनडुत् - स्वनडुद्** - स्वनडुह् शब्दात् प्रातिपदिकात् सौ 'स्वमोर्नपुंसकात्' इति सुलोपे 'वसुस्रंसुध्वंस्वनडुहां दः' इति हकारस्य स्थाने दकारे विकल्पेन चर्त्वे स्वनडुत् - स्वनडुद् इति सिद्धम्।

**स्वनड्वांहि** = स्वनडुह् शब्दात् प्रातिपदिकसंज्ञायां जसि 'जश्शसोः शिः' इति जसः शि आदेशे अनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थान संज्ञायां 'चतुरनडुहोरामुदात्तः' इति आमागमे अुनबन्धलोपे स्वनडु आ ह् इ इति जाते यणि 'नपुंसकस्य झलः' इति नुमि अनुबन्धलोपे नकारस्य अनुस्वारे 'स्वनड्वांहि' इति सिद्धम्।

**अहः** = अहन् शब्दात् प्रातिपदिकसञ्ज्ञायां सौ तस्य 'स्वमोर्नपुंसकात्' इति सुलोपे 'रोऽसुपि' इति नकारस्य रेफे रेफस्य विसर्गे च 'अहः' इति रूपम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

११४. **अहन् ८/२/६८**

अहन्नित्यस्य रुः स्यात् पदान्ते। अहोभ्याम्। दण्डि। दण्डिनी। दण्डीनि। दण्डिना। सुपथि। टेर्लोपः। सुपथी। सुपन्थानि। ऊर्क्-उर्ज्। ऊर्जी। ऊन्र्जि नरजानां संयोगः। तत्। ते। तानि। यत्। ये। यानि। एतत्। एते। एतानि। गवाक् – गवाग्। गोची। गवाञ्चि। पुनस्तद्वत्। गोचा। गवाग्भ्याम्। शकृत्। शकृती। शकृन्ति। ददत् ददती।

११५. **वा नपुंसकस्य ७/१/७९**

अभ्यासात्परो यः शता तदन्तस्य क्लीबस्य वा नुम् स्यात्, सर्वनामस्थाने। ददन्ति, ददति। तुदत्।

११६. **आच्छीनद्योर्नुम् ७/१/८०**

अवर्णादङ्गात्परो यः शतुरवयवस्तस्य नुम् वा शीनद्योः। तुदन्ती तुदती। तुदन्ति। पचत्।

११७. **शप्श्यनोर्नित्यम् ७/१/८१**

शप्श्यनोरात् परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्यात् शीनद्योः। पचन्ती। पचन्ति। दीव्यत्। दीव्यन्ती। दीव्यन्ति। धनुः। धनुषी। सान्तेति दीर्घः। नुम्विसर्जनीयेति षः। धनूंषि। धनुषा। धनुर्भ्याम्। एवं चक्षुर्हविरादयः। पयः। पयसी। पयांसि। पयसा। पयोभ्याम्। सुपुम्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्यम्। ऊत्वमत्वे। अमू। अमूनि। शेषं पुंवत्।

॥ इति हलन्तनपुंसकलिङ्गप्रकरणम् ॥

---

११४. **सरलार्थः** = अहन् शब्दस्य नकारस्य स्थाने रुः स्यात् पदान्ते।

**अहोभ्याम्** – अहन् शब्दात् प्रातिपदिकात् भ्यामि 'स्वादिष्वसर्वनामस्थाने' इत्यनेन पदसंज्ञायां पदान्तत्वात् 'अहन्' इति सूत्रेण नस्य रुत्वे 'हशि च' इति रेफस्य उत्वे गुणे 'अहोभ्याम्'।

**सुपन्थानि** – सुपथिन् शब्दात् जशि/शसि अनुबन्धलोपे 'जश्शसोः शिः' इति जसः शसः शि आदेशे अनुबन्धलोपे 'शि सर्वनामस्थानम्' इत्यनेन सर्वनामस्थानसंज्ञायां 'इतोऽत्सर्वनामस्थाने' इति अकारे सुपथन् इ इति जाते 'थोन्थः' इति न्थादेशे उपधादीर्घे 'सुपन्थानि' इति।

**गवाक्** – गाम् अञ्चतीति गवाक्। क्विन्प्रत्ययान्तस्य गवाच् शब्दस्य प्रातिपदिकसंज्ञायां सौ तस्य हल्ङ्यादिलोपे कुत्वे जश्त्वे तस्य विकल्पेन चर्त्वे 'गवाक्' इति। चर्त्वाभावे 'गवाग्' इति।

**विशेषः** – अस्य शब्दस्य रूपविषये शास्त्रेषु बहुविलिखितम्।

११५. **सरलार्थः** – सर्वनामस्थाने परे अभ्यस्तसञ्ज्ञकाद् परो यः शतृप्रत्ययः तदन्तस्य नपुंसकस्य अङ्गस्य विकल्पेन नुमागमो भवति।

**ददन्ति** – ददत् शब्दात् प्रातिपदिकात् जसि विभक्तौ 'जश्शसोः शिः' इति जसः शि आदेशे अनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'वा नुपंसकस्य' इति विकल्पेन नुमि अनुस्वारे परसवर्णे 'ददन्ति' इति, नुमभावे – ददति इति रूपद्वयं सिद्धम्।

११६. **सूत्रार्थः** – अवर्णात् अङ्गात् परः यः शतृप्रत्ययः, तस्य यः अवयवः तस्य नुम् भवति शीनद्योः परयोः सत्योः। **तुदन्ती** – तुदत् शब्दात् प्रातिपदिकात् औ विभक्तौ 'नपुंसकाच्च' इति औ स्थाने शी आदेशे अनुबन्धलोपे 'आच्छीनद्योर्नुम्' इति विकल्पेन नुमागमे अनुस्वारे परसवर्णे 'तुदन्ती'। नुमागमाभावे – तुदती इति रूपम्।

११७. 'आच्छीनद्योर्नुम्' इति अनुवर्तते, 'नाभ्यस्ताच्छतुः' इत्यतः शतुः इत्यनुवर्तते। अवयव इत्यस्य अध्याहारः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

---

तदा सूत्रार्थः – शप्श्यन्सम्बन्धिनः अवर्णात् परः शतृप्रत्ययस्य अवयवः, तदन्तस्य नुमागमो भवति नित्यं शी नदी च परे।

**पचन्ती** – इत्युदाहरणं शी परे नुमागमे सति पचन्ती इति।

**दीव्यन्ति** – दिव् धातोः लटः शतरि श्यनि 'हलि च' इति दीर्घे दीव्यत् शब्दात् जसि विभक्तौ जसः शि इत्यादेशे सर्वनामस्थानसंज्ञायां 'नपुंसकस्य झलचः' इति नुमागमे दीव्यन्ति।

**सुपुमांसि** – सुपुंस् शब्दात् प्रातिपदिकात् जसि जसः शि इत्यादेशे अनुबन्धलोपे 'शि सर्वनामस्थानम्' इति सर्वनामस्थानसंज्ञायां 'पुंसोऽसुङ्' इति असुङ्आदेशे सुपुमस् इ इति जाते 'नपुंसकस्य झलचः' इति नुमागमे 'सान्तमहतः संयोगस्य' इति दीर्घे नस्यानुस्वारे सुपुमांसि।

**अदः** – अदस् शब्दात् सौ तस्य लुकि लुका लुप्तत्वेन प्रत्ययलक्षणाभावात् 'अदस औ सुलोपश्च' इति न प्रवर्तते, मत्वोत्वमपि न भवति अदस् इति जाते सस्य रुत्वे विसर्गे 'अदः'।

**॥ इति हलन्तनपुंसकलिङ्गप्रकरणम् ॥**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ॥ अथ अव्ययप्रकरणम् ॥

१. **स्वरादिनिपातमव्ययम् १/१/३७**

स्वरादयो निपाताश्च अव्ययसंज्ञा: स्यु:। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस् शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायम्। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तम्। नञ्। हेतौ। इद्धा। अद्धा। सामि। वत्। ब्राह्मणवत्। क्षत्रियवत्।। सना। सनत्। सनात्। उपधा। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कम्। शम्। सहसा।। विना। नाना। स्वस्ति। स्वधा। अलम्। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकम्। प्रवाहिका। आर्यहलम्। अभीक्ष्णम्। साकम्। सार्धम्। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। मा। माङ्। आकृतिगणोऽयम्। च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। नह। हन्त। माकि:। माकिम्। नकि: नकिम्। माङ्। नञ्। यावत्। तावत्। त्वै। द्वै। न्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वषट्। तुम्। तथाहि। खलु। किल। अथो। अथ। सुष्ठु। स्म। आदह।

**'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च' ( गणसूत्रम् )**

अवदत्तम्। अहंयु:। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शुकम्। यथा कथा च। पाट्। प्याट्। अङ्ग। है। हे। भो:। अये। द्य। विषु। एकपदे। युत्। आत:। चादिरप्याकृतिगण:।

---

१. स्वर् आदि: येषां ते स्वरादय: स्वरादयश्च निपाताश्च इति समाहारद्वन्द्व:। न व्येति इति अव्ययम् अथवा अविद्यमानो व्यय: विकार: यस्मिन् तद् अव्ययम्। अस्य सूत्रार्थ: = स्वरादिगणे पठितानां शब्दानां निपातानां च अव्ययसञ्ज्ञा स्यात्।इदानीं स्वरादीनाम् अर्था: कथ्यन्ते – स्वर् = स्वर्गे परलोके च। अन्तर् = मध्ये।। प्रातर्। = प्रत्यूषे (प्रात: काले)। पुनर् = अप्रथमे, विशेषे च। सनुतर् = अन्तर्धाने। उच्चैस् = महति। नीचैस् = अल्पे। शनै: = क्रियामान्द्ये। ऋधक्–सत्ये। ऋते=बिना। युगपत् = एककाले। आरात् = दूरे समीपे च। पृथक् = भिन्ने। ह्यस् = अतीते दिवसे। श्वस् = अनागते दिवसे। दिवा = दिवसे। रात्रौ = निशि। सायम् = सायंकाले। चिरम् = विलम्बे। मनाक् = अल्पे। ईषत् = अत्यल्पे। जोषम् = सुखे मौने च। तूष्णीम् = मौने। बहिस् = बाह्ये। अवस् = बाह्ये। समया = समीपे मध्ये च। निकषा = अन्तिके। स्वयम् = आत्मनेत्यर्थे। वृथा = व्यर्थे। नक्तम् = रात्रौ। नञ् = निषेधे। हेतौ = निमित्ते। इद्धा = प्रकाश्ये। अद्धा = स्पष्टे अवधारणे च। सामि = अर्धे जुगुप्सिते च। वत् = तुल्येऽर्थे तद्धितप्रत्यय: तस्य ब्राह्मणवत् ब्राह्मणतुल्ये। क्षत्रियवत् = क्षत्रियतुल्ये, इत्युदाहरणे स्त:। सना–सनत्–सनात् = नित्ये। उपधा–भेदे। तिरस् = अन्तर्धौ तिर्यगर्थे पराभवे च। अन्तरा = मध्ये विनार्थे च। अन्तरेण = बिना। ज्योक् = कालाधिक्ये, प्रश्ने शीघ्रे, सम्प्रत्यर्थे च। कम् = जले शिरसि निन्दायां सुखे च। शम् = सुखे। सहसा = आकस्मिके। विना = वर्जने। नाना = अनेके विनार्थे च। स्वस्ति = मङ्गले। स्वधा = पितृहविर्दाने च। अलम् = भूषणे वारणे निषेधे शक्तौ पर्याप्त्यर्थे च। वषट्, श्रौषट्, वौषट् = एतत्त्रयं देवहविर्दाने। अन्यत् = अन्यार्थे। अस्ति = सत्तायाम्। उपांशु = अप्रकाशोच्चारणे रहस्ये च। क्षमा = क्षान्तौ। विहायसा = आकाशे। दोषा = रात्रौ। मृषा मिथ्या = एतद्द्वयं वितथेऽर्थे। मुधा = व्यर्थे। पुरा = अविरते चिरातीते भविष्यदासन्ने च। मिथो मिथस् = एतौ रहसि सहार्थे च। प्रायस् = बाहुल्ये। मुहुस् = पुनरर्थे।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२.  **तद्धितश्चासर्वविभक्तिः १/१/३८**

यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययम् स्यात्। परिगणनं कर्तव्यम् = तसिलादयः प्राक्पाशपः, शस्प्रभृतयः प्राक्समासान्तेभ्यः, अम्, आम् कृत्वोऽर्थाः, तसिवती, नानाञौ एतदन्तमव्ययम्।

---

साक्षात् = प्रत्यक्षे। सपदि = शैघ्र्ये। ओम् = अङ्गीकारे ब्रह्मणि च। संवत् = वर्षे। सुदि = शुक्लपक्षे। वदि = कृष्णपक्षे। सु = पुजायाम्। अथ चादीनामर्थाः निरूप्यन्ते च समुच्चये च। ह = प्रसिद्धौ। अह = अद्भुते खेदे च। शश्वत् = नित्ये, पौनः पुन्ये सहार्थे च। युगपत् = एककाले। भूयस् = पुनः आधिक्ये च। कूपत् = प्रश्ने प्रशंसायां च। कुवित् = भूर्यर्थे. प्रंशसायां च। नेत् = शङ्कायां, प्रतिषेधे, विचारे, समुच्चये च। चेत् = यदि। चण = चेदर्थे। कच्चित् = इष्टप्रश्ने। यत्र = अनवक्लृप्तौ। अमर्षे, गर्हायाम् आश्चर्ये। नह = प्रत्यारम्भे। हन्त = हर्षे विषादे, अनुकम्पायां वाक्यारम्भे च। माकिः माकिम्, नकिः, नकिम् = एते चत्वारो वर्जने। माङ् - नञ् = एतौ स्वरादिषुक्तौ। यावत् तावत् = एतौ द्वौ अवधौ, साकल्ये, माने, अवधारणे च। त्वै = विशेषे, वितर्के च। द्वै - नवै = वितर्के, त्वै इति पाठान्तरम्। रै = दाने अनादरे च।।श्रौषट् - वौषट्, स्वाहा = एते देवहविर्दाने। स्वधा = पितृदाने। तुम् = तुङ्कारे। तथा हि = निदर्शने। खलु = निषेधे, वाक्ये, अलङ्कारे, निश्चये च। किल = वार्तायाम्, अलीके च। अथो, अथ = एतद्द्वयं मङ्गले, आरम्भे, प्रश्ने, अधिकारे, प्रतिज्ञायाम्, अनन्तरे च। सुष्ठु = प्रशंसायाम्। स्म = अतीते, पादपूरणे च। आदह = उपक्रमे हिंसायां कुत्सने च। इदं गणसूत्रं चादिगणे वर्तते। अस्यार्थः = ये शब्दाः उपसर्गप्रतिरूपकाः, विभक्त्यन्तप्रतिरूपकाः, स्वरप्रतिरूपकाश्च सन्ति ते चादिगणे वर्तन्ते। यथा उपसर्गप्रतिरूपकस्य उदाहरणम् = अवदत्तम् इत्यत्र अव इत्यस्य अनुपसर्गत्वात् ''अच उपसर्गात्तः'' इति सूत्रेण न दकारस्य तकारः। विभक्त्यन्तप्रतिरूपकश्च उदाहरणं अहंयु = अहङ्कारी, अस्तिक्षीरा इत्यत्र अस्ति इति तिङ् सदृशम्। स्वरप्रतिरूपकानाम् उदाहरणानि = अ = सम्बोधने। आ = वाक्ये स्मरणे च। इ = सम्बोधने, जुगुप्सायाम्, विस्मये च। ई, उ, ऊ, ए, ऐ, ओ, औ = सम्बोधने। पशु = सम्यगर्थे। शुकम् = शीघ्रतायाम्। यथाकथा च =अनादरे। पाट्, प्याट्, अङ्ग, है, हे, भोः अये = एतेऽपि सम्बोधने। द्य = हिंसायाम् प्रतिलोम्ये, पादपूरणे च। निषु = नानार्थे। एकपदे = अकस्मात्। युत् = कुत्सायाम्। आतः इतोऽर्थे। चादिगणे लोकप्रयोगानुसारेण अन्येऽपि शब्दाः ज्ञेयाः यथा = आहोस्वित् = विकल्पेन। अनु = वितर्के। हुम् = भर्त्सने। इव = सादृश्ये इत्यादयः।

२.  सम्प्रति स्वरादेः चादेः भिन्नानि अव्ययानि निरूप्यन्ते

**तद्धितः च असर्वविभक्तिः** इति पदच्छेदः। असर्वा विभक्तिः यस्मात् स असर्वविभक्तिः इति बहुव्रीहिः समासः। तद्धितः अस्ति प्रत्ययः अतः तदन्तग्रहणेन सूत्रस्य

**अयमर्थः** - येन तद्धितान्तेन वचनत्रयात्मिका सर्वा विभक्तिः नोत्पद्यते किन्तु एकवचनानि एवोत्पद्यन्ते तस्य तद्धितान्तस्य अव्ययसञ्ज्ञा भवति।

**परिगणनम्** - एतद् वार्तिकम्। उक्तसूत्रेण येषां तद्धितान्तानां अव्ययसञ्ज्ञा तेषां परिगणनं विधेयम्। तसिलादयः - पञ्चम्यास्तसिल् इत्यारभ्य द्वित्यो श्च धमुञ् इत्यन्ताः तद्धितान्ताः।

**शस् प्रभृतयः** - 'बह्वाल्पार्थाच्छस्कारकादन्यतरस्याम्' इत्यारभ्य 'अव्यक्तानुकरणाद्द्वयजवरार्धादनितौ डाच्' इत्यन्ताः तद्धितान्ताः, अम्, आम् इति तद्धितान्ताः, कृत्वोऽर्थाः = कृत्वसुच् इत्यादि तद्धितप्रत्ययान्ताः। तसिवती = तसि च वति च तद्धितान्ताः, नानाञौ = ना नाञ् च तद्धितान्ताः उक्तसूत्रस्य विषयाः तेषाम् एव अव्ययसञ्ज्ञा भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. **कृन्मेजन्तः १/१/३९** कृद्यो मान्तः एजन्तश्च तदन्तमव्ययम् स्यात्। स्मारं – स्मारम्। जीवसे। पिबध्यै।

४. **क्त्वातोसुन्कसुनः १/१/४०** एतदन्तमव्ययं स्यात्। कृत्वा। उदेतोः। विसृपः।

५. **अव्ययीभावश्च १/१/४१** अधिहरि।

६. **अव्ययादाप्सुपः २/४/८२**

अव्ययाद् विहितस्यापः सुपश्च लुक्स्यात्। तत्र शालायाम्। **सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥ वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोः। आपं चैव हलन्तानां यथा वाचा निशा दिशा॥** वगाहः, अवगाहः। पिधानम्, अपिधानम्।

**॥ इति अव्ययप्रकरणम् ॥**

---

३. कृद् मेजन्तः इति पदच्छेदः। म् च एच्च मेचौ तौ अन्ते यस्य इति बहुव्रीहिः। केवलस्य कृतः प्रयोगो न भवति। अतः तदन्तविधिः तदा सूत्रस्य अयमर्थः कृद् यो मान्तशब्दः एजन्तश्च तदन्तस्य अव्ययसञ्ज्ञा स्यात्।

**स्मारं – स्मारम्** = स्मृ धातोः 'आभीक्ष्ण्ये णमुल् च' इति णमुलि वृद्धौ रपरत्वे 'नित्यं वीप्सयोः' इत्यनेन द्वित्वे प्रातिपदिकत्वात् सौ 'कृन्मेजन्तः' इति मान्तत्वेन अव्ययसंज्ञायां 'अव्ययादाप्सुपः' इति सुपो लुकि स्मारं स्मारम् इति रूपं सिद्धम्। अस्यार्थः – स्मृत्वा – स्मृत्वा इति।

**जीवसे** = जीव् धातोः 'तुमर्थेसेसेनसे असेन्क्सेक्सेनध्यै अध्यैन्शध्यैशध्यैन् तवैतवेङतवेनः' इति सूत्रेण असे प्रत्यये प्रातिपदिकत्वात् सौ 'कृन्मेजन्तः' इति अव्ययसंज्ञायां 'अव्ययादाप्सुपः' इति सुब्लुकि जीवसे इति सद्धिम्।

**पिबध्यै** = पा धातोः 'तुमर्थेसेसेनसे ....' इति सूत्रेण शध्यै प्रत्यये अनुबन्धलोपे सार्वधातुकसंज्ञायां पा स्थाने पिब आदेशे वारद्वयं पररूपे पिबध्यै इत्यस्य प्रातिपदिकत्वात् सु प्रत्यये 'कृन्मेजन्तः' इति अव्ययसंज्ञायां सुब्लुकि पिबध्यै इति सिद्धम्।

४. **सूत्रार्थः** = क्त्वाप्रत्ययान्तस्य तोसुन्प्रत्ययान्तस्य कसुन्प्रत्ययान्तस्य च अव्ययसञ्ज्ञा भवति।

**कृत्वा** = कृ धातोः 'समानकर्तृकयोः पूर्वकाले' इति क्त्वा प्रत्यये अनुबन्धलोपे कित्वाद् गुणनिषेधे प्रातिपदिकसञ्ज्ञायां सौ 'क्त्वातोसुन्कसुनः' इति सूत्रेण अव्ययसञ्ज्ञायां सुलोपे 'कृत्वा' इति।

**उदेतोः** = उत्पूर्वकात् इण् धातोः 'भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्' इति सूत्रेण तोसुन् प्रत्यये अनुबन्ध लोपे गुणे प्रातिपदिकत्वात् सौ 'क्त्वातोसुन्कसुनः इति सूत्रेण अव्ययसंज्ञायां सुब्लुकि सस्य रुत्वे विसर्गे च कृते 'उदेतोः' इति सिद्धम्।

**विसृपः** = वि पूवकात् सृप् धातोः 'सृपितृदोःकसुन्' इति कसुन् प्रत्यये अनुबन्धलोपे कित्वाद् गुणनिषेधे प्रातिपदिकसंज्ञायां सौ 'क्त्वातोसुन्कसुनः' इत्यनेन अव्ययत्वात् सुलोपे सस्य रुत्वे विसर्गे विसृपः इति रूपं सिद्धम्।

५. **सूत्रार्थः** – अव्ययीभावसमासस्य अपि अव्ययसञ्ज्ञा भवति। अधिहरि = हरौ इति विग्रहे 'अव्ययं विभक्ति ...' इति विभक्त्यर्थे अव्ययीभावसमासे समासादिकार्ये अधिहरि इत्यस्य प्रातिपदिकसञ्ज्ञायां सु प्रत्यये 'अव्ययीभावश्च इति अव्ययसंज्ञायां सुपो लुकि 'अधिहरि' इति सिद्धम्।

६. **सूत्रार्थः** = अव्ययाद् विहितस्य आपः तथा च सुपः लुक् भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**तत्र शालायाम्** = तत्र इति पदं 'तद्धित श्चासर्वविभक्तिः' इति अव्ययसञ्ज्ञायाम् आपो लुक्,। स्त्रीत्वबोधनाय शालायाम्। त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु सर्वेषु वचनेषु च यद् विकारं न प्राप्नोति किन्तु सदृशम् एकप्रकारकमेव भवति तद् अव्ययम् इति कथ्यते। भुगरिः नामकः आचार्यः अव उपसर्गे अपि उपसर्गे च अलोपं करोति तथा च हलन्तशब्देभ्यः अपि आप् (टाप्) प्रत्ययं करोति। यथा – वगाहः पिधानम् इत्यत्र अव अपि उपसर्गयोः अकारस्य लोपो भवति। पाणिनिमते तु अवगाहः अपिधानम् इति। वाच् शब्दात् तथा च निश् शब्दात् टापि वाचा निशा इति। पाणिनि मते तु न टाप्।

**॥ इति अव्ययप्रकरणम् ॥**

## अभ्यासप्रश्नाः

### हलन्तपुँल्लिङ्गे

१. निम्नाङ्कितप्रयोगाः यथाविधि साधनीयाः –

लिट्, लिट्त्सु, धुक्षु, विश्वौहः, अनड्वान्, सुद्यौः, अयम्, इमे, अनेन, कः, के, अनयोः, एनयोः, राजा, राज्ञः, राज्ञि, वृत्रघ्नः, मघोनः, यूनः, पन्थाः, अष्टौ, राट्।

२. अधोलिखितेषु विंशतिः प्रयोगाः साध्याः –

सः, ते, एषः, त्वम्, अहम्, यूयम्, वयम्, युष्मान्, अस्मान्, तव, मम, युष्माकम्, अस्माकम्, प्राचः उदीचः, भवान्, तादृक्, पिपठीषु, पुमान्, विदुषः, असौ, अमू, अमुष्मै, अमीषाम्।

### हलन्तस्त्रीलिङ्गे

३. निम्नाङ्कितरूपाणि साधयत –

उपानत्, इयम्, अस्याः, आपः, अद्भिः, वाक्षु, आसाम्, अस्याम्, के, चतस्रः, गीः, दिक्, सजूः, अमूः, अमुया।

### हलन्तनपुंसकलिङ्गे

४. वाः, चत्वारि, कानि, इमे, दण्डिनी, तानि, गवाञ्चि, ददन्ति, धनुषी, पयांसि, अदः, अमूनि, अहानि एषु दश प्रयोगाः साधुत्वं नेयाः।

### अव्ययप्रकरणे

५. अधस्तात् लिखितानाम् अव्ययानाम् अर्थः लेखनीयः।स्वर्, अन्तर्, मिथस्, नूनम्, भूयस्, चेत्, यत्र, युगपत्, शश्वत्, अथ, तिरस्, निकषा, पृथक्, सायम्, श्वस्, हिरुक्, आम्, एव, तथाहि।

६. कृन्मेजन्तः, तद्धितश्चासर्वविभक्तिः, सूत्रयोः सोदाहरणम् अर्थः लेख्यः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अथ स्त्रीप्रत्ययप्रकरणम्

१. **स्त्रियाम् ४/१/३**

अधिकारोऽयम्। समर्थानामिति यावत्।

२. **अजाद्यतष्टाप् ४/१/४**

अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्। अजा। एडका। अश्वा। चटका। मूषिका। बाला। वत्सा। होडा। मन्दा। विलाता। मेधा इत्यादि। गंगा। सर्वा।

३. **उगितश्च ४/१/६**

उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्। भवती। भवन्ती। पचन्ती। दीव्यन्ती।

---

१. अधिकारसूत्रम् एतत्। स्त्रियाम् इति भावप्रधानः निर्देशः अतः 'स्त्रीत्वे' इत्यर्थः। अयञ्च अधिकारः ''समर्थानां प्रथमाद्वा'' इति सूत्रात् प्राग् इति। वक्ष्यामाणाः प्रत्ययाः स्त्रीत्वे भविष्यन्ति इति भावः।

२. अजः आदि येषां ते अजादयः। ते च अत् च इति समाहारद्वन्द्वात् षष्ठी अजाद्यतः। अनुवृत्तिलब्धं प्रातिपदिकात् इति षष्ठ्या विपरिणतं सत् अजादिभिःअता च इति विशिष्यते। अतः अजादीनाम् अकारान्तस्य च प्रातिपदिकस्य वाच्यं यत् स्त्रीत्वम् इत्यर्थः। स्त्रीत्वं हि प्रातिपदिकस्य अर्थः, टाबादिप्रत्ययैः तु द्योत्यते, अत उक्तम् – तत्र (स्त्रीत्वे) द्योत्ये टाप् भवति।

**अजा** – अज इति प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''अजाद्यतष्टाप्'' इति सूत्रेण टाप्प्रत्यये ''चुटू'' इति सूत्रेण प्रत्ययाद्यस्य टकारस्य इत्संज्ञायां ''हलन्त्यम्'' इत्यनेन पकारस्य च इत्संज्ञायां कृतायां ''तस्य लोपः'' इति सूत्रेण तयोः (टकारपकारयोः) लोपे कृते अज+आ इति जाते 'अकः सवर्णे दीर्घः' इति सूत्रेण सवर्णदीर्घैकादेशे कृते अजा इति स्थितौ प्रथमाविभक्तौ एकवचने सुप्रत्ययेऽनुबन्धलोपे अजा+स् इति जाते ''अपृक्त एकाल्प्रत्ययः'' इत्यनेन सस्य अपृक्तसंज्ञायां जातायां 'हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्' इति सूत्रेण सस्य लोपे अजा इति सिद्धम्। अस्य रमाशब्दवत् रूपाणि।

**मूषिका** – मूषक इति प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''अजाद्यतष्टाप्'' इति टाप्प्रत्ययेऽनुबन्धलोपे मूषक+आ इति जाते ''प्रत्ययस्थात्कात्.'' इत्यादिना सूत्रेण ककारात्पूर्वस्य अकारस्य इकारे कृते मूषिक+आ इत्यत्र सवर्णदीर्घैकादेशे सौ विभक्तौ सस्य हल्ङ्यादिलोपे च कृते मूषिका इति सिद्धम्।

**सर्वा** – सर्वशब्दस्य स्त्रीत्वविवक्षायां टापि सर्वा इति रूपम्।

३. उक् इति प्रत्याहारः, तत्र उ ऋ लृ इति वर्णत्रयम्। उक् इत् यस्य तत् उगित्। उगितः इति पञ्चम्यन्तं पदम्, एतेन अनुवृत्त्या लब्धं प्रातिपदिकात् इति विशिष्यते, अतः तदन्तविधिना उगिदन्तात्प्रातिपदिकात् इति मूले उक्तम्। एतच्च उगित् द्विविधं प्रातिपदिकम्, प्रत्ययश्च। तत्र सर्वादिगणे पठितं भवतु इति अव्युत्पन्नं प्रातिपदिकम् तत्र भवत् इति शिष्यते, अस्य प्रातिपदिकस्य उगिदन्तत्वात् (व्यपदेशिवद्भावेन) अनेन सूत्रेण ङीप् प्रत्ययः भवति। तत्र ङीप्प्रत्यये ङकारपकारौ इत्संज्ञकौ, 'ई' इति अवशिष्यते। भवती इति। भवन्ती इति तु भूधातोः शतृप्रत्यये शपि 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे पररूपे भवत् इति शत्रन्तस्य ङीपि रूपम्। एवमेव पचन्ती इत्यत्रापि ज्ञेयम्। दीव्यन्ती इति दिवु धातोः शतरि श्यति दिव्यत् इति शब्दात् ङीपि नुमागमे च रूपम्।

**भवन्ती**–भूधातोः लटः शतृ-आदेशेऽनुबन्धलोपे शपि अनुबन्धलोपे भू अ अत् इत्यत्र गुणेऽवादेशे पररूपे भवत् इति शतृप्रत्ययान्तः शब्दः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. **टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः ४/१/१५**

अनुपसर्जनं यट्टिदादि तदन्तं यददन्तं प्रातिपदिकं ततः स्त्रियां ङीप्स्यात्। कुरुचरी। नदट् नदी। देवट् देवी। सौपर्णेयी। ऐन्द्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पञ्चतयी। आक्षिकी। प्रास्थिकी। लावणिकी। यादृशी। इत्वरी। (नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्)। स्त्रैणी। पौंस्नी। शक्तीकी। याष्टीकी। आढ्यङ्करणी। तरुणी। तलुनी।

५. **यञश्च ४/१/१६** यञन्तात् स्त्रियां ङीप्स्यात्। अकारलोपे कृते –

---

अस्य प्रातिपदिकसंज्ञायाम् उगित्त्वात् (शतृ इत्यस्य ऋकारस्य इत्त्वात्) स्त्रीत्वविवक्षायाम् ''उगितश्च'' इति सूत्रेण ङीप्प्रत्यये ''लशक्वतद्धिते'' इति सूत्रेण ङकारस्य ''हलन्त्यम्'' इति पकारस्य च इत्संज्ञायां लोपे च कृते भवत्+ई इति जाते ''शप्श्यनोर्नित्यम्'' इति सूत्रेण नुमागमेऽनुबन्धलोपे भवन्त्+ई = भवन्ती इति जाते प्रथमायाः एकवचने सुप्रत्यये अनुबन्धलोपे अपृक्तसंज्ञायां हल्ङ्यादिलोपे भवन्ती इति सिद्धम्।

**दीव्यन्ती** – शतृप्रत्ययान्तात् दीव्यत् इति प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''उगितश्च'' इति सूत्रेण ङीप्प्रत्ययेऽनुबन्धलोपे ''शप्श्यनोर्नित्यम्'' इति सूत्रेण नुमागमेऽनुबन्धलोपे अपृक्तसंज्ञायां हल्ङ्यादिलोपे ''दीव्यन्ती'' इति सिद्धम्।

४. ढ, अण्, अञ्, द्वयसच्, दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप् इति प्रत्ययाः, 'प्रत्ययग्रहणे तदन्ताः ग्राह्याः' इति ढादिप्रत्ययान्तानां ग्रहणम्। टित् इति तु प्रत्यय अप्रत्ययश्च। प्रत्ययस्तु यथा टः, तदन्तविधिद्वारा टित्प्रत्ययान्तस्य कुरुचरादिशब्दस्य ग्रहणम्। नदट् देवट् इत्यादिशब्दाः टितः पचादिगणपठिताः तेभ्यः अपि अयं विधिः। अतः टिदन्तात् टित्प्रत्ययान्तात् ढादिप्रत्ययान्तात् च प्रातिपदिकात् स्त्रियां ङीप्प्रत्ययः भवति। टप्रत्ययान्तः कुरुचरशब्दः ततः डीप् कुरुचरी। नदट् इति टित् ततः ङीप् नदी। एवमेव देवट् शब्दात् ङीपि देवी। सौपर्णेय इति ढक्प्रत्ययान्तः शब्दः, तस्मात् ङीपि सौपर्णेयी। ऐन्द्र इति अण्णन्तः शब्दः, ततः ऐन्द्री। औत्स इति अञन्तशब्दः, औत्सी। द्वयसच्प्रत्ययान्तात् ऊरुद्वयस् शब्दात् ङीप्, ऊरुद्वयसी। एवमेव ऊरुदघ्नी, ऊरुमात्री। तयप्प्रत्ययान्तः पञ्चतयशब्दः, तस्मात् ङीपि पञ्चतयी। ठगन्तः आक्षिकशब्दः, ततः आक्षिकी। ठञन्तः लावणिकशब्दः, ततः लावणिकी। कञ्प्रत्ययान्तः यादृशशब्दः तस्य स्त्रियां यादृशी इति। इत्वरशब्दः क्वरप्प्रत्ययान्तः तस्मात् ङीपि इत्वरी इति। नञ्, स्नञ् ईकक्, ख्युन् इति प्रत्ययाः, तदन्तेभ्यः प्रातिपदिकेभ्यः, तरुणतलुनप्रातिपदिकाभ्यां च स्त्रियां ङीप् भवतीति वक्तव्यम्। स्त्रैणी इति नञ्प्रत्ययान्तस्य स्त्रैणशब्दस्य रूपम्। पौंस्नी इति पौंस्नशब्दस्य। स्नञ्प्रत्ययान्तःअयम्। शाक्तीकः, याष्टीकः इति ईकक्प्रत्ययान्तौ, ताभ्यां ङीप् शाक्तीकी, याष्टीकी। आढ्यङ्करणः इति ख्युन् प्रत्ययान्तः, ततः ङीप् आढ्यङ्करणी इति।

**कुरुचरी** – कुरुषु चरति इति विग्रहे 'चरेष्टः' इति टप्रत्यये कुरुचर शब्दः। अस्य प्रातिपदिकसंज्ञायां स्त्रीत्वविवक्षायां टित्त्वात् ततः ''टिड्ढाणञ्.'' इत्यादिना सूत्रेण ङीप्प्रत्ययेऽनुबन्धलोपे कुरुचर+ई इति स्थितौ ''यचि भम्'' इत्यनेन भसंज्ञायां ''यस्येति च'' इतिसूत्रेण रेफोत्तरवर्तिन अकारस्य लोपे कुरुचर्+ई इति जाते प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे कुरुचरी+स् इति स्थिते सस्य अपृक्तसंज्ञायां ''हल्ङ्याब्भ्यो दीर्घात्.'' इत्यादिना अपृक्तस्य लोपे कुरुचरी इति सिद्धम्। एवमेव अन्यत्रापि प्रक्रिया ज्ञेया।

५. यञ् इति प्रत्ययः तद्धितः। प्रत्ययग्रहणेन तदन्तस्य ग्रहणम्। अतः यञन्तात् इति उक्तम्। गर्गस्य अपत्यं गार्ग्यः। अयं गार्ग्यशब्दः यञन्तः, अस्मात् स्त्रियां (गर्गस्य अपत्यं स्त्री इति) अनेन सूत्रेण ङीप् विधीयते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. **हलस्तद्धितस्य ६/४/१५०**

हलः परस्य तद्धितयकारस्योपधाभूतस्य लोप ईति परे। गार्गी।

७. **प्राचां ष्फ तद्धितः ४/१/१७**

यञन्तात् ष्फो वा स्यात् स च तद्धितः।

८. **षिद्गौरादिभ्यश्च ४/१/४१**

षिद्भ्यो गौरादिभ्यश्च स्त्रियां ङीष् स्यात्। गार्ग्यायणी। नर्तकी। गौरी। अनुडुही। अनड्वाही। आकृतिगणोऽयम्।

९. **वयसि प्रथमे ४/१/२०**

प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप्स्यात्। कुमारी।

---

गार्ग्य+ई इति स्थितौ भसंज्ञायां यस्येति च' इति अल्लोपे कृते गार्ग्य्+ई इति जाते

६. हलः परस्य उपधाभूतस्य तद्धितयकारस्य ईति (ईकारे) परे लोपः भवति। गार्ग्य्+ई इत्यत्र अलोपात् पूर्वं यकारस्य उपधाभूतत्वम् अस्ति इति ज्ञेयम्। अस्य यकारस्य लोपे गार्गी इति।

**गार्गी** – गर्गस्य अपत्यं इति विग्रहे निष्पन्नात् यञन्तात् गार्ग्य इति प्रातिपदिकात् स्त्रीत्वविवक्षायां ''यञश्च'' इति सूत्रेण ङीप्प्रत्ययेऽनुबन्ध लोपे गार्ग्य+ई इति जाते भसंज्ञायां ''यस्येति च'' इति सूत्रेण अकारस्य लोपे गार्ग्य्+ई इति स्थितौ ''हलस्तद्धितस्य'' इति सूत्रेण यकारस्य लोपे गार्गी इति स्थितौ सुविभक्तौ हल्ङ्यादिलोपे गार्गी इति सिद्धम्।

७. ष्फ इति लुप्तप्रथमाकं पदम्। प्राचां मते यञन्तात् शब्दात् स्त्रीत्वे ष्फः प्रत्ययः भवति। स च तद्धितः। तत्र 'षः प्रत्ययस्य' इति षस्य इत्संज्ञा। 'फ' इति अवशिष्यते तस्य ''आयनेयी.'' इत्यादिना आयनादेशः।

८. षिद्भ्यः गौरादिभ्यश्च स्त्रीत्वे ङीप् प्रत्ययः भवति।

**गार्ग्यायणी** – गार्ग्य इति यञन्तात् प्राचां मते ''प्राचां ष्फ तद्धितः'' इति सूत्रेण तद्धिते ष्फप्रत्यये ''षःप्रत्ययस्य'' इति षस्य इत्संज्ञायां ''तस्य लोपः''
इति लोपे गार्ग्य+फ इति स्थिते ''आयनेयीनीयियः फ ढ ख छ घां प्रत्ययादीनाम्'' इति सूत्रेण फस्य आयन् आदेशे गार्ग्य+आयन इति जाते सवर्णदीर्घे एकादेशे णत्वे गार्ग्यायण इत्यस्य तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां षित्त्वात् (ष्फ) स्त्रीत्वविवक्षायां ''षिद्गौरादिभ्यश्च'' इति सूत्रेण ङीष् प्रत्ययेऽनुबन्धलोपे च कृते गार्ग्यायण+ई इत्यत्र भसंज्ञायां 'यस्येति च' इति अलोपे गार्ग्यायणी इति जाते सुविभक्तौ अनुबन्धलोपे अपृक्तसंज्ञायां हल्ङ्यादिलोपे गार्ग्यायणी इति सिद्धम्।

**नर्तकी** – ष्वुन्प्रत्ययान्तः नर्तकशब्दः षित्। अस्मात् स्त्रीत्वविवक्षायां ङीषि अलोपे सोर्लोपे नर्तकी इति। अनडुह्शब्दः अपि गौरादिगणे, तस्मात् ङीषि अनुडही इति। ''आमनडुहः स्त्रियां वा'' इति वार्तिकेन विकल्पेन आमागमे अनड्वाही इत्यपि रूपम्।

९. प्रथमवयसः वाचकः यः अदन्तः शब्दः लब्धप्रातिपदिकसंज्ञः, तस्मात् स्त्रियां ङीप् प्रत्ययः भवति। **कुमारीः** – कुमार इति शब्दः प्रथमवयसः वाचकः। अस्य प्रातिपदिक संज्ञायां स्त्रीत्वविवक्षायाम् अस्मात् ''वयसि प्रथमे'' इति सूत्रेण ङीप्प्रत्ययेऽनुबन्धलोपे कुमार+ई इति जाते ''यचि भम्'' इति भसंज्ञायां 'यस्येति च' इति सूत्रेण



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. **द्विगोः ४/१/२१**

अदन्तात् द्विगोर्ङीप् स्यात्। त्रिलोकी। अजादित्वात् त्रिफला। त्र्यनीका सेना।

११. **वर्णादनुदात्तात्तोपधात्तो नः ४/१/३९**

वर्णवाची योऽनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् तकारस्य नकारादेशश्च। एता, एनी। रोहिता, रोहिणी।

१२. **वोतो गुणवचनात् ४/१/४४**

उदन्ताद् गुणवाचिनो वा ङीष् स्यात्। मृद्वी, मृदुः।

---

अकारस्य लोपे कुमार्+ई = कुमारी इति जाते सुविभक्तौ अनुबन्धलोपे अपृक्तसंज्ञायां ''हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्'' इति सूत्रेण अपृक्तसस्य लोपे कुमारी इति सिद्धम्।

१०. द्विगुः समासभेदः। ''संख्यापूर्वो द्विगुः'' इति। अदन्तात् द्विगोः ङीप्प्रत्ययः भवति।

**त्रिलोकी** – त्रयाणां लोकानां समाहारः इति विग्रहे 'तद्धितार्थोत्तरपदसमाहारे च' इति समासे कृते त्रिलोक इति अदन्तः द्विगुः। समासत्वात् प्रातिपदिकसंज्ञायां स्त्रीत्वविवक्षायां 'द्विगोः' इति सूत्रेण ङीप्प्रत्ययेऽनुबन्धलोपे त्रिलोक+ई इत्यत्र भत्त्वात् 'यस्येति च' इति अकारलोपे सुविभक्तौ हल्ङ्यादिलोपे त्रिलोकी इति सिद्धम्।

**प्रश्नः** – त्रयाणां फलानां समाहारः इति त्रिफला इत्यत्र कथन्न ङीप्? अत उच्यते अस्य त्रिफलशब्दस्य अजादिगणे समावेशात् ''अजाद्यतष्टाप्'' इति सूत्रेण टापि त्रिफला इति। अजादित्वात् टाबेव इति भावः। एवमेव 'त्र्यनीका' अत्रापि अजादित्वात् टाबेव न तु ङीप्।

११. वर्णाद्+अनुदात्तात्+तोपधात्+तः नः इतिच्छेदः। अनुदात्तात् इति वर्णात् इत्यस्य विशेषणम् अतः तदन्तविधिः। तकारः उपधा यस्य स तोपधः। वर्णवाचकः यः अनुदात्तान्तः तोपधः शब्दः तदन्ताद् अनुपसर्जनात् प्रातिपदिकात् विकल्पेन ङीप् विधीयते, तकारस्य नकारादेशश्चापि भवति। यत्र ङीप् भवति तत्रैव तकारस्य नकारः इति विशेषः। अतः ङीबभावे नकारादेशः अपि न भवतीति फलितम्।

**एनी, एता** – श्वेतवर्णस्य वाचकः एतशब्दः। अस्मात् एत इति प्रातिपदिकात् स्त्रीत्वविक्षायां ''वर्णादनुदात्तात्तोपधात्तो नः'' इति सूत्रेण विकल्पेन ङीप्प्रत्यये तकारस्य नकारादेशे च कृते एन+ई इति स्थितौ भत्त्वात् ''यस्येति च'' इति अकारलोपे एनी इति स्थितौ प्रथमायाः एकवचने सोः हल्ङ्यादि लोपे एनी इति सिद्धम्। ङीबभावे 'अजाद्यतष्टाप्' इति टापि हल्ङ्यादिलोपे एता इति अजावत् रूपम्।

१२. वा उतः गुणवचनात् इतिच्छेदः। प्रातिपदिकात् इति अनुवृत्तम्। उतः इति गुणवचनस्य प्रातिपदिकस्य विशेषणम् अतः तदन्तविधिः। उकारान्तात् गुणवचनप्रातिपदिकात् स्त्रीत्वे विकल्पेन ङीष् भवति। मृदु इति गुणवाचकः उकारान्तः शब्दः। अस्य प्रातिपदिकसंज्ञायाम् अनेन विभाषया ङीषिमृद्वी इति। तदभावे मृदुः इति।

**मृद्वी, मृदुः** – मृदु इति उदन्तात् गुणवचनप्रातिपदिकात् स्त्रीत्वविवक्षायां ''वोतो गुणवचनात्'' इति सूत्रेण विकल्पेन ङीष्प्रत्ययेऽनुबन्धलोपे मृदु+ई इति स्थितौ ''इको यणचि'' इति सूत्रेण उकारस्य स्थाने यणि वकारादेशे कृते मृद्व+ई = मृद्वी इति स्थितौ प्रथमैकवचने सुविभक्तौ अनुबन्धलोपे अपृक्तसंज्ञायां हल्ङ्यादिलोपे मृद्वी इति रूपम्। ङीषभावे तु सस्य रुत्वे विसर्गे मृदुः इति रूपं सिद्धम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१३. **बह्वादिभ्यश्च ४/१/४५**

एभ्यो वा ङीष् स्यात्। बह्वी, बहुः। (कृदिकारादक्तिनः) रात्री, रात्रिः। (सर्वतोऽक्तिन्नर्थादित्येके)। शकटी। शकटिः।

१४. **पुंयोगादाख्यायाम् ४/१/४८**

या पुमाख्या पुंयोगात् स्त्रियां वर्तते, ततो ङीष्। गोपस्य स्त्री गोपी। (पालकान्तान्न)।

१५. **प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ७/३/४४**

प्रत्ययस्थात् कात् पूर्वस्याकारस्येकारः स्यादापि स आप्सुपः परो न चेत्। गोपालिका। अश्वपालिका। सर्विका। कारिका। अतः किम्?नौका। प्रत्ययस्थात् किम्?शक्नोतीति शका। असुपः किम्?बहुपरिव्राजका नगरी। (सूर्याद्देवतायां चाब्वाच्यः)देवतायां किम्?(सूर्यागस्त्ययोश्छे च ङ्यां च)। यलोपः। सूरी-कुन्ती। मानुषीयम्।

---

१३. बहुप्रभृतिशब्देभ्य (प्रातिपदिकेभ्यः) स्त्रियां विभाषया ङीष् भवति। बह्वादिशब्दानां गुणवचनत्वाभावात् पूर्वेण अप्राप्तौ इदं सूत्रम् आरब्धम्।

**बह्वी, बहुः** - बहु इति प्रातिपदिकात् स्त्रीत्वविवक्षायां ''बह्वादिभ्यश्च'' इति सूत्रेण विकल्पे ङीष्प्रत्ययेऽनुबन्धलोपे कृते बहु+ई इत्यत्र यणि बह्वी इति जाते सौ विभक्तौ हल्ङ्यादिलोपे बह्वी इति रूपं सिद्धम्। ङीषभावे तु सस्य रुत्वे विसर्गे बहुः इति। (कृदिकारादक्तिनः) बह्वाद्यन्तर्गणसूत्रम् इदम्। कृत्प्रत्ययस्य यः इकारः तदन्तात् प्रातिपदिकात् विकल्पेन ङीष् भवति, क्तिन्नन्तस्य तु न भवति इति।

**रात्री, रात्रिः**-राधातोः औणादिके त्रिप्प्रत्यये रात्रिशब्दः। (राशादिभ्यां त्रिप्)। अस्मात् इकारान्तात् कृदन्तप्रातिपदिकात् ''कृदिकारादक्तिनः'' इति गणसूत्रेण विकल्पेन ङीष्प्रत्ययेऽनुबन्धलोपे रात्रि+ई इति जाते भत्वात् 'यस्येति च' इति इलोपे रात्री इति स्थितौ सौ विभक्तौ हल्ङ्यादिलोपे रात्री इति सिद्धम्। पक्षे रात्रिः इति। (सर्वतोऽक्तिन्नर्थादित्येके) एतद्पि गणसूत्रम्। कृदिकारान्तात् अकृदिकारान्तात् च ङीष् वा भवति, क्तिन्नर्थकप्रत्ययान्तात् तु न इति अन्येषां मतम्। शकटिशब्दः अव्युत्पन्नप्रातिपदिकम्। अस्य अकृदिकारान्तत्वात् अनेन ङीषि शकटी इति रूपम्। पक्षे शकटिः।

१४. यः शब्दः पुंसि प्रसिद्धः, पुंयोगमाश्रित्य स्त्रियां वर्तमानः वर्तते, तस्मात् प्रातिपदिकात् स्त्रियां ङीष् भवति। गोपः शब्दः पुंसि प्रसिद्धः। पुरुषेण योगात् अस्य शब्दस्य तस्य भार्यायाम् अपि प्रयोगः (गोपालनाभावेऽपि)। अतः अस्मात् स्त्रियां वर्तमानात् शब्दात् ङीष् अनेन विधीयते। या तु स्वयं गाः पाति सा तु गोपा।

**गोपी** - पुंयोगात् स्त्रियां वर्तमानात् गोप इति प्रातिपदिकात् अनेन ङीषि गोपी इति रूपम्। प्रक्रिया पूर्ववत्।

'पालकान्तात्.' पालकशब्दः अन्ते यस्य, तादृशात् (गोपालक, अश्वपालक) प्रातिपदिकात् ङीष् न भवतीति ज्ञयेम्।

१५. प्रत्ययस्थात् कात् पूर्वस्य अत इद् आपि असुपः इतिच्छेदः। प्रत्यये स्थितः यः ककारः, तस्मात् पूर्वस्य ह्रस्वाकारस्य इकारः (ह्रस्वः) भवति आपि परे, स च आप् सुपः परः न भवेत् यदि। गोपालकशब्दात् अश्वपालकशब्दात् टापि प्रत्ययस्थककारात्पूर्वस्य लकारोत्तरवर्तिनः अकारस्य अनेन इत्त्वं भवति गोपालिका, अश्वपालिका। सर्वशब्दात् अकच्प्रत्यये सर्वकशब्दः, ततः टापि ककारात्पूर्वस्य अतः इत्वं सर्विका। कारक - कारिका।

**गोपालिका** - गोपालकशब्दात् स्त्रीत्वविवक्षायां ''पुंयोगादाख्यायाम्'' इति सूत्रेण ङीष्प्रत्यये प्राप्ते



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**१६. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्**
**४/१/४९**

एषामानुगागमः स्यात् ङीष् च। इन्द्रस्य स्त्री इन्द्राणी। वरुणानी। भवानी। शर्वाणी। रुद्राणी। मृडानी। (हिमारण्ययोर्महत्त्वे)। महद् हिमम् हिमानी। महदरण्यमरण्यानी।(यवाद्दोषे) दुष्टो यवो यवानी। (यवनाल्लिप्याम्) यवनानां लिपिर्यवनानी। (मातुलोपाध्याययोरानुग्वा) मातुलानी, मातुली। उपाध्यायानी, उपाध्यायी। (आचार्यादणत्वं च) आचार्यस्य स्त्री आचार्यानी। (अर्यक्षत्रियाभ्यां वा स्वार्थे) अर्याणी, अर्या। क्षत्रियाणी, क्षत्रिया।

---

''पालकान्तान्न'' इति वार्तिकेन निषेधे ''अजाद्यतष्टाप्'' इति टापि अनुबन्धलोपे गोपालक+आ इत्यवस्थायां ''प्रत्ययस्थात्कात्.'' इत्यादिना सूत्रेण ककारात्पूर्वस्य अकारस्य इत्त्वे गोपालिक+आ इति जाते सवर्णदीर्घे एकादेशे सुविभक्तौ हल्ङ्यादिलोपे गोपालिका इति सिद्धम्।

**प्रश्नाः १.** ककारात्पूर्वस्य अकारस्यैव किम्?नौका। यदि हि अतः इति नोच्येत तर्हि 'नौका' इत्यत्र ककारात्पूर्वस्य औकारस्यापि इत्त्वं भवेत्। अतः इति कथिते तु न भवति। **२.** 'कात्' इत्यस्य 'प्रत्ययस्थात्' इति विशेषणं किमर्थम्?शका। शक्नोति इति शका अत्र नहि ककारः प्रत्ययस्थः अपितु धातोः सः। विशेषणाभावे तु प्रत्ययभिन्नस्थककारस्य अपि अनेन ग्रहणात् ततः पूर्वस्य अकारस्यापि इत्त्वं प्राप्नुयात्। 'शका' इत्यत्र प्रत्ययस्थत्वाभावात् (ककारस्य) ततः पूर्वस्य अकारस्य इकारः न भवति। **३.** असुपः किम्?बहुपरिव्राजका नगरी। बहवः परिव्राजकाः यस्याम् इति विग्रहे समासे विभक्तिलोपे बहुपरिव्राजका इति। अत्र टाप् सुपः परः विद्यते। कथं ?प्रत्ययलक्षणमाश्रित्य। अतः टापः सुपः परत्वात् अत्र इत्वं न भवति। (सूर्याद्देवतायाम्.) सूर्यशब्दात् देवतावाच्ये स्त्रीत्वे चाप्प्रत्ययः भवतीति वाच्यम्। सूर्यस्य स्त्री देवता सूर्या। सूर्यशब्दात् चापि अनुबन्धलोपे सवर्ण दीर्घे सोः हल्ङ्यादिलोपे सूर्या इति। सूर्यशब्दात् स्त्रीत्वे देवतायाम् एव चाप् भवति, अन्यत्र तु न। कुन्ती मानुषी वर्तते न तु देवता। तस्यां स्त्रीत्वे सूर्यशब्दात् चाप् न भवति, अतः पुंयोगे ङीष्। सूर्य+ई इत्यत्र यस्येति चेति अलोपे ''सूर्यागस्त्ययोश्छे च ङ्यां च'' इति वार्तिकेन यलोपे सूर्+ई = सूरी इति जाते हल्ङ्यादिलोपे सूरी।

**१६.** इन्द्र, वरुण, भव, शर्व, रुद्र, मृड, हिम, अरण्य, यव, यवन, मातुल, आचार्य एषां स्त्रीत्वे आनुक् (आन्) आगमः, ङीष् च भवति। आगमस्य कित्त्वात् अन्त्यावयवत्वम्।

**इन्द्राणी** – इन्द्रस्य स्त्री इन्द्राणी। इन्द्रशब्दात् (प्रतिपदिकात्) 'इन्द्रवरुणभवशर्वरुद्र.' इत्यादिना सूत्रेण ङीष्प्रत्यये आनुगागमे अनुबन्धलोपे इन्द्रआन् ई इति स्थितौ ''अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घे इन्द्रान्+ई इत्यत्र नस्य णत्वे इन्द्राणी इति स्थितौ सुविभक्तौ अनुबन्धलोपे अपृक्तसंज्ञायां हल्ङ्यादिलोपे इन्द्राणी इति सिद्धम्। वरुणस्य स्त्री वरुणानी। भवस्य स्त्री भवानी। शर्वस्य स्त्री शर्वाणी। रुद्रस्य स्त्री रुद्राणी। मृडस्य मृडानी। (हिमारण्ययो.) हिमशब्दस्य अरण्यशब्दस्य च ङीष् आनुगागमश्च महत्त्वेऽर्थे भवति इति वक्तव्यम्।

**हिमानी** – महद्हिमं हिमानी। हिमशब्दात् महत्त्वेऽर्थे स्त्रियां ''इन्द्रवरुणभवशर्व'' इत्यादिना सूत्रेण ङीषि आनुगागमे अनुबन्धलोपे च कृते हिम+आन्+ई इत्यत्र सवर्णदीर्घे सौ विभक्तौ हल्ङ्यादिलोपे हिमानी इति। (यवाद्.) यवशब्दाद् दोषे ङीष् आनुक् च भवतः। (यवनात्.) यवनशब्दात् लिप्यां ङीष् आनुक् च। यवनानी इत्युक्तेः यवनानां लिपिः। (मातुलो.) मातुलशब्दात् उपाध्यायशब्दाच्च विकल्पेन आनुग् भवति। ङीष् तु पुंयोगे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१७. **क्रीतात्करणपूर्वात् ४/१/५०**

क्रीतान्ताददन्तात् करणादेः स्त्रियां ङीष् स्यात्। वस्त्रक्रीती। क्वचिन्न। धनक्रीता।

१८. **स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ४/१/५४**

असंयोगोपधमुपसर्जनं यत् स्वाङ्गं तदन्तादन्ताद् ङीष् वा स्यात्। केशानतिक्रान्ता अतिकेशी, अतिकेशा। चन्द्रमुखी, चन्द्रमुखा। असंयोगोपधात् किम्?सुगुल्फा। उपसर्जनात् किम्?शिखा।

१९. **न क्रोडादिबह्वचः ४/१/५६**

क्रोडादेर्बह्वचश्च स्वाङ्गान्न ङीष्। कल्याणक्रोडा। आकृतिगणोऽयम्। सुजघना।

---------------------------------------------------------------------

भवत्येव। मातुलानी, पक्षे मातुली। आनुकि उपाध्यायानी, पक्षे उपाध्यायी। (आचार्याद.) आचार्यशब्दात् आनुकि ङीषि आचार्यान्+ई इत्यत्र प्राप्तं णत्वं न भवति इति भावः (अणत्वम् इति)। आचार्यस्य स्त्री आचार्यानी। या तु स्वयम् अध्यापयति सा आचार्या। (अर्य.) अर्यशब्दात् क्षत्रियशब्दाच्च विभाषया ङीष् आनुक् च स्वार्थे भवतः। अतः पक्षे टाप्। अर्याणी, अर्या। क्षत्रियाणी, क्षत्रिया।

१७. अनुवृत्तिलब्धं प्रातिपदिकात् इति पदं 'अतः' इत्यनेन क्रीतात् इत्यनेन च विशिष्यते, अतः तदन्तविधिः। करणादेः = करणम् आदिः यस्य, तस्मात् करणादेः। अतः अयमर्थः – करणादेः क्रीतान्तात् अदन्तात् स्त्रियां ङीष् स्यात्। वस्त्रेण क्रीता इति वस्त्रक्रीती। अत्र वस्त्रक्रीत इति क्रीतान्त–अदन्तः शब्दः। वस्त्र इति करणम् आदिः अस्य। अतः ङीष्।

**वस्त्रक्रीती** – वस्त्रेण क्रीता इति विग्रहे समासे वस्त्रक्रीत इति प्रातिपदिकम्। अस्मात् स्त्रियां ''क्रीतात्करणपूर्वात्'' इति सूत्रेण ङीष् प्रत्ययेऽनुबन्धलोपे वस्त्रक्रीत+ई इति जाते भसंज्ञायां ''यस्येति च'' इति सूत्रेण अलोपे सौ वस्त्रक्रीती इति सिद्धम्। क्रीतान्ताददन्तात् करणपूर्वात् क्वचिन्न भवति। यथा धनेन क्रीता धनक्रीता इत्यत्र।

१८. स्वाङ्गात् च उपसर्जनाद् असंयोगोपधात् इतिच्छेदः। न संयोगः असंयोगः। असंयोगः उपधा यस्य असंयोगोपधम्, तस्मात्। असंयोगोपधम् उपसर्जनं यत् स्वाङ्गवाचकं पदम्, तदन्तात् अदन्तात् प्रातिपदिकात् स्त्रियां विकल्पेन ङीष् भवति।

**अतिकेशी, अतिकेशा** – केशान् अतिक्रान्ता इति विग्रहे ''अत्यादयः कान्ताद्यर्थे द्वितीयया'' इति वार्तिकेन समासे सुब्लुकि ''एकविभक्तिचापूर्वनिपाते'' इति केशशब्दस्य नियतविभक्तित्वात् उपसर्जनसंज्ञायाम् अतिकेश इति प्रातिपदिकम्। अत्र केशशब्द स्वाङ्गवाचकः उपसर्जनसंज्ञकः असंयोगोपधश्च, तदन्तमदन्तं प्रातिपदिकम् अतिकेश इति। अस्मात् स्त्रियां विकल्पेन ङीषि अतिकेशी। पक्षे अदन्तत्वात् टापि अतिकेशा।

**अतिकेशी, अतिकेशा** – अतिकेश इति प्रातिपदिकात् ''स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'' इति सूत्रेण विकल्पेन ङीष्प्रत्यये अनुबन्धलोपे भत्वात् यस्येति चेति अलोपे सोः हल्ङ्यादिलोपे अतिकेशी इति। पक्षे 'अजाद्यतष्टाप्' इति टापि अतिकेशा इति। चन्द्र इव मुखं यस्याः चन्द्रमुखी, चन्द्रमुखा।

**सुगुल्फा** – सु शोभनौ गुल्फौ यस्याः सा। अत्र संयोगोपधत्वात् ङीष् न। अतः टाप्। शिखा इत्यस्य स्वाङ्गत्वेऽपि उपसर्जनत्वाभावात् न ङीष् अतः टाप्।

१९. क्रोडा आदिः यस्य स क्रोडादि गणः। स बह्वच् च यत् स्वाङ्गं तदन्तात् ङीष् न भवति इति। कल्याणक्रोडा – कल्याणी क्रोडा यस्याः सा। बहुव्रीहिसमासे कल्याणी शब्दस्य पुंवद्भावे क्रोडाशब्दस्य उपसर्जनह्रस्वत्वे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२०. **नखमुखात् संज्ञायाम् ४/१/५८** न ङीष्।

२१. **पूर्वपदात्संज्ञायामगः ८/४/३**

पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात् संज्ञायां न तु गकारव्यवधाने। शूर्पणखा। गौरमुखा। संज्ञायां किम्? ताम्रमुखी कन्या।

२२. **जातेरस्त्रीविषयादयोपधात् ४/१/६३**

जातिवाचि यन्न स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्। तटी। वृषली। कठी। बह्वृची। जातेः किम्?मुण्डा। अस्त्रीविषयात् किम्? बलाका। अयोपधात् किम्? क्षत्रिया। (योपधप्रतिषेधे हयगवयमुकयमनुष्य मत्स्यानामप्रतिषेधः) हयी। गवयी। मुकयी। हलस्तद्धितस्येति यलोपः मनुषी। (मत्स्यस्य ङ्याम्) यलोपः मत्सी।

---

कल्याणक्रोड इति अदन्तात् प्रातिपदिकात् स्त्रियां ''स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'' इति सूत्रेण ङीषि प्राप्ते ''न क्रोडादिबह्वचः'' इति सूत्रेण तन्निषेधे अदन्तत्वात् ''अजाद्यतष्टाप्'' इति सूत्रेण टापि सोः हल्ङ्यादिलोपे ''कल्याणक्रोडा'' इति सिद्धम्। आकृतिगणोऽयम्।

**बह्वचः उदाहरणम्** – सु शोभनं जघनं यस्या सुजघना। अत्रापि ङीष निषेधात् टापि सुजघना इति रूपम्।

ष्शूर्पणखा इत्युदाहरणम्। राक्षसीविशेषस्य नाम इदम्। अतः संज्ञा एषा। अत्र हि शूर्प इति पूर्वपदे णत्वस्य निमित्तं रेफः, ततः परस्य 'नख' इत्यस्य नस्य णत्वं भवति, न हि गकारव्यवधानमत्र। एवमेव गौरमुखा इत्यत्रापि ङीष् न भवति। एतदपि कस्याश्चन नाम, अतः संज्ञा एषा। ताम्रं मुंख यस्याः इत्यत्र तु ङीष् न निषिध्यते अतः ''स्वाङ्गाच्चोप.'' इति प्रवृत्तौ ताम्रमुखी इति रूपम्।

**शूर्पणखा** – संज्ञात्वेन नित्यसमासः। अतः शूर्पाणि इव कररुहाः यस्या इति अस्वपदविग्रहः। शूर्पनख इति अदन्तात् प्रातिपदिकात् स्त्रीत्वे ''स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्'' इति सूत्रेण ङीषि प्राप्ते संज्ञात्वात् ''नखमुखात् संज्ञायाम्'' इति सूत्रेण ङीषः निषेधे कृते ''अजाद्यतष्टाप्'' इति सूत्रेण टापि सवर्णदीर्घे एकादेशे शूर्पनखा इत्यत्र ''पूर्वपदात्संज्ञायामगः'' इति सूत्रेण नस्य णत्वे शूर्पणखा इत्यवस्थायां सौ विभक्तौ अपृक्तसंज्ञायां हल्ङ्यादिलोपे शूर्पणखा इति सिद्धम्।

२०. नखश्च मुखञ्च नखमुखम् तस्मात् नखमुखात् इति समाहारद्वन्द्वः। नखान्तात् मुखान्ताच्च संज्ञायां ङीष् न भवति। ''स्वाङ्गाच्चोप.'' इति प्राप्तस्य ङीषः निषेधः। असंज्ञायां तु ङीष् भवत्येव।

२१. पूर्वपदात् संज्ञायाम् अगः इतिच्छेदः। रकारः पकारश्च णत्वे निमित्तम्। यदि निमित्तं पूर्वपदे भवेत् (पूर्वपदस्थम्), तस्मात् पूर्वपदस्थात् निमित्तात् परस्य नस्य णत्वं भवति संज्ञायां गम्यायाम्, गकारेण व्यवधाने सति तु न भवति।

२२. जातिवाचकं यत् स्त्रियाम् अनियतं (अनियतस्त्रीलिङ्गम्) अयोपधं (यकारः उपधा नास्ति यस्य तत्) प्रातिपदिकम्, तस्मात् स्त्रीत्वविवक्षायां ङीष् भवति। जातिः त्रिविध इति भाष्याद् अवगम्यते। प्रथमा – आकृतिग्रहणा। आकृत्या ग्रहणं यस्याः। यथा जलसमीपप्रदेशरूप-आकृत्या ग्रहणात् तटस्य जातित्वम्। द्वितीया एकस्यां व्यक्तौ कथनाद् व्यक्त्यन्तरे कथनं विनाऽपि या सुग्रहा सा जाति इति लक्षणान्तरम्। यथा वृषलत्वजाति। तृतीया गोत्रं च चरणैः सह। कठः, इत्यादिः। जातित्वाभावात् मुण्डा इत्यत्र ङीष् न। जातेः इति कथनाभावे तु अत्रापि ङीष् स्यात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२३. **इतो मनुष्यजातेः ४/१/६५** ङीष्। दाक्षी।

२४. **उङ्तः ४/१/६६**

उदन्तात् अयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात्। कुरूः। अयोपधात् किम्? अध्वर्युः ब्राह्मणी।

---

(नहि मुण्डत्वस्य जातित्वम्)। बलाकात्वस्य जातित्वेऽपि नियतस्त्रीलिङ्गत्वात् ङीष् न अतः बलाका इति। 'क्षत्रिय' इत्यस्य जातित्वेऽपि अनियतस्त्रीलिङ्गत्वेऽपि योपधत्वान्न ङीष् अतः टाप् क्षत्रिया। (योपधप्रतिषेधे.) योपधानां प्रतिषेधविषये 'हय गवय, मुकय, मनुष्य, मत्स्य' एषाम् अप्रतिषेध इति वक्तव्यम्। एतान् विहाय अन्येषां योपधाानां ङीष् निषेधः भवतीति भावः। एषां ङीषि सति हयी, गवयी, मुकयी, मनुषी, मत्सी इति रूपाणि।

**तटी** – तट इति जातिवाचकात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण ङीष्प्रत्ययेऽनुबन्धलोपे भत्त्वात् यस्येति चेति अलोपे तटी इति जाते सोः हल्ङ्यादिलोपे तटी इति सिद्धम्।

**मनुषी** – मनुष्य इति जातिवाचकात् प्रातिपदिकात् ''योपधप्रतिषेधे हयगवयमुकयमनुष्य मत्स्यानामप्रतिषेधः'' इति वार्तिकानुसारं जातिलक्षणे ङीषि भत्त्वात् अलोपे मनुष्य् + ई इति जाते ''हलस्तद्धितस्य'' इति सूत्रेण यलोपे, सुविभक्तौ हल्ङ्यादिलोपे मनुषी इति सिद्धम्। मत्स्यशब्दात् ङीषि अलोपे ''मत्स्यस्य ङ्याम्'' इति वार्तिकेन यलोपः इति विशेषः।

**तटी** – तट इति जातिवाचकात् प्रातिपदिकात् स्त्रीत्वविवक्षायां ''जातेरस्त्रीविषयादयोपधात्'' इति सूत्रेण ङीष्प्रत्ययेऽनुबन्धलोपे भत्त्वात् यस्येति चेति अलोपे तटी इति जाते सोः हल्ङ्यादिलोपे तटी इति सिद्धम्।

**मनुषी** – मनुष्य इति जातिवाचकात् प्रातिपदिकात् ''योपधप्रतिषेधे हयगवयमुकयमनुष्य मत्स्यानामप्रतिषेधः'' इति वार्तिकानुसारं

जातिलक्षणे ङीषि भत्त्वात् अलोपे मनुष्य् + ई इति जाते ''हलस्तद्धितस्य'' इति सूत्रेण यलोपे, सुविभक्तौ हल्ङ्यादिलोपे मनुषी इति सिद्धम्। मत्स्यशब्दात् ङीषि अलोपे ''मत्स्यस्य ङ्याम्'' इति वार्तिकेन यलोपः इति विशेषः।

२३. इकारान्तात् मनुष्यजातिवाचकात् प्रातिपदिकात् स्त्रियां ङीष् स्यात्। दक्षस्य अपत्यं दाक्षिः। गोत्रं च चरणैः सह इति अस्य जातिवाचित्वम्। अस्मात् स्त्रियां (दक्षस्य अपत्यं स्त्री) ङीषि भत्त्वात् इलोपे दाक्षी इति।

**दाक्षी** – दक्षस्य अपत्यं दाक्षिः। अस्मात् मनुष्यजातिवाचकात् दाक्षिइति प्रातिपदिकात् स्त्रीत्वविवक्षायां ''इतोमनुष्यजातेः'' इति सूत्रेण ङीष्प्रत्ययेऽनुबन्धलोपे दाक्षि+ई इति जाते भसंज्ञायां 'यस्येतिच' इति इकारलोपे दाक्ष्+ई = दाक्षी इति जाते सुविभक्तौ अनुबन्धलोपे अपृक्तसंज्ञायां हल्ङ्यादिलोपे दाक्षी इति सिद्धम्।

२४. अयोपधात् इति मनुष्यजातेः इति च पूर्वतः अनुवर्तते। उत इति तद्विशेषणम्, अतः तदन्तविधिः। अतः ह्रस्वोकारान्तात्, यकारः उपधा यस्य नास्ति, तस्मात् मनुष्यजातिवाचकात् प्रातिपदिकात् स्त्रियाम् ऊङ् प्रत्ययः स्यात् इति सूत्राशयः। कुरुदेशस्य राजा कुरु इत्युच्यते। तस्य अपत्यं स्त्री कुरूः। अस्य जातित्वं ''गोत्रं च चरणैः'' सह इति दिशा।

**कुरूः** – कुरुक्षेत्रस्य राजा कुरुः तस्यापत्यम् इत्यर्थे ण्ये प्रत्यये तस्य च लुकि कुरु इति प्रातिपदिकसंज्ञम्। अस्मात् स्त्रीत्वविवक्षायां ''ऊङुतः'' इति सूत्रेण ऊङ्प्रत्ययेऽनुबन्धलोपे कुरु+ऊ इत्यत्र ''अकः सवर्णे दीर्घः'' इति सूत्रेण सवर्णदीर्घैकादेशे कुरू इति जाते सौ विभक्तावनुबन्धलोपे सस्य रुत्वे विसर्गे कुरूः इति सिद्धम्। अध्वर्युः ब्राह्मणी इत्यत्र अध्वर्युशब्दस्य जातित्वे उकारान्तत्वेऽपि च न ऊङ् प्रत्ययः, अस्य यकारोपधत्वात्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२५. **पङ्गोश्च** ४/१/६८ पङ्गूः। (श्वसुरस्योकाराकारलोपश्च) श्वश्रूः।

२६. **ऊरुत्तरपदादौपम्ये** ४/१/६९

उपमानवाचि पूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्माद् ऊङ् स्यात्। करभोरूः।

२७. **संहितशफलक्षणवामादेश्च** ४/१/७० अनौपम्यार्थं सूत्रम्। संहितोरूः। शफोरूः। लक्षणोरूः। वामोरूः।

२८. **शार्ङ्गरवाद्यञो ङीन्** ४/१/७३

ष्टाङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्। शार्ङ्गरवी। बैदी। ब्राह्मणी। (नृनरयोर्वृद्धिश्च)। नारी

२९. **यूनस्तिः** ४/१/७७ युवन् शब्दात् स्त्रियां ति प्रत्ययः स्यात्। युवतिः।

**इति स्त्रीप्रत्ययप्रकरणम्**

---

२५. पङ्गु इति शब्दादपि ऊङ्प्रत्ययः भवति। जातित्वाभावात् अप्राप्तः ऊङ् अनेन विधीयते।

**पङ्गूः** – पङ्गु इति प्रातिपदिकात् स्त्रीत्वविवक्षायां ''पङ्गोश्च'' इति सूत्रेण ऊङ्प्रत्ययेऽनुबन्धलोपे पङ्गु+ऊ इति जाते सवर्णदीर्घैकादेशे सुविभक्तौ सस्य रुत्वे विसर्गे च कृते पङ्गूः इति सिद्धम्। (श्वसुरस्य.) श्वशुर शब्दात् ऊङ् प्रत्ययः अकारस्य उकारस्य च लोपः भवति। श्वशुर+ऊङ् – श्वश्र्+ऊ = श्वश्रूः।

२६. उपमानवाचकं पूर्वपदं यस्य, ऊरुः उत्तरपदं यस्य, एतादृशं यत् प्रातिपदिकं, तस्मात् प्रातिपदिकात् स्त्रियाम् ऊङ् प्रत्ययः स्यात्। करभस्य ऊरू इव ऊरू यस्या सा करभोरूः। करभोरु इत्यत्र पूर्वपदम् उपमानवाचि, ऊरु इति उत्तरपदम्, अतः स्त्रीत्वविवक्षायाम् ऊङ्प्रत्ययः सवर्णदीर्घे सौ करभोरूः इति।

**करभोरूः** – करभस्य ऊरू इव ऊरू यस्य इति करभोरुः। करभोरु इति प्रातिपदिकात् स्त्रीत्वविवक्षायाम् ''ऊरुत्तरपदादौपम्ये'' इति सूत्रेण ऊङ्प्रत्ययेऽनुबन्धलोपे सवर्णदीर्घैकादेशे सुविभक्तौ सस्य रुत्वे विसर्गे करभोरूः इति सिद्धम्।

२८. शार्ङ्गरवादि+अञः इतिच्छेदः। शार्ङ्गरवादि इति लुप्तपञ्चमीकं पदम्। शार्ङ्गरवादेः, अञ्प्रत्ययस्य यः अकारः तदन्तात् जातिवाचिनः प्रातिपदिकात् च ङीन् भवति। श्रृङ्गरोः अपत्यम् इति विग्रहे अणि आदिवृद्धौ ओर्गुणे अवादेशे ष्टाङ्गरव इति प्रातिपदिकात् स्त्रीत्वे जातित्वात् प्राप्ते ङीषि तदपवादत्वेन अनेन ङीन् शार्ङ्गरवी इति। बिदस्य गोत्रापत्यं बैदः, स्त्रीत्वे प्राप्तं जातिलक्षणं ङीषं प्रबाध्य अनेन ङीन् बैदी। ब्राह्मणात् ङीषं प्रबाध्य ङीनि ब्राह्मणी। (नृनरयोः.) नृशब्दात् नरशब्दाच्च स्त्रियां ङीन् प्रत्ययः वृद्धिश्च भवति। नृ+ङीन् – नृ+ई वृद्धौ रपरत्वे नारी। नर+ई वृद्धौ नारी।

**ष्टाङ्गरवी** – श्रृङ्गरोः अपत्यं स्त्री शार्ङ्गरवी। जातिवाचकात् (गोत्रत्वात्) शार्ङ्गरवप्रातिपदिकात् स्त्रीत्वविवक्षायां जातिलक्षणे ङीषि प्राप्ते, तदपवादत्वेन तं प्रबाध्य ''शार्ङ्गरवाद्यञो ङीन्'' इति सूत्रेण ङीन् प्रत्ययेऽनुबन्धलोपे भत्वात् अलोपे सौ अपृक्तसंज्ञायां हल्ङ्यादिलोपे शार्ङ्गरवी इति सिद्धम्।

२९. अर्थः स्पष्टः।

**युवतिः** – युवन् इति प्रातिपदिकात् स्त्रीत्वविवक्षायां ''यूनस्तिः'' इति सूत्रेण 'ति' प्रत्यये कृते युवन्+ति इति जाते ''न लोपः प्रातिपदिकान्तस्य'' इति सूत्रेण नस्य लोपे युवति इति जाते प्रथमैकवचने सुप्रत्ययेऽनुबन्धलोपे युवति + स् इत्यत्र सस्य रुत्वे विसर्गे **युवतिः** इति सिद्धम्।

**इति स्त्रीप्रत्ययप्रकरणम् समाप्तम्**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासप्रश्नाः

१. अधोऽङ्कितेषु यथेच्छं दश प्रयोगाः संसाध्याः -
अजा, मूषिका, बाला, सर्वा, भवती, भवन्ती, पचन्ती, कुरुचरी, ऐन्द्री, ऊरुमात्री, प्रास्थिकी, यादृशी, शाक्तीकी, आढ्यङ्करणी, तरुणी।

२. अधस्तान्निर्दिष्टेषु यथेच्छं पञ्चदश प्रयोगाः साधनीयाः - गार्गी, नर्तकी, कुमारी, रोहिणी, मृद्वी, शकटी, गोपी, अश्वपालिका, सूरी, शर्वाणी, यवानी, मातुलानी, वस्त्रक्रीती, कल्याणक्रोडा, शूर्पणखा, वृषली, दाक्षी, पङ्गूः, करभोरूः, वामोरूः, बैदी, युवतिः।

३. 'पुंयोगादाख्यायाम्' इति सूत्रार्थं स्पष्टयत।

४. 'प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः' इति सूत्रम् उदाहरणप्रत्युदाहरणपुरस्सरं विवेचयत।

५. ''इन्द्रवरुणभवशर्व.'' इति सूत्रं सवार्तिकं विवेचयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# धातुरूपाणि

## १. भूधातुः (होना)

### १. लट् लकारः (वर्तमान)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |

### २. लिट् लकारः (परोक्ष भूत)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | बभूव | बभूवतुः | बभूवुः |
| मध्यमपुरुषः | बभूविथ | बभूवथुः | बभूव |
| उत्तमपुरुषः | बभूव | बभूविव | बभूविम |

### ३. लुट् लकारः (अनद्यतन भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविता | भवितारौ | भवितारः |
| मध्यमपुरुषः | भवितासि | भवितास्थः | भवितास्थ |
| उत्तमपुरुषः | भवितास्मि | भवितास्वः | भवितास्मः |

### ४. लृट् लकारः (भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

### ५. लोट् लकारः (आज्ञार्थक)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| ६. लङ्लकार ( भूतकाल अनद्यतन ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

| ७. विधिलिङ् ( आज्ञा या चाहिए अर्थ ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | भवेत् | भवेताम् | भवेयुः |
| मध्यमपुरुषः | भवेः | भवेतम् | भवेत |
| उत्तमपुरुषः | भवेयम् | भवेव | भवेम |

| ८. आशीर्लिङ् ( आशीर्वाद ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | भूयात् | भूयास्ताम् | भूयासुः |
| मध्यमपुरुषः | भूयाः | भूयास्तम् | भूयास्त |
| उत्तमपुरुषः | भूयासम् | भूयास्व | भूयास्म |

| ९. लुङ् ( सामान्य भूत ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अभूत् | अभूताम् | अभूवन् |
| मध्यमपुरुषः | अभूः | अभूतम् | अभूत |
| उत्तमपुरुषः | अभूवम् | अभूव | अभूम |

| १०. लृङ् ( हेतुहेतुमद् भविष्यत् ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| मध्यमपुरुषः | अभविष्यः | अभविष्यतम् | अभविष्यत |
| उत्तमपुरुषः | अभविष्यम् | अभविष्याव | अभविष्याम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## २. सेव्धातुः (सेवा करना, सेवन करना)

### १. लट् लकारः (वर्तमान)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेवते | सेवेते | सेवन्ते |
| मध्यमपुरुषः | सेवसे | सेवेथे | सेवध्वे |
| उत्तमपुरुषः | सेवे | सेवावहे | सेवामहे |

### २. लिट् लकारः (परोक्ष भूत)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सिषेवे | सिषेवाते | सिषेविरे |
| मध्यमपुरुषः | सिषेविषे | सिषेवाथे | सिषेविध्वे |
| उत्तमपुरुषः | सिषेवे | विषेविवहे | सिषेविमहे |

### ३. लुट् लकारः (अनद्यतन भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेविता | सेवितारौ | सेवितारः |
| मध्यमपुरुषः | सेवितासे | सेवितासाथे | सेविताध्वे |
| उत्तमपुरुषः | सेविताहे | सेवितास्वहे | सेवितास्महे |

### ४. लृट् लकारः (भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेविष्यते | सेविष्येते | सेविष्यन्ते |
| मध्यमपुरुषः | सेविष्यसे | सेविष्येथे | सेविष्यध्वे |
| उत्तमपुरुषः | सेविष्ये | सेविष्यावहे | सेविष्यामहे |

### ५. लोट् लकारः (आज्ञार्थक)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सेवताम् | सेवेताम् | सेवन्ताम् |
| मध्यमपुरुषः | सेवस्व | सेवेथाम् | सेवध्वम् |
| उत्तमपुरुषः | सेवै | सेवावहै | सेवामहै |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| ६. लङ्लकार: ( भूतकाल अनद्यतन ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | असेवत | असेवेताम् | असेवन्त |
| मध्यमपुरुष: | असेवथा: | असेवेथाम् | असेवध्वम् |
| उत्तमपुरुष: | असेवे | असेवावहि | असेवामहि |

| ७. विधिलिङ् ( आज्ञा या चाहिए अर्थ ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | सेवेत | सेवेयाताम् | सेवेरन् |
| मध्यमपुरुष: | सेवेथा: | सेवेयाथाम् | सेवेध्वम् |
| उत्तमपुरुष: | सेवेय | सेवेवहि | सेवेमहि |

| ८. आशीर्लिङ् ( आशीर्वाद ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | सेविषीष्ट | सेविषीयास्ताम् | सेविषीरन् |
| मध्यमपुरुष: | सेविषीष्ठा: | सेविषीयास्थाम् | सेविषीध्वम् |
| उत्तमपुरुष: | सेविषीय | सेविषीवहि | सेविषीमहि |

| ९. लुङ् ( सामान्य भूत ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | असेविष्ट | असेविषाताम् | असेविषत |
| मध्यमपुरुष: | असेविष्ठा: | असेविषाथाम् | असेविध्वम् |
| उत्तमपुरुष: | असेविषि | असेविष्वहि | असेविष्महि |

| १०. लृङ् ( हेतुहेतुमद् भविष्यत् ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | असेविष्यत | असेविष्येताम् | असेविष्यन्त |
| मध्यमपुरुष: | असेविष्यथा: | असेविष्येथाम् | असेविष्यध्वम् |
| उत्तमपुरुष: | असेविष्ये | असेविष्यावहि | असेविष्यामहि |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ३. वद्धातुः (कहना, बोलना)

### १. लट् लकारः (वर्तमान)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदति | वदतः | वदन्ति |
| मध्यमपुरुषः | वदसि | वदथः | वदथ |
| उत्तमपुरुषः | वदामि | वदावः | वदामः |

### २. लिट् लकारः (परोक्ष भूत)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | उवाद | ऊदतुः | ऊदुः |
| मध्यमपुरुषः | उवदिथ | ऊदथुः | ऊद |
| उत्तमपुरुषः | उवाद, उवद | ऊदिव | ऊदिम |

### ३. लुट् लकारः (अनद्यतन भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदिता | वदितारौ | वदितारः |
| मध्यमपुरुषः | वदितासि | वदितास्थः | वदितास्थ |
| उत्तमपुरुषः | वदितास्मि | वदितास्वः | वदितास्मः |

### ४. लृट् लकारः (भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः | वदिष्यामि | वदिष्यावः | वदिष्यामः |

### ५. लोट् लकारः (आज्ञार्थक)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदतु | वदताम् | वदन्तु |
| मध्यमपुरुषः | वद | वदतम् | वदत |
| उत्तमपुरुषः | वदानि | वदाव | वदाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| ६. लङ्लकारः ( भूतकाल अनद्यतन ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः | अवदम् | अवदाव | अवदाम |

| ७. विधिलिङ् ( आज्ञा या चाहिए अर्थ ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | वदेत् | वदेताम् | वदेयुः |
| मध्यमपुरुषः | वदेः | वदेतम् | वदेत |
| उत्तमपुरुषः | वदेयम् | वदेव | वदेम |

| ८. आशीर्लिङ् ( आशीर्वाद ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | उद्यात् | उद्यास्ताम् | उद्यासुः |
| मध्यमपुरुषः | उद्याः | उद्यास्तम् | उद्यास्त |
| उत्तमपुरुषः | उद्यासम् | उद्यास्व | उद्यास्म |

| ९. लुङ् ( सामान्य भूत ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अवादीत् | अवादिष्टाम् | अवादिषुः |
| मध्यमपुरुषः | अवादीः | अवादिष्टम् | अवादिष्ट |
| उत्तमपुरुषः | अवादिषम् | अवादिष्व | अवादिष्म |

| १०. लृङ् ( हेतुहेतुमद् भविष्यत् ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अवदिष्यत् | अवदिष्यताम् | अवदिष्यन् |
| मध्यमपुरुषः | अवदिष्यः | अवदिष्यतम् | अवदिष्यत |
| उत्तमपुरुषः | अवदिष्यम् | अवदिष्याव | अवदिष्याम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ४. गम्धातुः ( जाना, गमन )

### १. लट् लकारः ( वर्तमान )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यमपुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तमपुरुषः | गच्छामि | गच्छावः | गच्छामः |

### २. लिट् लकारः ( परोक्ष भूत )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | जगाम | जग्मतुः | जग्मुः |
| मध्यमपुरुषः | जग्मिथ, जगन्थ | जग्मथुः | जग्म |
| उत्तमपुरुषः | जगाम, जगम | जग्मिव | जग्मिम |

### ३. लुट् लकारः ( अनद्यतन भविष्यत् )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गन्ता | गन्तारौ | गन्तारः |
| मध्यमपुरुषः | गन्तासि | गन्तास्थः | गन्तास्थ |
| उत्तमपुरुषः | गन्तास्मि | गन्तास्वः | गन्तास्मः |

### ४. लृट् लकारः ( भविष्यत् )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गमिष्यति | गमिष्यतः | गमिष्यन्ति |
| मध्यमपुरुषः | गमिष्यसि | गमिष्यथः | गमिष्यथ |
| उत्तमपुरुषः | गमिष्यामि | गमिष्यावः | गमिष्यामः |

### ५. लोट् लकारः ( आज्ञार्थक )

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यमपुरुषः | गच्छ | गच्छतम् | गच्छत |
| उत्तमपुरुषः | गच्छानि | गच्छाव | गच्छाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| ६. लङ्लकार: ( भूतकाल अनद्यतन ) | | | |
|---|---|---|---|
| **पुरुषा:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | अगच्छत् | अगच्छताम् | अगच्छन् |
| मध्यमपुरुष: | अगच्छ: | अगच्छतम् | अगच्छत |
| उत्तमपुरुष: | अगच्छम् | अगच्छाव | अगच्छाम |
| **७. विधिलिङ् ( आज्ञा या चाहिए अर्थ )** | | | |
| **पुरुषा:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | गच्छेत् | गच्छेताम् | गच्छेयु: |
| मध्यमपुरुष: | गच्छे: | गच्छेतम् | गच्छेत |
| उत्तमपुरुष: | गच्छेयम् | गच्छेव | गच्छेम |
| **८. आशीर्लिङ् ( आशीर्वाद )** | | | |
| **पुरुषा:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | गम्यात् | गम्यास्ताम् | गम्यासु: |
| मध्यमपुरुष: | गम्या: | गम्यास्तम् | गम्यास्त |
| उत्तमपुरुष: | गम्यासम् | गम्यास्व | गम्यास्म |
| **९. लुङ् ( सामान्य भूत )** | | | |
| **पुरुषा:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | अगमत् | अगमताम् | अगमन् |
| मध्यमपुरुष: | अगम: | अगमतम् | अगमत |
| उत्तमपुरुष: | अगमम् | अगमाव | अगमाम |
| **१०. लृङ् ( हेतुहेतुमद् भविष्यत् )** | | | |
| **पुरुषा:** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुष: | अगमिष्यत् | अगमिष्यताम् | अगमिष्यन् |
| मध्यमपुरुष: | अगमिष्य: | अगमिष्यतम् | अगमिष्यत |
| उत्तमपुरुष: | अगमिष्यम् | अगमिष्याव | अगमिष्याम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ५. चुर्धातुः (चोरी करना)

### १. लट् लकारः (वर्तमान)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयति | चोरयतः | चोरयन्ति |
| मध्यमपुरुषः | चोरयसि | चोरयथः | चोरयथ |
| उत्तमपुरुषः | चोरयामि | चोरयावः | चोरयामः |

### २. लिट् लकारः (परोक्ष भूत)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयाम्बभूव | चोरयाम्बभूवतुः | चोरयाम्बभूवुः |
| मध्यमपुरुषः | चोरयाम्बभूविथ | चोरयाम्बभूवथुः | चोरयाम्बभूव |
| उत्तमपुरुषः | चोरयाम्बभूव | चोरयाम्बभूविव | चोरयाम्बभूविव |

### ३. लुट् लकारः (अनद्यतन भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयिता | चोरयितारौ | चोरयितारः |
| मध्यमपुरुषः | चोरयितासि | चोरयितास्थः | चोरयितास्थ |
| उत्तमपुरुषः | चोरयितास्मि | चोरयितास्वः | चोरयितास्मः |

### ४. लृट् लकारः (भविष्यत्)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयिष्यति | चोरयिष्यतः | चोरयिष्यन्ति |
| मध्यमपुरुषः | चोरयिष्यसि | चोरयिष्यथः | चोरयिष्यथ |
| उत्तमपुरुषः | चोरयिष्यामि | चोरयिष्यावः | चोरयिष्यामः |

### ५. लोट् लकारः (आज्ञार्थक)

| पुरुषाः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | चोरयतु | चोरयताम् | चोरयन्तु |
| मध्यमपुरुषः | चोरय | चोरयतम् | चोरयत |
| उत्तमपुरुषः | चोरयाणि | चोरयाव | चोरयाम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| ६. लङ्लकारः ( भूतकाल अनद्यतन ) | | | |
|---|---|---|---|
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अचोरयत् | अचोरयताम् | अचोरयन् |
| मध्यमपुरुषः | अचोरयः | अचोरयतम् | अचोरयत |
| उत्तमपुरुषः | अचोरयम् | अचोरयाव | अचोरयाम |
| ७. विधिलिङ् ( आज्ञा या चाहिए अर्थ ) | | | |
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | चोरयेत् | चोरयेताम् | चोरयेयुः |
| मध्यमपुरुषः | चोरयेः | चोरयेतम् | चोरयेत |
| उत्तमपुरुषः | चोरयेयम् | चोरयेव | चोरयेम |
| ८. आशीर्लिङ् ( आशीर्वाद ) | | | |
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | चोर्यात् | चोर्यास्ताम् | चोर्यासुः |
| मध्यमपुरुषः | चोर्याः | चोर्यास्तम् | चोर्यास्त |
| उत्तमपुरुषः | चोर्यासम् | चोर्यास्व | चोर्यास्म |
| ९. लुङ् ( सामान्य भूत ) | | | |
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अचूचुरत् | अचूचुरताम् | अचूचुरन् |
| मध्यमपुरुषः | अचूचुरः | अचूचुरतम् | अचूचुरत |
| उत्तमपुरुषः | अचूचुरम् | अचूचुराव | अचूचुराम |
| १०. लृङ् ( हेतुहेतुमद् भविष्यत् ) | | | |
| **पुरुषाः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| प्रथमपुरुषः | अचोरयिष्यत् | अचोरयिष्यताम् | अचोरयिष्यन् |
| मध्यमपुरुषः | अचोरयिष्यः | अचोरयिष्यतम् | अचोरयिष्यत |
| उत्तमपुरुषः | अचोरयिष्यम् | अचोरयिष्याव | अचोरयिष्याम |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अभ्यासदर्शिनी

जनार्दन हेगडे



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १ मम, भवतः, भवत्याः

I

आचार्यः– सर्वेभ्यः स्वागतम्। नमस्काराः।
मम नाम अरुणः। भवतः नाम किम् ?

गणेशः – मम नाम गणेशः।

आचार्यः – भवत्याः नाम किम् ?

गीता – मम नाम गीता।

आचार्यः – मम नाम किम् ?

छात्राः – भवतः नाम अरुणः।

आचार्यः – मम पुस्तकम्। मम शाला। मम मुखम्। मम पादः। एवं सर्वे वदन्तु। शाला, गृहम्, हस्तः, चित्रम्, वृक्षः, मित्रम्।

छात्राः – मम शाला। मम गृहम्। मम लेखनी। मम हस्तः। मम चित्रम्। मम वृक्षः। मम मित्रम्।

आचार्यः – भवतः पुस्तकम्। भवतः शाला। एवं क्रमेण वदन्तु।

छात्राः – भवतः शाला। भवतः गृहम्। भवतः लेखनी ....

आचार्यः – भवत्याः पुस्तकम्। भवत्याः शाला। एवं क्रमेण वदन्तु।

छात्राः – भवत्याः शाला। भवत्याः गृहम्। भवत्याः लेखनी .....।

**विशेषः**

* भवतः – पुंल्लिङ्गे। भवत्याः – स्त्रीलिङ्गे।
* 'तव नाम किम् ?' इति प्रश्नः अपि कर्तुं शक्यते। किन्तु अग्रे क्रियापदप्रयोगस्तरे क्लेशः भवति। अतः प्राथमिकस्तरे 'तव' इति प्रयोगः मास्तु। 'भवतः' 'भवत्याः' इत्येव प्रयोगः भवतु।
* 'नाम' इत्यत्र विसर्गः( ः) नास्ति। अनुस्वारः(–ं) अपि नास्ति। 'नाम' इत्यस्य स्थाने केचन 'नामधेयम्' इत्यस्य अपि उपयोगं कुर्वन्ति।

## अभ्यासः – १

नामानुगुणं प्रश्नं पृच्छन्तु।

उदा – १. नारायणः – भवतः नाम किम् ?

२. श्रीशः – ..........................................................................?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. ललिता – ..........................................................................?

४. नलिनी – ..........................................................................?

५. दिवाकरः – ..........................................................................?

६. पद्मा – ..........................................................................?

७. तपनः – ..........................................................................?

**अभ्यासः – २**

भवतः, भवत्याः, मम, नाम, किम्,

I मम नाम अरुणः। ........................................................ नाम किम्?

II ................................................................................ नाम दिनेशः।

I ...................................... नाम ....................................................?

III मम ......................................................................................गिरिजा।

I ................................................................................ नाम किम्?

II ................................................................................ नाम अरुणः।

**अभ्यासः – ३**

मम गृहम्। भवतः गृहम्। भवत्याः गृहम्।

एतेन क्रमेण अधः सूचितानां शब्दानाम् उपयोगं कृत्वा वाक्यानि रचयन्तु।

ग्रामः, देशः, राज्यम्, कुञ्चिका (Key), स्यूतः (Bag), कथा,

पत्रिका, धनम्, आसन्दः (Chair), भगिनी।

१. ............................ ग्रामः। ........................... ग्रामः। ......................ग्रामः।

२. ............................। ............................। ............................।

३. ............................। ............................। ............................।

४. ............................। ............................। ............................।

५. ............................। ............................। ............................।

६. ............................। ............................। ............................।

७. ............................। ............................। ............................।

८. ............................। ............................। ............................।

९. ............................। ............................। ............................।

१०............................। ............................। ............................।




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २

## शिष्टाचारः, षष्ठी – ( सर्वनाम्नाम् ), मूलरूपम्, अन्तव्यवस्था, सम्बोधनरूपम्, वा, आम्, न

I



रमेशः – नमस्ते।
सुप्रभातम्।
कुशलं वा?

कृष्णः – आम्।
कुशलम्।
भवान् कुशली वा?

रमेशः – आम्। एषः कः?

कृष्णः – एषः मम स्नेहितः।
एतस्य नाम श्रीशः।

श्रीशः – नमस्ते! भवतः नाम किम्?

रमेशः – मम नाम रमेशः। कृष्ण! एषः मम सहोदरः। एतस्य नाम प्रकाशः।

कृष्णः – मित्र ! किं तत् पुस्तकम्।

रमेशः – एतत् कथापुस्तकम्।

श्रीशः – रमेशवर्य! तस्य लेखकः कः ?

रमेशः – एतस्य लेखकः कृष्णशर्मा। कृष्ण! मम विलम्बः जातः।
अहम् आगच्छामि। श्रीश! पुनः मिलामः।

प्रकाशः,
रमेशः – अस्तु, पुनः मिलामः।

II

पुत्री – अम्ब! एतत् अस्माकं कक्ष्यायाः समूहचित्रम्।

माता – एषा का ?

पुत्री – एषा दिव्या।

माता – एतस्याः माता किं करोति?

पुत्री – सा नगरसभाकार्यालये उट्टङ्किका।

माता – सा का?

पुत्री – सा नीरजा। तस्याः गृहं पार्श्वमार्गे अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



माता – शैलजा का?

पुत्री – एतस्याः पार्श्वे शैलजा अस्ति। अम्ब! एषा पङ्कजा।
एतस्याः माता राजेश्वरी भवत्याः सखी।

माता – वत्से! एषा गिरिजा खलु ?

पुत्री – आम् अम्ब! सा कक्षायां प्रथमा।

माता – वत्से, इदानीं दशवादनम्। शयनं करोतु।

पुत्री – अस्तु अम्ब! शुभरात्रिः।


**विशेषः**

१. **शिष्टाचारः –**

| | | |
|---|---|---|
| प्रातः काले | – | सुप्रभातम् |
| रात्रौ | – | शुभरात्रिः |
| अन्यसमये (मध्याह्ने/सायम्/ इतरसमये च) | – | नमस्कारः/नमो नमः। नमस्ते (नमांसि इत्यपि केचन वदन्ति। एषा प्रौढा शैली।) |
| सामान्यः कुशलप्रश्नः | – | कुशलं वा? |
| पुंल्लिङ्गे कुशलप्रश्नः | – | भवान् कुशली वा? |
| स्त्रीलिङ्गे कुशलप्रश्नः | – | भवती कुशलिनी वा? |

गमनसमये 'पुनः मिलामः' इति वक्तव्यम्। 'आगच्छामि' 'आगच्छामि तावत्' इत्यपि वक्तुं शक्यते। 'साधयामः तावत्' इति प्राचीनशैली। एषा शैली प्रौढा।

२. ........................................................................................................ !



........................................................................................................

३. प्रथमाविभक्तिः षष्ठीविभक्तिः

| | | | |
|---|---|---|---|
| पुं – | सः | ................................................ | तस्य |
| | एषः | ................................................ | एतस्य |
| | कः | ................................................ | कस्य |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | |
|---|---|---|---|
| स्त्री – | सा | ................................................ | तस्याः |
| | एषा | ................................................ | एतस्याः |
| | का | ................................................ | कस्याः |
| नपुं – | तत् | ................................................ | तस्य |
| | एतत् | ................................................ | एतस्य |
| | किम् | ................................................ | कस्य |

स्मरन्तु – सः, तत् — तस्य – पुंल्लिङ्गे नपुंसकलिङ्गे च समानं रूपम्।

एषः, एतत् — एतस्य – ( " )

कः, किम् — कस्य – ( " )

४. **मूलरूपम्**

| पुंल्लिङ्गे | | स्त्रीलिङ्गे | | नपुंसकलिङ्गे | |
|---|---|---|---|---|---|
| प्रथमा | मूलम् | प्रथमा | मूलम् | प्रथमा | मूलम् |
| कृष्णः | कृष्ण | माला | माला | वनम् | वन |
| रामः | राम | सीता | सीता | पुस्तकम् | पुस्तक |
| दिनेशः | दिनेश | दिव्या | दिव्या | पुष्पम् | पुष्प |
| बालकः | बालक | नलिनी | नलिनी | फलम् | फल |
| तरुणः | तरुण | शालिनी | शालिनी | चित्रम् | चित्र |
| वृक्षः | वृक्ष | गृहिणी | गृहिणी | भवनम् | भवन |

– पुंल्लिङ्गे – प्रथमाविभक्तिरूपे विसर्गः अस्ति। मूलरूपे विसर्गः नास्ति।

– स्त्रीलिङ्गे – प्रथमाविभक्तिरूपे मूलरूपे च भेदः न दृश्यते।

– नपुंसकलिङ्गे – प्रथमाविभक्तिरूपे 'म्' अस्ति। मूलरूपे 'म्' नास्ति।

५. **अन्तव्यवस्था –**

कृष्ण = क् + ऋ + ष् + ण् + अ – अन्ते अकारः अस्ति।

अतः एषः अकारान्तः। (पुंल्लिङ्गः)

माला = म् + आ + ल् + आ – अन्ते आकारः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अत: एष: आकारान्त:। (स्त्रीलिङ्ग:)

नलिनी = न् + अ + ल् + ई + न् + ई – अन्ते ईकार: अस्ति।

अत: एष: ईकारान्त:। (स्त्रीलिङ्ग:)

मित्र = म् + ई + त् + र् + अ – अन्ते अकार: अस्ति।

अत: एष: अकारान्त:। (नपुंसकलिङ्ग:)

| लिङ्गम् | प्रथमा | मूलरूपम् | अन्तिम: वर्ण | अन्तव्यवस्था |
|---|---|---|---|---|
| पुंल्लिङ्गे | कृष्ण: | कृष्ण | अकार: | अकारान्त: |
| ,, | गोविन्द: | गोविन्द | अकार: | अकारान्त: |
| ,, | बालक: | बालक | ,, | ,, |
| ,, | वृक्ष: | वृक्ष | ,, | ,, |
| स्त्रीलिङ्गे | लता | लता | आकार: | आकारान्त: |
| ,, | दिव्या | दिव्या | आकार: | आकारान्त: |
| ,, | नलिनी | नलिनी | ईकार: | ईकारान्त: |
| ,, | तरुणी | तरुणी | ईकार: | ईकारान्त: |
| नपुंसके | मित्रम् | मित्र | अकार: | अकारान्त: |
| ,, | पुस्तकम् | पुस्तक | ,, | ,, |
| ,, | फलम् | फल | ,, | ,, |

६. 'वा' इत्यस्य योजनेन वाक्यं प्रश्नार्थकं भवति। ('वा' इत्यस्य स्थाने 'किम्' इत्यपि प्रयोक्तुं शक्यम्।)

उदा – 

| सामान्यवाक्यम् | प्रश्नार्थकवाक्यम् |
|---|---|
| भवान् गच्छति। | भवान् गच्छति वा ? |
| भवती तिष्ठति। | भवती तिष्ठति वा ? |
| सर्वं कुशलम्। | सर्वं कुशलं वा ? |

७. 'आम्' इति पदम् अङ्गीकारं सूचयति। 'अस्तु', 'भवतु' इत्यपि अङ्गीकारं सूचयति।

८. 'न' इति पदं निषेधं सूचयति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| पुंल्लिङ्गे | | स्त्रीलिङ्गे | | नपुंसकलिङ्गे | |
|---|---|---|---|---|---|
| प्रथमा | सम्बोधनम् | प्रथमा | सम्बोधनम् | प्रथमा | सम्बोधनम् |
| रामः | राम! | माला | माले! | मित्रम् | मित्र! |
| कृष्णः | कृष्ण! | वत्सा | वत्से! | (नपुंसकलिङ्गे अन्यानि | |
| दिनेशः | दिनेश! | नलिनी | नलिनि! | सम्बोधनरूपाणि | |
| श्रीशः | श्रीश! | मालिनी | मालिनि! | व्यवहारे न | |
| | | अम्बा | अम्ब! | आवश्यकानि। | |

* – अकारान्तपुंल्लिङ्गे सम्बोधनरूपे विसर्गः न दृश्यते।

– आकारान्तस्त्रीलिङ्गे " एकारः दृश्यते।

– ईकारान्तस्त्रीलिङ्गे " ह्रस्वः इकारः दृश्यते।

– अकारान्तनपुंसकलिङ्गे " मकारः न दृश्यते।

* सम्बोधनरूपस्य सूचनार्थम् '!' इति चिह्नस्य, अल्पविरामस्य (,) वा उपयोगः भवति सामान्यतः।

* सम्बोधनरूपात् पूर्वं हे, रे, अये इत्यादीनि अपि कदाचित् प्रयुज्यन्ते। सामान्यसम्बोधनानि –

मित्र ! – पुरुषम् उद्दिश्य

सखि! – महिलाम् उद्दिश्य

भोः/अयि भोः – पुं/स्त्री सामान्यम्।

* अ) आदरसूचनार्थं नामसूचकपदेन सह –

– पुंल्लिङ्गे वर्य-महोदय-महाशयशब्दाः योज्यन्ते प्रायः।

– स्त्रीलिङ्गे वर्या-महोदया-भगिनीशब्दाः योज्यन्ते प्रायः।

उदा – श्रीशः श्रीशवर्य/श्रीशमहोदय/श्रीशमहाशय

नलिनी – नलिनीवर्ये/नलिनीमहोदये/नलिनीभगिनि

**आ )** आदरसूचनसन्दर्भे नामनिर्देशम् अकृत्वा –

पुंल्लिङ्गे – मान्य/आर्य/श्रीमन्*इत्यादीनि प्रयुज्यन्ते।

स्त्रीलिङ्गे – मान्ये/आर्ये/भगिनि इत्यादीनि प्रयुज्यन्ते।

(*श्रीमन् इत्यस्य प्रथमाविभक्तिरूपं 'श्रीमान्' इति।)

* 'हे कृष्णः! नमस्ते' इति वाक्यम् अशुद्धम्। अत्र प्रथमाविभक्तिरूपं प्रयुक्तम्। सम्बोधनरूपम् एव प्रयोक्तव्यम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. * रामः, कृष्णः, सीता, नलिनी इत्यादीनि नामानि (Names) खलु?
एतादृशानि पदानि संज्ञापदानि इति उच्यन्ते।
* वृक्षः, लता, आसन्दः, पर्वतः इत्यादीनि संज्ञेतराणि नामपदानि इति उच्यन्ते।
* सः, एषः, कः, सा, एषा, अहम् – इत्यादीनि सर्वनामपदानि इति उच्यन्ते।
* यस्य पदस्य रूपपरिवर्तनं न भवति तत् 'अव्ययम्' इति उच्यते।
उदा – वा, च, न, आम् इत्यादीनि।

**अभ्यासः ४**

नमस्ते, कुशलम्, तावत्, पुनः मिलामः।


I ........................................................................ मित्र! कुशलं वा?

II आम् । सर्वं ........................................................................।

I मित्र। अहम् आगच्छामि ..............................................................।

II अस्तु, ........................................................................।

**अभ्यासः – ५**




| | | | | | |
|---|---|---|---|---|---|
| पुस्तकम् | १. ......................... । | | वृक्षः | I ......................... । | |
| ग्रन्थः | २ ......................... । | | लता | II ......................... । | |
| लेखनी | ३. ......................... । | | फलम् | III ......................... । | |
| घटी | ४. ......................... । | | धनम् | IV ......................... । | |
| तरुणी | ५. ......................... । | | पात्रम् | V ......................... । | |
| बालकः | ६. ......................... । | | माला | VI ......................... । | |
| चित्रम् | ७. ......................... । | | मार्गः | VII ......................... । | |
| गीतम् | ८. ......................... । | | शाखा | VIII ......................... । | |
| भवनम् | ९. ......................... । | | दीपः | IX ......................... । | |
| वृद्धः | १०. ......................... । | | स्यूतः | X ......................... । | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### अभ्यासः - ६

कः/का/किम् इत्येतेषु उचितेन रूपेण रिक्तस्थानं पूरयन्तु।

१. ....................रामः? २. ....................सीता? ३. ....................वनम्?

४. ....................गृहम्? ५. ....................बालकः? ६. ....................पुष्पम्?

७. ....................वृद्धा? ८. ....................महिला? ९. ....................कार्यम्?

१० ....................पत्रम्? ११.................... चित्रम्? १२....................शब्दः?

### अभ्यासः - ७

उदाहरणानुसारं वाक्यानि परिवर्तयन्तु।

उदा - एषः कृष्णः। एतस्य नाम कृष्णः।

१. एषः नारायणः। ........................................................ नाम नारायणः।

२. एषः हरिः। ........................................नाम..................................।

३. सः गोविन्दः। ..................................................................।

४. एषा मालिनी। ..................................................................।

५. सा नन्दिनी। ..................................................................।

६. एतत् रामायणम्। ..................................................................।

७. का विद्या?..................................................................।

८. तत् महाभारतम्। ..................................................................।

९. कः दिलीपः ?..................................................................।

१०. सा विजया। ..................................................................।

११. एषा भगवद्गीता। ..................................................................।

१२. किम् आम्रम्?..................................................................।

१३. एषः सूर्यनारायणः। ..................................................................।

१४. का मालती?..................................................................।

१५. सा मधुमती। ..................................................................।

### अभ्यासः ८

आवरणे दत्तानां शब्दानां सम्बोधनरूपैः रिक्तस्थानानि पूरयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१. (कृष्णः) – ................................ ! नमस्ते।

२. (गोविन्दः) – ................................ ! नमस्कारः।

३. (गणेशः) – ................................ ! कुशलं वा ?

४. (मित्रम्) – ................................ ! सुप्रभातम्।

५. (बालकः) – ................................ ! भवतः नाम किम् ?

६. (आर्यः) – ................................ ! भवतः नाम किम् ?

७. (श्रीमान्) – ................................ ! नमस्कारः।

८. (वत्सा) – ................................ ! शयनं करोतु।

९. (अम्बा) – ................................ ! अहं विद्यालयं गच्छामि।

१०. (नलिनी) – ................................ ! कथम् अस्ति भवती ?

**अभ्यासः ९**

'वा' इत्येतस्य प्रयोगं कृत्वा अधस्तनवाक्यानां प्रश्नवाक्यानि लिखन्तु।

उदा – सः गोविन्दः। सः गोविन्दः वा ?

१. सा लक्ष्मीः। ..........................................................................?

२. एषः चैतन्यः। ..........................................................................?

३. तत् फलम्। ..........................................................................?

४. एषा वैद्या। ..........................................................................?

५. सः चतुरः। ..........................................................................?

६. सर्वं कुशलम्। ..........................................................................?

७. भवान् कुशली। ..........................................................................?

८. सा श्रीदेवी। ..........................................................................?

९. एतत् पुस्तकम्। ..........................................................................?

१०. एषः सहोदरः। ..........................................................................?

**अभ्यासः १०**

कोष्टकस्य आधारेण प्रश्नवाक्यानि 'आम्' 'न' – युक्तानि वाक्यानि च लिखन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | | | | |
|---|---|---|---|---|
| १. अरुणः | अध्यापकः | ✓ | विद्यार्थी | × |
| २. शालिनी | अध्यापिका | × | विद्यार्थिनी | ✓ |
| ३. फलम् | मधुरम् | × | आम्लम् | ✓ |
| ४. कार्यक्रमः | उत्तमः | × | सामान्यः | ✓ |
| ५. नारायणः | वामनः | × | उन्नतः | ✓ |
| ६. मल्लिका | विद्यार्थिनी | ✓ | गृहिणी | × |
| ७. परीक्षा | सुलभा | ✓ | कठिना | × |
| ८. पुस्तकम् | उत्तमम् | ✓ | सामान्यम् | × |
| ९. मुकुन्दः | लिपिकारः | × | अधिकारी | ✓ |
| १०. करवस्त्रम् | मलिनम् | × | स्वच्छम् | ✓ |

उदा – १. अरुणः अध्यापकः वा?

आम्, अरुणः अध्यापकः। सः विद्यार्थी न।

२. शालिनी अध्यापिका वा ?

..............................................।..............................................

३. ..................................................।

..............................................।..............................................

४. ..................................................।

..............................................।..............................................

५. ..................................................।

..............................................।..............................................

६. ..................................................।

..............................................।..............................................

७. ..................................................।

..............................................।..............................................

८. ..................................................।

..............................................।..............................................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

९. ..................................................।

..............................................।....................................................

१०. ..................................................।

..............................................।....................................................

## अभ्यासः – ११

अधः सूचितानां शब्दानां मूलरूपम् आवरणे लिखन्तु।

उदा – तरुणः (तरुण)

| | | | |
|---|---|---|---|
| १. अरुणः | ( ) | २. प्रकाशः | ( ) |
| ३. सूर्यनारायणः | ( ) | ४. सहोदरः | ( ) |
| ५. नीरजा | ( ) | ६. राजेश्वरी | ( ) |
| ७.बालिका | ( ) | ८. लेखनी | ( ) |
| ९. मित्रम् | ( ) | १०. पत्रम् | ( ) |

## अभ्यासः – १२

अधः सूचितानां शब्दानां वर्णान् पृथक् लिखित्वा अन्तनिर्देशं कुर्वन्तु।

उदा – राम – र् + आ + म् + अ – अकारान्तः

१. बालक – .................................................. – ..................

२. बालिका – .................................................. – ..................

३. सीता – .................................................. – ..................

४. चित्र – .................................................. – ..................

५. देवी – .................................................. – ..................

६. गृह –.................................................. – ..................

७. मार्ग – .................................................. – ..................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ३ षष्ठी – एकवचनम्

आचार्यः – अहो, आश्चर्यम्! अद्य कक्ष्यायां गजाः सन्ति, अश्वाः सन्ति। पुष्पाणि सन्ति। व्याघ्राः सन्ति। जनाः सन्ति। नद्यः सन्ति। पर्वताः सन्ति। सूर्याः सन्ति। ......

छाया: – श्रीमन्! एतानि चित्राणि अस्माकम्।

आचार्यः – सुन्दराणि चित्राणि। अभिनन्दनानि। कस्य चित्रं किम् इति अहं ज्ञातुम् इच्छामि। एतत् सूर्योदयचित्रं कस्य?

छात्रनायकः – तत् प्रभाकरस्य।

आचार्यः – रमणीयं चित्रम्! एतत् नदीविहारचित्रं मीनाक्ष्याः वा?

छा.ना.– आम्। व्याघ्रचित्रं बलरामस्य। हरिणचित्रं सुरेशस्य। दीपावलीचित्रम् अम्बुजायाः। बालकृष्णचित्रं धरण्याः। क्रीडाङ्गणचित्रं विद्यायाः। एतत् ग्रामचित्रं मम।

आचार्यः – साधु साधु! सर्वाणि चित्राणि सुन्दराणि। ....।

देवराजः क्षम्यतां श्रीमन्, अहं व्यक्तिचित्रं लेखितुम् इच्छामि। किन्तु....।

आचार्यः– चिन्ता मास्तु। अहं साहाय्यं करोमि। भवतः चित्रं प्रदर्शयतु। एषा रेखा एवं भवतु। एषा रेखा एवम् ...। हुँ तथा ...। इदानीं चित्रं सम्यक् दृश्यते खलु।

देवराजः – धन्यवादः। श्रीमन्।

आचार्यः – स्वागतम्

**विशेषः**

* **षष्ठीविभक्तिः**

| पुंल्लिङ्गे | | स्त्रीलिङ्गे | | नपुंसकलिङ्गे | |
|---|---|---|---|---|---|
| प्रथमा | षष्ठी | प्रथमा | षष्ठी | प्रथमा | षष्ठी |
| रामः | रामस्य | विद्या | विद्यायाः | पुष्पम् | पुष्पस्य |
| सुरेशः | सुरेशस्य | अम्बुजा | अम्बुजायाः | पुस्तकम् | पुस्तकस्य |
| गजः | गजस्य | गिरिजा | गिरिजायाः | (नपुंसकलिङ्गशब्दानां षष्ठीविभक्तिरूपं पुंल्लिङ्गशब्दानाम् इव एव भवति।) | |
| हरिणः | हरिणस्य | मीनाक्षी | मीनाक्ष्याः | | |
| बालकः | बालकस्य | धरणी | धरण्याः | | |
| पर्वतः | पर्वतस्य | युवतिः | युवत्याः | | |



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com

*    अहो, अहा, हा, हन्त – इत्यादीनि आश्चर्यद्योतकानि।

*    साधु साधु! – इत्येतत् सन्तोषम् अभिमानं च द्योतयति।

| | | |
|---|---|---|
| क्षम्यताम् | – | Excuse me |
| धन्यवादाः | – | Thanks |
| स्वागतम् | – | Welcome |

## अभ्यासः १३



१. रमेशः    २. सुरेशः
३. नरसिंहः    ४. देवराजः
५. किरणः    ६. वाणी
७. श्रीपादः    ८. हारीतः
९. देवनाथः    १०. मालिनी
११. विशाला    १२. चन्द्रिका
१३. चारुहासः    १४. श्रीकरः
१५. देविका

उपरि कानिचन वस्तूनि चित्रितानि। पार्श्वे तेषां स्वामिनः अपि निर्दिष्टाः।

उदाहरणानुसारं किं कस्य इति निर्दिशन्तु।

उदा – १. एतत् पुस्तकं रमेशस्य।

२..................लेखनी..................।    ३......................उपनेत्रम्......................।

४..................घट......................।    ५.....................द्विचक्रिका.....................।

६..................कर्तरी..................।    ७....................गृहम्.............................।

८.................कङ्कतं..................।    ९....................करदीपः........................।

१०...............वनितास्यूतः...........।    ११................पाञ्चालिका.....................।

१२.............कुञ्चिका..................।    १३................यानपेटिका.......................।

१४................युतकम्.................।    १५..............शाटिका..........................।

उदा – रामायणस्य उपरि महाभारतम् अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अभ्यासः १४**

कस्य उपरि किम् अस्ति इति लिखन्तु।




१. ................................उपरि रघुवंशः अस्ति।

२. ........................उपरि......................अस्ति।

३. ...............................................................।

४. ...............................................................।

५. ...............................................................।

६. ...............................................................।

७. ...............................................................।

८. ...............................................................।

९. ...............................................................।

१०. ...............................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ४ बहुवचनम् – प्रथमाविभक्तौ, षष्ठीविभक्तौ, वर्तमाने, प्रार्थनादिषु च

अरुणः – नमस्ते महेश। स्वागतम्। आगच्छतु। उपविशतु।

महेशः – संस्कृतपाठः प्रचलति वा?एते किं कुर्वन्ति?

अरुणः– इदानीं गणकार्यं प्रचलति। एते बालकाः सम्भाषणं लिखन्ति। ते बालकाः चर्चां कुर्वन्ति। एताः बालिकाः कथां लिखन्ति। ताः बालिकाः प्रश्नवाक्यानि लिखन्ति।

महेशः – एते भवतः सहायकाः वा?

अरुणः – आम्। वयं बालकानां साहाय्यं कुर्मः।

महेशः – बालकाः पठन्ति। भवन्तः तेषां साहाय्यं कुर्वन्ति। एषः पाठनक्रमः उत्तमः अस्ति।

अरुणः – (बालान् उद्दिश्य) भोः बालकाः, सम्भाषणलेखनं समाप्तं वा? भवन्तः चर्चां कुर्वन्तु। भोः बालिकाः, कथालेखनं समाप्तं वा? भवत्यः प्रश्नवाक्यानि लिखन्तु।

महेशः – मित्र! अहम् आगच्छामि तावत्। भोः बालकाः, भवन्तः सम्यक् पठन्तु।

सर्वे छात्रः – अस्तु, वयं सम्यक् पठामः।

**विशेषः**

**१. बहुवचनम् – प्रथमाविभक्तौ + षष्ठीविभक्तौ**

**सामान्यशब्दाः** | **सर्वनामशब्दाः**

| | एकवचनम् प्रथमा | बहुवचनम् प्रथमा | बहुवचनम् षष्ठी | | एकवचन प्रथमा | बहुवचनम् प्रथमा | बहुवचनम् षष्ठी |
|---|---|---|---|---|---|---|---|
| पुंल्लिङ्गे – | बालकः | बालकाः | बालकानाम् | पुंल्लिङ्गे – | सः | एते | तेषाम् |
| | वृक्षः | वृक्षाः | वृक्षाणाम् | | एषः | एते | एतेषाम् |
| | | | | | कः | के | केषाम् |
| | | | | | भवान् | भवन्तः | भवताम् |
| स्त्रीलिङ्गे– | बालिका | बालिकाः | बालिकानाम् | स्त्रीलिङ्गे – | सा | ताः | तासाम् |
| | माला | मालाः | मालानाम् | | एषा | एताः | एतासाम् |
| | लेखनी | लेखन्यः | लेखनीनाम् | | का | काः | कासाम् |
| | तरुणी | तरुण्यः | तरुणीनाम् | | भवती | भवत्यः | भवतीनाम् |
| | युवतिः | युवतयः | युवतीनाम् | त्रिषु | | | |
| | कृतिः | कृतयः | कृतीनाम् | लिङ्गेषु | अहम् | वयम् | अस्माकम् |
| नपुंसके | पुष्पम् | पुष्पाणि | पुष्पाणाम् | | | | |
| | चित्रम् | चित्राणि | चित्राणाम् | | | | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**क्रियापदानां बहुवचनम् ( वर्तमानकाले )**

**सामान्यक्रियापदानि**

| प्रथमपुरुषे | | उत्तमपुरुषे | |
|---|---|---|---|
| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
| गच्छति | गच्छन्ति | गच्छामि | गच्छाम: |
| पठति | पठन्ति | पठामि | पठाम: |
| लिखति | लिखन्ति | लिखामि | लिखाम: |
| पश्यति | पश्यन्ति | पश्यामि | पश्याम: |

**विशिष्टक्रियापदानि**

| प्रथमपुरुषे | | उत्तमपुरुषे | |
|---|---|---|---|
| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
| करोति | कुर्वन्ति | करोमि | कुर्म: |
| शृणोति | शृण्वन्ति | शृणोमि | शृण्म: (शृणुम:) |
| शक्नोति | शक्नुवन्ति | शक्नोमि | शक्नुम: |
| जानाति | जानन्ति | जानामि | जानीम: |
| क्रीणाति | क्रीणन्ति | क्रीणामि | क्रीणीम: |
| गृह्णाति | गृह्णन्ति | गृह्णामि | गृह्णीम: |
| ददाति | ददति | ददामि | दद्म: |
| (यच्छति) | (यच्छन्ति) | (यच्छामि) | (यच्छाम:) |
| रोदिति | रुदन्ति | रोदिमि | रुदिम: |

* 'त्वम्' इत्यस्य मूलं रूपम् 'युष्मत्' इति। एतस्य प्रयोग: यत्र भवति तत्र मध्यमपुरुषरूपाणि (पठसि, लिखसि इत्यादीनि) प्रयोक्तव्यानि। सरलतादृष्ट्या वयं एतस्मिन् अर्थे 'भवत्' – (भवान्/भवती) शब्दस्य प्रयोगं कुर्म:। तदा प्रथमपुरुषक्रियापदस्य एव प्रयोग: भवति।

उदा – भवान्
भवती } पठति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* ‘अहम्’ इत्यस्य मूलं रूपम् ‘अस्मत्’ इति। एतस्य प्रयोगः यत्र भवति तत्र उत्तमपुरुषक्रियापदरूपाणि प्रयोक्तव्यानि।

उदा – अहं गच्छामि / पठामि / लिखामि / खादामि ...

* अस्मत्-शब्दं (युष्मत्-शब्दं च) विहाय इतरत्र सर्वत्र प्रथमपुरुषप्रयोगः करणीयः।

उदा – पुं. – बालकः/सः/एषः/कः/भवान् गच्छति/खादति/

स्त्री. – बालिका/सा/एषा/का/भवती पठति/लिखति।

नपुं. – वाहनम्/तत्/एतत्/किम्

३. **बहुवचनम् – आज्ञाप्रार्थनादिषु**

| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
|---|---|---|---|
| पठतु | पठन्तु | करोतु | कुर्वन्तु |
| लिखतु | लिखन्तु | शृणोतु | शृण्वन्तु |
| गच्छतु | गच्छन्तु | जानातु | जानन्तु |
| तिष्ठतु | तिष्ठन्तु | क्रीणातु | क्रीणन्तु |
| ददातु | ददतु | गृह्णातु | गृह्णन्तु |

४. **सम्बोधनम् – बहुवचने**

बहुवचने प्रथमाविभक्तेः यत् रूपं तदेव सम्बोधनरूपम् अपि।

उदा – भोः बालकाः, पठन्तु।

भोः बालिकाः, अत्र पश्यन्तु।

५. ‘पठति’, ‘पठतु’ इत्यादीनि ‘पठ्’ धातोः रूपाणि। क्रियापदस्य मूलं रूपं ‘धातुः’ इति उच्यते।

उदा – लिखति – लिख् धातुः

वदति – वद् धातुः

६. केचन विशिष्टाः धातवः –

| | | |
|---|---|---|
| कृ – करोति | नी – नयति | क्रीञ् – क्रीणाति |
| गम् – गच्छति | ष्ठा – तिष्ठति | प्रच्छ् – पृच्छति |
| पा – पिबति | रुद् – रोदिति | घ्रा – जिघ्रति |
| शृ – शृणोति | शक्लृ – शक्नोति | वा – वाति |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ग्रह् – गृह्णाति अस् – अस्ति धा – दधाति
ज्ञा – जानाति दृश् – पश्यति ह्वे – ह्वयति

**अभ्यासः – १५**

नागेशः वासुदेवस्य मित्रम्। सः वासुदेवस्य गृहं गन्तुम् इच्छति। अतः वासुदेवः नागेशं प्रति एकं पत्रं प्रेषितवान् अस्ति। तत्र मार्गविवरणम् अस्ति।

मित्र,

१. भवान् स्वगृहतः मल्लेश्वरवृत्तम् आगच्छतु।
२. तत्र ४१ यानम् आरोहतु।
३. अन्तिमस्थानकं गान्धिवीथिकाम् आगच्छतु।
४. मध्ये कुत्रापि न अवतरतु।
५. यानात् अवतीर्य पार्श्वस्थस्य पद्मसदनस्य पुरतः तिष्ठतु।
६. मम अनुजः यानेन तत्र आगच्छति। तेन सह मम गृहं प्राप्नोतु।
७. षड्वादनपर्यन्तं प्रतीक्षां करोतु।
८. षड्वादनानन्तरम् अपि मम अनुजः न आगतः चेत् भवान् त्रिचक्रिकया आगच्छतु।
९. अथवा अनुजः न आगतः चेत् मह्यं दूरवाणीं करोतु।
१०. अद्य रात्रौ मम गृहे एव तिष्ठतु।
११. श्वः प्रातः इतः एव विद्यालयं गच्छतु।

एतत् पत्रं दृष्ट्वा – 'अहम् एवं करोमि' इति नागेशः चिन्तितवान्। उदाहरणानुसारं तत् चिन्तनं लिखन्तु।

**उदा – १. अहं स्वगृहतः मल्लेश्वरं गच्छामि।**

२. ..........................................................................................
३. ..........................................................................................
४. ..........................................................................................
५. ..........................................................................................
६. ..........................................................................................
७. ..........................................................................................
८. ..........................................................................................
९. ..........................................................................................
१०. ..........................................................................................
११. ..........................................................................................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अभ्यासः - १६**

बहुवचनरूपेण अधस्तनवाक्यानि परिवर्तयन्तु।

उदा - सः बालकः पठति - ते बालकाः पठन्ति।

१. एषः तरुणः लिखति।

.............................................................................................।

२. कः बालकः तिष्ठति ?

.............................................................................................?

३. सा बालिका क्रीडति।

.............................................................................................।

४. एषा युवतिः शृणोति।

.............................................................................................?

५. का विद्यार्थिनी जानाति ?

.............................................................................................।

६. भवान् ददाति।

.............................................................................................।

७. भवती शक्नोति।

.............................................................................................।

८. एषः बालकः रोदिति।

.............................................................................................।

९. सा गृहिणी क्रीणाति।

.............................................................................................।

१०. का कर्मकरी करोति ?

.............................................................................................?

११. एषः छात्रः गृह्णाति।

.............................................................................................।

१२. छात्रः अहं जानामि।

.............................................................................................।

१३. ग्राहकः अहं क्रीणामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

.........................................................................................।

१४. प्रयत्नशील: अहं करोमि।

.........................................................................................।

१५. उदार: अहं ददामि।

.........................................................................................।

## अभ्यास: – १७

अधोनिर्दिष्टेषु रिक्तस्थानेषु बहुवचनरूपाणि लिखन्तु।

उदा – एतस्य मृगस्य चित्रं लिखतु।

एतेषां मृगाणां चित्रं लिखन्तु।

१. तस्य वृक्षस्य शाखा: गृह्णातु।

......................................................शाखा: ..........................।

२. एतस्य बालकस्य कथा: शृणोतु।

......................................................कथा: ..........................।

३. तस्या: कर्मकर्या: वचनं शृणोतु।

......................................................वचनं ............................।

४. एतस्य पात्रस्य प्रक्षालनं करोतु।

......................................................प्रक्षालनं .........................।

५. कस्य बालकस्य पुस्तकानि स्वीकरोमि ?

......................................................पुस्तकानि: .....................।

६. एतस्या: कथाया: अर्थं जानातु।

......................................................अर्थं .............................।

७. भवत्या: स्वभावम् अहं जानामि।

......................................................वयं .............................।

८. कस्या: लताया: पुष्पाणि अवचिनोमि ?

......................................................पुष्पाणि .........................।

९. भवत्या: लेखन्या: आकार: सुन्दर:।

......................................................................आकार: सुन्दर:।

१०. तस्या: सञ्चिकाया: क्रयणे मम इच्छा नास्ति।

.......................................क्रयणे................................इच्छा नास्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः १९

अधोनिर्दिष्टानां क्रियापदरूपाणां धातुरूपं निर्दिशन्तु –

उदा – गच्छति – <u>गम् धातुः</u>

| | |
|---|---|
| १. चलति – (............................) | २. कुर्मः – (.............................) |
| ३. भवति – (............................) | ४. खादति – (...........................) |
| ५. ददातु – (.............................) | ६. क्रीणन्तु – (..........................) |
| ७. जानीमः – (.........................) | ८. रोदिति – (............................) |
| ९. तिष्ठन्ति – (.........................) | १०. शक्नुवन्ति –(......................) |
| ११. खनति – (.........................) | १२. हसति – (..........................) |
| १३. वदामः – (.........................) | १४. अटन्ति – (.........................) |
| १५. क्षिपति – (.........................) | १६. पतामि – (.........................) |

## अभ्यासः १८

रिक्तस्थानानि पूरयन्तु –

(पिबतु, स्थापयतु योजयतु, ददातु, उष्णीकरोतु, शोधयतु, क्वथयतु)

१. प्रथमं क्षीरम् ..................................................................।

२. ततः अर्धचषकमितं जलं चुल्लेः उपरि ............................................।

३. जलं सम्यक् ....................................................................।

४. जलं यदा क्वथति तदा चमसमितं चायचूर्णं जले ..............................।

५. चमसमितां शर्करां जलेन ..............................................................।

६. निमेषद्वयस्य अनन्तरं चायकषायं शोधन्या .......................................।

७. शोधिते चायकषाये अर्धचषकमितं क्षीरं ...........................................।

८. सिद्धं चायपानीयम् अतिथये ..........................................................।

९. भवान् अपि किञ्चित् ...................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ५

## अत्र, तत्र, पुरतः – पृष्ठतः, कुत्र

पुत्री – अम्ब, मम लेखनी कुत्र ?

माता – तत्र एव अस्ति खलु ?

पुत्री – अम्ब, अत्र कुत्रापि नास्ति।

माता – उत्पीठिकायाः उपरि, मञ्चस्य उपरि, कपाटिकायाम् ..............।

पुत्री – कुत्रापि नास्ति अम्ब!

माता – पुस्तकस्य अधः अस्ति वा इति पश्यतु। अधः पतितं वा इति पश्यतु।

पुत्री – पुस्तकस्य अधः अपि नास्ति। अधः न पतितम् अपि।

माता – सुरेशस्य प्रकोष्ठे, तस्य कोषे .... अथवा तस्य स्यूते .....।

पुत्री – सर्वत्र अन्वेषणं कृतवती। कुत्रापि नास्ति ....। अम्, अम्ब! लेखनी प्राप्ता। अत्र, शय्यायाः उपरि आसीत्।

माता – रात्रौ शयनसमये भवती किमपि लेखितुं नीतवती। तत्रैव विस्मृतवती। एकत्र स्थापयति। अन्यत्र अन्वेषणं करोति।


पुत्री – अम्ब, ह्यः सखीगृहतः आनीतानि सस्यानि कुत्र आरोपयामि ? गृहस्य पुरतः, अथवा गृहस्य पृष्ठतः?

माता – मल्लिकां पुरतः आरोपयतु। पृष्ठतः शाकसस्यानि आरोपयामि।

पुत्री – अम्ब, गृहस्य वामतः दक्षिणतः च नारिकेलसस्यम् आरोपयाम।

माता – वत्से, भवत्या ह्यः आनीतं सस्यं बहिः एव अस्ति। अन्तः आनीय स्थापयतु भोः।


**विशेषः**





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




* **सप्तमीविभक्तिरूपाणि –**

| पुंल्लिङ्गे | | स्त्रीलिङ्गे | | नपुंसकलिङ्गे | |
|---|---|---|---|---|---|
| एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् | एकवचनम् | बहुवचनम् |
| बालके | बालकेषु | बालिकायाम् | बालिकासु | पुस्तके | पुस्तकेषु |
| वृक्षे | वृक्षेषु | लतायाम् | लतासु | गृहे | गृहेषु |
| मार्गे | मार्गेषु | नद्याम् | नदीषु | (नपुंसकलिङ्गरूपाणि पुंलिङ्गरूपवत् एव भवन्ति इति जानन्तु।) | |
| कार्यालये | कार्यालयेषु | कूप्याम् | कूपीषु | | |
| तस्मिन् | तेषु | तस्याम् | तासु | | |
| एतस्मिन् | एतेषु | एतस्याम् | एतासु | | |
| कस्मिन् | केषु | कस्याम् | कासु | | |

कुत्र इत्यस्य प्रश्नवाचकस्य उपयोगः यदा भवति तदा उत्तरं सप्तमीविभक्तौ भवति।

उदा – भवान् कुत्र वसति?अहं ग्रामे वसामि।

लेखनी कुत्र अस्ति ?लेखनी कोषे अस्ति।

किन्तु 'कुत्र गच्छति?' – इत्यस्य उत्तरं 'गृहं गच्छामि' इति द्वितीया एव, न तु सप्तमी।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अभ्यासः – २**

तत्र दृष्ट्वा रिक्तस्थानानि उचितैः शब्दैः पूरयतु।



मुनिवरस्य पुरतः ..............................सन्ति।

मुनिवरस्य पृष्ठतः ...........................अस्ति।

मुनिवरस्य उपरि .............................अस्ति।

मुनिवरः वृक्षस्य .............................अस्ति।

मुनिवरस्य अधः .............................अस्ति।

कुटीरस्य अन्तः ..............................अस्ति।

मुनिवरः कुटीरात् ............................अस्ति।

भक्तानां ............................मुनिवरः अस्ति।

**अभ्यासः – २१**

ऊहितेन उचितेन शब्देन रिक्तस्थानानि पूरयन्तु।

१. याने चालकस्य ............................................. जनाः उपविशन्ति।

२. कक्ष्यायाम् अध्यापकस्य .................................. छात्राः उपविशन्ति।

३. वृक्षस्य ................................................ श्रान्तः पथिकः उपविशति।

४. प्रथमस्य अट्टस्य ............................................ द्वितीयः अट्टः भवति।

५. फलस्य ............................................................. बीजं भवति।

६. रेखातः ........................................................यः गच्छति सः बाह्यः।

७. भारतस्य .................................. सिन्धुसागरः (अरबीसमुद्रः) अस्ति।

८. भारतस्य .....................................गङ्गासागरः (बङ्गालकोल्ली) अस्ति।

९. वृत्तस्य परिधेः ................................................ केन्द्रबिन्दुः भवति।

१०. देवालयात् ........................................... भक्ताः पादरक्षां स्थापयन्ति।

**अभ्यासः – २२**

रिक्तस्थानानि सङ्ख्यया सूचितैः पदैः पूरयन्तु।

(१) अत्र (२) तत्र (३) सर्वत्र (४) अन्यत्र (५) कुत्र (६) एकत्र

१. भवती (१) .................. एव तिष्ठतु। (५) ........... अपि मा गच्छतु

२. भवान् (२) ......................................................... उपविश्य पठतु।

३. किमर्थं (३) ................................................ वृथा अटति भवती ?

४. सः (६) ................. वस्तु स्थापयति। (४) .............अन्वेषणं करोति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. भवत: पुस्तकं (५) ................................अस्ति इति अहं न जानामि।

६. (२) ................. जलम् अस्ति। अत: (१) .................. उपविशतु।

७. (३) ................................. देव: अस्ति इति भारतीया: विश्वसन्ति।

८. भवत: गृहं (५) ................................................................अस्ति?

९. मम गृहम् इदानीं (२) ................ नास्ति। (४) .....................अस्ति।

१०. (३) ......................... मा पश्यतु। (१) ........................... पश्यतु।

**अभ्यास: - २३**

i. पुस्तकं कुत्र अस्ति ?

| |
|---|
| प्रकोष्ठ: |
| गृहम् |
| शाला |
| उत्पीठिका |
| कपाटिका |
| स्यूत: |
| आपण: |

१. पुस्तकं प्रकोष्ठे अस्ति।

२. ''...............................''।

३. ''...............................''।

४. ''...............................''।

५. ''...............................''।

६. ''...............................''।

७. ''...............................''।

ii. बालक: कुत्र उपविशति?

| |
|---|
| आसन्द: |
| कट: |
| वस्त्रकट: |
| मञ्चि: |
| भूमि: |
| आन्दोलिका |
| पाकशाला |
| उद्यानम् |

१. बालक: आसन्दे उपविशति।

२. ''...............................''।

३. ''...............................''।

४. ''...............................''।

५. ''...............................''।

६. ''...............................''।

७. ''...............................''।

८. ''...............................''।

**अभ्यास: - २४**

आवरणै: दत्तस्य शब्दस्य बहुवचनरूपेण रिक्तस्थानं पूरयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उदा – वानराः ..... (वृक्षाः) निवसन्ति।

वानराः <u>वृक्षेषु</u> निवसन्ति।

१. पुष्पाणि .............................................................. (लताः) विराजन्ते।

२. .............................................................. (कूप्यः) औषधम् अस्ति।

३. उद्योगिनः ............................................. (कार्यालयाः) कार्यं कुर्वन्ति।

४. यानानि .............................................................. (मार्गाः) सञ्चरन्ति।

५. छात्राः .......................................................... (विद्यालयाः) पठन्ति।

६. जनाः ....................................................... (आसन्दाः) उपविशन्ति।

७. ......................................................... (आपणाः) विक्रयणं प्रचलति।

८. .................... (एतानि)....................... (पुस्तकानि) दोषाः न सन्ति।

९. ......................(भारतीयाः) ...................(जनाः) देवभक्तिः अधिका।

१०. सा ........................................... (सख्यः) अधिकं विश्वासं करोति।

११. ...............................................(चलनचित्राणि) मम आसक्तिः नास्ति।

१२. .......................................................(गृहिण्यः) कार्यकौशलं सहजम्।

१३. विद्यार्थिनः ......................................... (टिप्पणीपुस्तकानि) लिखन्ति।

१४. समुद्रतीरे बालकाः .......................................... (सिकताः) क्रीडन्ति।

१५. नटः ............................................ (चलनचित्राणि) अभिनयं करोति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**द्वितीया - ए. व. + ब. व.,**

**लेखननियमाः** I & II

माताः - रमेश! किं करोति भवान् ?

रमेशः - पाठं पठामि अम्ब!

माताः - वत्स! आपणं गत्वा लवणं, शर्कराम्, आढकीं, गुडं च आनयतु भोः।

रमेशः - भगिनीं वदतु अम्ब!

माताः - सा अवकरान् क्षिप्त्वा पात्राणि क्षालयति। जलेन लताः सिञ्चति। ततः कर्मकरीः क्षेत्रं प्रापयति। एवं तस्याः बहूनि कार्याणि सन्ति।

रमेशः - ममापि पठनं बहु अस्ति।

माताः - दशनिमेषाभ्यन्तरे आपणं गत्वा आगन्तुं शक्यते। अनन्तरं पाठान् पठतु भवान्।

रमेशः - हूँ, शीघ्रं धनं स्यूतं च ददातु।

**विशेषः**

**द्वितीयाविभक्तिः**

| पुंल्लिङ्गे | | | स्त्रीलिङ्गे | | | नपुंसकलिङ्गे | | |
|---|---|---|---|---|---|---|---|---|
| प्रथमा | द्वितीया ए.व. | ब.व. | प्रथमा | द्वितीया ए.व. | ब.व. | प्रथमा | द्वितीया ए.व. | ब.व. |
| बालकः | बालकम् | बालकान् | लता | लताम् | लताः | पात्रम् | पात्रम् | पात्राणि |
| पाठः | पाठम् | पाठान् | लेखनी | लेखनीम् | लेखनीः | कार्यम् | कार्यम् | कार्याणि |
| सः | तम् | तान् | सा | ताम् | ताः | तत् | तत् | तानि |
| एषः | एतम् | एतान् | एषा | एताम् | एताः | एतत् | एतत् | एतानि |
| कः | कम् | कान् | का | काम् | काः | किम् | किम् | कानि |
| भवान् | भवन्तम् | भवतः | भवती | भवतीम् | भवतीः | | | |

त्रिषु लिङ्गेषु - अहम् माम् अस्मान्

**लेखननियमः** - I

१. अनुस्वारः = (ं) (रेखायाः उपरि बिन्दुः)

२. अनुस्वारस्य पुरः स्वरः अस्ति चेत् 'म्' लेखनीयम्।

उदा - शर्करां + आढकीम् = शर्कराम् आढकीम् - शुद्धम्

शर्करां आढकीम् - अशुद्धम्

३. अनुस्वारस्य पुरतः व्यञ्जनम् अस्ति चेत् अनुस्वारः एव लेखनीयः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उदा – आपणं + गत्वा

एवं + तस्याः

४. पूर्णविरामात् पूर्वम् अनुस्वारस्य स्थाने 'म्' एव लेखनीयं, न तु अनुस्वारः।

उदा – i) एकं यानं गतम्। – शुद्धम्

एकं यानं गतं। – अशुद्धम्

ii) पाठम् – शुद्धम्

पाठं – अशुद्धम्

* **लेखननियमः** – II

**कवर्गः**

| अशुद्धम् | शुद्धम् |
|---|---|
| कंकणम् | कङ्कणम् |
| शंखः | शङ्खः |
| गंगा | गङ्गा |
| संघः | सङ्घः |

**चवर्गः**

| अशुद्धम् | शुद्धम् |
|---|---|
| संचिका | सञ्चिका |
| प्रोंछः | प्रोञ्छः |
| अंजनम् | अञ्जनम् |
| झंझा | झञ्झा |

**टवर्गः**

| अशुद्धम् | शुद्धम् |
|---|---|
| कंटकम् | कण्टकम् |
| कंठः | कण्ठः |
| अंडम् | अण्डम् |

**तवर्गः**

| अशुद्धम् | शुद्धम् |
|---|---|
| अंतः | अन्तः |
| कंथा | कन्थाः |
| कंदम् | कन्दम् |
| अंधः | अन्धः |

**पवर्गः**

| अशुद्धम् | शुद्धम् |
|---|---|
| कंपनम् | कम्पनम् |
| तुंफनम् | तुम्फनम् |
| अंबा | अम्बा |
| अंभोधिः | अम्भोधिः |

कवर्गः – क, ख, ग, घ, ङ

चवर्गः – च, छ, ज, झ, ञ

टवर्गः – ट, ठ, ड, ढ, ण एतानि सर्वाणि वर्गीयव्यञ्जनानि।

तवर्गः – त, थ, द, ध, न

पवर्गः – प, फ, ब, भ, म

* अनुस्वारः (–ं) + वर्गीयव्यञ्जनम् = पञ्चमाक्षरम् + वर्गीयव्यञ्जनम्

उदा – 'कंकणम्' इत्यत्र अनुस्वारस्य पुरतः कवर्गस्य व्यञ्जनम् अस्ति।

अतः अनुस्वारस्य स्थाने कवर्गस्य एव पञ्चमाक्षरम् (ङ्) आगतम्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अतः 'कङ्कणम्' इति रूपं सिद्धम्।

एवमेव गङ्गा, सञ्चिका, कण्टकम्, अन्धः, अम्बा इत्यादिषु अपि। एतस्मिन् पुस्तके एते लेखननियमाः सर्वत्र अनुसृताः इति अंशं परिशीलयन्तु।

**अभ्यासः – २५**

आवरणे सूचितेषु उचितं शब्दं चित्वा तस्य द्वितीयाविभक्तिरूपेण रिक्तस्थानं पूरयन्तु।

उदा – स: प्रतिदिनं .......................... पठति। (पाठः/वृक्षः/स्यूतः।)
स: प्रतिदिनं <u>पाठं</u> पठति।

१. बालकः .......................................... पिबति। (फलरसः/पाठः/नलिका)

२. सेवकः .............................................. नयति। (बन्धः/आकाशः/नदी।

३. भगिनी .................................................. खादति। (फलम्/शिला/कूपः)

४. भवान् श्लोकस्य ............................ जानातु। (आसन्दः/पुष्पम्/अर्थः)

५. कर्मकरी ..................................... प्रक्षालयति। (जलम्/पात्रम्/नक्षत्रम्)

६. बालिका ......................................... शृणोति। (श्लोकः/पानीयम्/द्वारम्)

७. ग्राहकः ......................................... क्रीणाति। (क्रोधः/शब्दः/लेखनी)

८. छात्राः ........................................ गच्छति। (विद्यालयः/पाठः/उत्पीठिका)

९. कृषिकः .................................... पालयति। (विदेशः/महिषी/पातालः)

१०. सः ................................................ ज्वालयति। (मार्गः/भूमिः/दीपः)

११. देशभक्तः ........................................ पूजयति। (विदेशः/देशः/स्वार्थः)

१२. भवान् ................................. आहूतवान् वा ?(पत्रम्/अहम्/भवान्)

१३. भवती .................................. तत्र स्थापयतु। (वृष्टिः/समुद्रः/स्यूतः)

१४. एषः .......................................... लिखति। (सन्तोषः/चित्रम्/पठनम्)

१५. माता ............................................... सिञ्चति। (लता/पानीयम्/मेघः)

**अभ्यासः – २६**

भवान्/भवती चित्रे किं पश्यति ?

उदा – १. अहं चित्रे वृक्षान् पश्यामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. अहं चित्रे ..........................पश्यामि।

३. ''  '' .......................... ''  ।

४. ''  '' .......................... ''  ।

५. ''  '' .......................... ''  ।

६. ''  '' .......................... ''  ।

७. ''  '' .......................... ''  ।

८. ''  '' .......................... ''  ।

९. ''  '' .......................... ''  ।

१०. ''  '' .......................... ''  ।


११. ''  '' .......................... ''  ।

१२. ''  '' .......................... ''  ।

१३. ''  '' .......................... ''  ।

१४. ''  '' .......................... ''  ।

१५. ''  '' .......................... ''  ।



**अभ्यासः – २७**

अधः सूचितेषु उदाहरणेषु अनुस्वारस्य अनन्तरं स्वरः अस्ति वा व्यञ्जनम् अस्ति वा इति सूचयित्वा मकारम् अनुस्वारं वा लिखन्तु।

उदा – अहं + एकवारम् – (स्वरः) – अहम् एकवारम्

अहं + सर्वदा – (व्यञ्जनम्) – अहं सर्वदा।

१. गृहं + आगतः (....................) – ...............................।

२. गृहं + गतः – (....................) – ...............................।

३. फलं + नीत्वा – (....................) – ...............................।

४. फलं + आनीय – (....................) – ...............................।

५. बालकं + आहूय – (....................) – ...............................।

६. तं + उक्त्वा – (....................) – ...............................।

७. तं + दृष्ट्वा – (....................) – ...............................।

८. शालां + गतवान् – (....................) – ...............................।

९. वृक्षं + आरुह्य – (....................) – ...............................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. वार्ता + श्रुतवान् - (..................)- ..............................।

**अभ्यासः - २८**

अधः सूचितेषु वाक्येषु लेखनदोषस्थलं ज्ञात्वा शुद्धं रूपम् आवरणे लिखन्तु।

उदा - सः गृहं आगत्य फलं खादितवान्। (गृहम् आगत्य)

१. गृहं आगतं मित्रं सः सत्कृतवान्। (..................................................)

२. फलं समीचीनं आसीत्। (..........................................................)

३. भवान् पुस्तकं अत्र स्थापयतु। (....................................................)

४. सः एतं विचारं अङ्गीकृतवान्। (....................................................)

५. अम्बा गच्छन्तं बालं आहूतवती। (...................................................)

६. आचार्यः उत्तमं वाक्यं उदाहरति। (..................................................)

७. एतं बन्धं उन्नयतु तावत्। (..........................................................)

८. आपणात् लवणं आलुकं च आनयतु। (...........................................)

९. सः मन्दिरं गत्वा देवं अर्चति। (......................................................)

१०. अर्थं अवगत्य वाक्यं वदतु। (.......................................................)

**अभ्यासः - २९**

अधः सूचितेषु उदाहरणेषु यत्र आवरणं निर्दिष्टं तत्र अनुस्वारः स्थाने चेत्'✓' चिह्नम्, अस्थाने चेत् '✗' चिह्नं च लिखन्तु।

उदा - सः अनुजं। (✗) आहूय एकं (✓) प्रश्नं (✓) पृष्टवान्।

१. तस्य वचनं (................) अहं (................) अङ्गीकृतवान्

२. अहं (................)सर्वदा उत्तमं।(................) पुस्तकं (................) इच्छामि।

३. सा भिक्षुकं (................)आहूय अन्नं(................)व्यञ्जनं(................) च दत्तवती।

४. पुस्तकं(................)दृष्ट्वा सः एकं(................)वाक्यं(................)उक्तवान्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. माता फलं(................)गृहीत्वा छुरिकां(................)अन्विष्टवती।

६. पाठं(................)पठतु इति अहं(................)अनुजं(................)उक्तवान्।

७. वयं(................)गृहं(................)आगत्य पाठं(................)पठामः।

८. गीतं(................)गायन्तीं(................)अनुजां(................)अग्रजः आहूतवान्।

९. निद्रां(................)कृतवन्तं(................)एतं(................)मा उत्थापयतु।

१०. आगतं(................)यानं(................)दृष्ट्वा वयं (................) धावितवन्तः।

**अभ्यासः - ३०**

अधोनिर्दिष्टेषु शब्देषु अनुस्वारस्य अनन्तरं कस्य वर्गस्य व्यञ्जनम् अस्ति इति, तस्य वर्गस्य पञ्चमाक्षरं किम् इति च निर्दिश्य अन्ते शुद्धं रूपं निर्दिशन्तु।

| शब्दः | अनुस्वारस्य अनन्तरं स्थितस्य वर्गस्य नाम | तस्य वर्गस्य पञ्चमाक्षरम् | शुद्धं रूपम् |
|---|---|---|---|
| उदा - १. अंकः | कवर्गः | ङ् | अङ्कः |
| २. कंकतम् | ............................. | ............... | ....................... |
| ३. अंगम् | ............................. | ............... | ....................... |
| ४. अंबुदः | ............................. | ............... | ....................... |
| ५. कंधारः | ............................. | ............... | ....................... |
| ६. स्पंदनम् | ............................. | ............... | ....................... |
| ७. पंचमः | ............................. | ............... | ....................... |
| ८. संधानम् | ............................. | ............... | ....................... |
| ९. अंघ्रिः | ............................. | ............... | ....................... |
| १०. व्यंजनम् | ............................. | ............... | ....................... |
| ११. भांडम् | ............................. | ............... | ....................... |
| १२. कुंभः | ............................. | ............... | ....................... |
| १३. शुंठी | ............................. | ............... | ....................... |
| १४. सिंधूरम् | ............................. | ............... | ....................... |
| १५. दंभः | ............................. | ............... | ....................... |
| १६. शृंखला | ............................. | ............... | ....................... |
| १७. प्रपंचः | ............................. | ............... | ....................... |
| १८. डिंडिमः | ............................. | ............... | ....................... |
| १९. उंछवृत्तिः | ............................. | ............... | ....................... |
| २०. मंथरा | ............................. | ............... | ....................... |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ७ भूतकाले – ए. व + ब. ब

पिता – रमेश! रजकापणत: भवान् मम वस्त्राणि आनीतवान् वा?

रमेश: – आम्। तानि आनीय भवत: प्रकोष्ठे स्थापितवान्।

पिता – अद्य पादकन्दुकस्पर्धा आसीत् खलु ?के जयं प्राप्तवन्त: ?

रमेश: – वयम् एव जयं प्राप्तवन्त:। सर्वे अध्यापका: अस्माकं श्लाघनं कृतवन्त:।

पिता – सीते! भवती राजारामस्य गृहं गत्वा पुस्तकं दत्तवती खलु?

पिता – आम्। प्रात: काले एव दत्तवती। अहं, गिरिजा, लीला, उमा मिलित्वा गतवत्य:।

पिता – तर्हि तत्र सम्यक् जल्पनं कृतवत्य: वा ?

सीता – न। इत: अहं नववादने प्रस्थितवती। मार्गे गिरिजादय: मिलितवत्य:।
तत: सर्वा: मिलित्वा राजारामवर्यस्य गृहं गतवत्य:। पुस्तकं दत्त्वा
सार्धनववादने शालां प्राप्तवत्य:।

**विशेष:**

* भूतकाल:

| वर्तमानकाले | भूतकाले | | | |
|---|---|---|---|---|
| | पुंल्लिङ्गे | | स्त्रीलिङ्गे | |
| | एकवचने | बहुवचने | एकवचने | बहुवचने |
| पठति | पठितवान् | पठितवन्त: | पठितवती | पठितवत्य: |
| गच्छति | गतवान् | गतवन्त: | गतवती | गतवत्य: |
| वदति | उक्तवान् | उक्तवन्त: | उक्तवती | उक्तवत्य: |
| लिखति | लिखितवान् | लिखितवन्त: | लिखितवती | लिखितवत्य: |
| करोति | कृतवान् | कृतवन्त: | कृतवती | कृतवत्य: |
| पश्यति | दृष्टवान् | दृष्टवन्त: | दृष्टवती | दृष्टवत्य:। |

* भूतकाले 'अपठत्' 'अगच्छत्' 'अवदत्' इत्यादीनि रूपाणि अपि प्रयुज्यन्ते। किन्तु तानि रूपाणि उपयोक्तव्यानि चेत् उपसर्गसहितधातूनां प्रयोगे जागरूकता आश्रयणीया भवति। तत्रैव दोषाणां सम्भावना अत्यधिका। अत: सरलतादृष्ट्या 'गतवान्' 'पठितवान्' इत्यादीनि रूपाणि प्रयुज्यन्ते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

* 'गतवान्' 'पठितवान्' इत्यादीनि भूतकृदन्तरूपाणि ('क्तवतु' प्रत्ययान्तानि) इति उच्यन्ते। एतानि क्रियापदानि न। एतेषां विभक्तिरूपाणि (गतवान्, गतवन्तौ, गतवन्तः इत्येवम्) भवन्ति। (क्रियापदानां तु पुरुषव्यवस्था भवति – गच्छति, गच्छामि इत्येवम्।) एतानि क्रियापदानि न चेदपि क्रियापदस्य अर्थम् एव सूचयन्ति। अतः एव क्रियापदस्थले एतेषां प्रयोगः क्रियते।

**अभ्यासः – ३१**

रिक्तस्थानानि भूतकालरूपैः पूरयन्तु। साहाय्यार्थम् आवरणे भूतकालरूपस्य भागः सूचितः अस्ति।

उदा – बालकः फलं ...........। (खादित–)

बालकः फलं खादितवान्।

१. सेवकः कार्यं ........................................................................। (कृत–)

२. आचार्यः कथाम् ....................................................................। (उक्त–)

३. माता पुत्रीम् .......................................................................। (आहूत–)

४. अहं चित्रं ............................................................................। (दृष्ट–)

५. छात्रः प्रश्नं .........................................................................। (पृष्ट–)

६. अहं वाक्यस्य अर्थं ...............................................................। (ज्ञात–)

७. सेविका पात्रं .......................................................................। (प्रक्षालित–)

८. सः मां ...................................................................................। (स्मृत–)

९. अहं पुस्तकं .........................................................................। (क्रीत–)

१०. धनिकः धनं ........................................................................। (दत्त–)

११. पुत्रः पुस्तकानि ...................................................................। (आनीत–)

१२. अनुजा उत्तराणि ..................................................................। (लिखित–)

१३. कृपणः धनं .........................................................................। (गणित–)

१४. भगिनी पत्रं ........................................................................। (प्रेषित–)

१५. सखी फलं ...........................................................................। (खादित–)

**अभ्यासः – ३२**

भूषणः प्रतिदिनं प्रातः तत्तद्दिने करणीयानि कार्याणि एकत्र लिखति। रात्रौ किं किं कृतम् इति चिह्नेन अङ्कयति। एकस्य दिनस्य कार्यविवरणम् अत्र अस्ति –

अद्य– १. अध्यापकस्य गृहं गच्छामि ✗ २. मित्रेण सह चर्चां करोमि। ✓



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

३. गीताया: दशमाध्यायं पठामि। ✓ ४. अनुजाय पत्रं लिखामि। ✗

५. युतकवस्त्रं क्रीणामि। ✗ ६. यानं समीकरोमि। ✓

७. भगिन्यै पुस्तकं प्रेषयामि। ✗ ८. कथापुस्तकं प्रत्यर्पयामि। ✓

९. मूल्याङ्कान् पुस्तके योजयामि। ✗ १०. सायं पदकन्दुकेन क्रीडामि। ✗

११. याने इन्धनतैलं पूरयामि। ✓ १२. पाठान् परिशीलयामि। ✗

उपरितनविवरणस्य आधारेण स: किं कृतवान् किं किं न कृतवान् लिखन्तु।

उदा – १. भूषण: अध्यापकस्य गृहं न गतवान्।

२. ...........................................................................................।

३. ...........................................................................................।

४. ...........................................................................................।

५. ...........................................................................................।

६. ...........................................................................................।

७. ...........................................................................................।

८. ...........................................................................................।

९. ...........................................................................................।

१०. ...........................................................................................।

११. ...........................................................................................।

१२. ...........................................................................................।

**अभ्यास: – ३३**

गणेश: बालिकाप्रौढशालाया: अध्यापक:। वार्षिकोत्सवनिमित्तं स: काश्चन विद्यार्थिनी: उद्दिश्य कानिचन कार्याणि उक्तवान् आसीत्। तासु काश्चन कृतवत्य:। अन्या: काश्चन न कृतवत्य:। का किं करोति इति, सा कृतवती वा न वा इति च स: स्वपुस्तके एवं लिखितवान् अस्ति।

१. माधवी माला: क्रीणाति। ✓ २. श्रीविद्या नृत्याभ्यासं करोति। ✓

३. माला अतिथिगृहं गच्छति। ✗ ४. कला कार्यक्रमावलीं लिखति। ✗

५. नर्मदा भावचित्रम् अलङ्करोति। ✓ ६. कावेरी रङ्गवल्लीचूर्णम् आनयति। ✗

७. विनुता प्रदर्शिनीम् आयोजयति। ✓ ८. सुधा प्रदर्शिन्यर्थं वस्तूनि सङ्गृह्णाति। ✓

९. रश्मी स्वच्छताकार्यं परिशीलयति। ✓ १०. पद्मा आसन्दान् आनयति। ✗



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

११. गीता खनित्राणि प्रत्यर्पयति। ✗ १२. करुणा पानीयं व्यवस्थापयति। ✓

तदाधारेण का किं कृतवती/न कृतवती इति लिखन्तु।

उदा – १. माधवी माला: क्रीतवती।

२. ..........................................................................................।

३. ..........................................................................................।

४. ..........................................................................................।

५. ..........................................................................................।

६. ..........................................................................................।

७. ..........................................................................................।

८. ..........................................................................................।

९. ..........................................................................................।

१०. ..........................................................................................।

११. ..........................................................................................।

१२. ..........................................................................................।

**अभ्यास: – ३४**

आवरणे दत्तानां वर्तमानरूपाणां भूतकालरूपाणि (बहुवचने) लिखन्तु।

उदा – बालका: पाठं (पठन्ति) ..........................।

बालका: पाठं पठितवन्त:।

१. छात्रा: कोलाहलं (कुर्वन्ति) ......................................................।

२. ते वाक्यानि (वदन्ति) ..........................................................।

३. बालिका: गीतं (गायन्ति) ......................................................।

४. भवत्य:कथां (लिखन्ति) ......................................................।

५. विद्यार्थिन: क्रीडाङ्गणे (क्रीडन्ति) ...............................................।

६. सर्वे विषयं (जानन्ति) ..........................................................।

७. सभ्या: भाषणं (शृण्वन्ति) ......................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८. वयं प्रातः काले (उत्तिष्ठामः) (पु) ..............................................।

९. वयं लखेनीं (क्रीणीमः) (स्त्री) ..................................................।

१०. गृहिण्यः भिक्षां (ददति) ...............................................................।

११. भगिन्यः श्लोकान् (स्मरन्ति) ........................................................।

१२. ताः फलानि (कर्तयन्ति) ..............................................................।

१३. एते किमर्थं न (आगच्छन्ति) ........................................................।

१४. भवन्तः पानीयं (पिबन्ति) ............................................................।

१५. एताः उच्चैः (हसन्ति) ................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# 8 समयः ह्यः, परह्य, कदा, गत-आगामि

सीता – किमर्थ प्रतिदिनं भवत्याः आगमने विलम्बः ?

उमा – किं करोमि?सपादनववादने यानं प्राप्तम्। सार्धनववादने नगरसभास्थानकं प्राप्तवती। ततः पादाभ्याम् आगतवती।

सीता – कदा भवती गृहात् प्रस्थितवती?

उमा – पादोन-नववादने एव प्रस्थितवती। दशोननववादने स्थानकं प्राप्तवती। पञ्चोननववादने, नववादने, पञ्चाधिकनववादने, दशाधिकनववादने च यानि यानानि आगतानि, तेषु एकस्मिन् अपि स्थलं न आसीत्।

सीता – पादोननववादने महिलानां निमित्तं विशेषयानम् आसीत् खलु?

उमा – स्थानकप्राप्तितः पूर्वं तत् निर्गतम् आसीत्।

* * *

आचार्यः – अहं सुभाषितानि कदा पाठितवान्?ह्यः वा,?परह्यः वा?

श्रीनाथः – श्रीमन्! ह्यः भवान् 'वृद्धायाः देशप्रेम' इति पाठं पाठितवान्।

रामः – ह्यः परह्यः च भवान् 'वृद्धायाः देशप्रेम' इति पाठम् एव पाठितवान्। प्रपरह्यः सुभाषितानि पाठितवान्।

आचार्यः – अस्तु, ह्यः, परह्यः, प्रपरह्यः वा अहं सुभाषितानि पाठितवान् स्याम्। इदानीं तानि पृच्छामि। तानि कण्ठस्थीकृतवन्तः खलु भवन्तः?

छात्राः – न श्रीमन्!

आचार्यः – तर्हि कदा कण्ठस्थीकृत्य वदन्ति?श्वः....?

ज्योत्स्नाः – श्वः मास्तु, परश्वः।

यशोदा – प्रपरश्वः भवतु श्रीमन्!

आचार्यः – तथैव भवतु।श्वः परश्वः च कण्ठस्थीकरणार्थम् अवकाशः। प्रपरश्वः तन्नाम – आगामिसोमवासरे – सर्वैः तानि वक्तव्यानि।

श्रीनाथः – गतसप्ताहे भवता पाठितान् अमरकोषश्लोकान् अहं कण्ठस्थीकृतवान्।

आचार्यः – हां, प्रतिदिनम् अमरकोषश्लोकानाम् आवर्तनं भवेत् खलु ?इदानीं तान् पठाम।


**विशेष**

* **समयः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




| | शुद्धम् | अशुद्धम् |
|---|---|---|
| १.०० | एकवादनम् | एकं वादनम् |
| २.०० | द्विवादनम् | द्वे वादनम् |
| ३.०० | त्रिवादनम् | त्रीणि वादनम् |
| ४.०० | चतुर्वादनम् | चत्वारि वादनम् |

* **समयविषये प्रश्नः –**

कः समयः ? .................... समीचीनम्

कतिवादनम्/किं वादनम्? .................. असमीचीनम्

प्रपरह्यः ⇦ परह्यः ⇦ ह्यः ⇦ अद्य ⇨ श्वः ⇨ परश्वः ⇨ प्रपरश्व

गतकालः | आगामिकालः

**गतसोमवासरः** ......................................................

**गतवर्षम्**

**गत पक्षः**

**इत्यादयः**

**आगामिसप्ताहः**

**आगामिमासः**

**इत्यादयः**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

...........................................................**अद्य-( २४ घण्टा: )**...........................................................

-----------------------------------------------------------------------

**इदानीम्**


दिने दिने = प्रतिदिनम्

मासे मासे = प्रतिमासम्

वर्षे वर्षे = प्रतिवर्षम्

रविवासरे रविवासरे = प्रतिरविवासरम्

**अभ्यासः - ३५**




**उदा - १ अहं चतुर्वादने उत्तिष्ठामि।**

२. ........................................................................ सीता भोजनं करोति।

३. ह्यः ................................................................. गोविन्दः मिलितवान्।

४. ............................................................. अहम् अधिकारिणं दृष्टवान्।

५. ................................................................... अहं कार्यालयं गच्छामि।

६. ................................................................. कार्यालयात् सः निर्गतः।

७. ........................................................... भवतः स्नेहितः आगतः आसीत्।

८. ....................................................................भवान् कुत्र गतवान् आसीत्।

९. ......................................................... अधिकारी भवन्तम् आहूतवान्।

१०. ................................................................. भवान् मम गृहम् आगच्छतु।

११. ............................................................................ एकं यानं निर्गतम्।

**अभ्यासः ३६**

आवरणे सूचितं समयम् अक्षरैः लिखन्तः वाक्यानि पूर्णानि कुर्वन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उदा – अहं प्रात: (५.००) ..................... उत्तिष्ठामि।

अहं प्रात: पञ्चवादने उत्तिष्ठामि।

१. राम: प्रात: (५.३०) ..........................................................उत्तिष्ठति।

२. गोविन्द: प्रात: (५.४५) .....................................एकात्मतास्तोत्रं पठति।

३. सीता (७.१५) ........................................................ पूजां करोति।

४. सायं (७.१०) ................................ आकाशवाण्यां संस्कृतवार्ता भवति।

५. ह्य: प्रात: (६.५५) ........................................................ विद्युत्गता।

६. भवान् (८.५०) ...................................... मम गृहे उपस्थित: भवतु।

७. (१२.०५) ....................................................... स: शालात: निर्गत:।

**अभ्यास: – ३७**

प्रपश्व: भानुवासर:। तर्हि।

१. ........................................................................ शनिवासर:।

२. ........................................................................ शुक्रवासर:।

३. ........................................................................ गुरुवासर:।

४. ........................................................................ मङ्गलवासर:।

५. ........................................................................ सोमवासर:।

६. ........................................................................ बुधवासर:।

**अभ्यास: – ३८**

| | |
|---|---|
| १. सोमवासर: – धावनस्पर्धा: | ५. शुक्रवासर: – अन्तिमघट्टस्पर्धा: |
| २. मङ्गलवासर: –कौशलस्पर्धा: | ६. शनिवासर: – वार्षिकोत्सव: |
| ३. बुधवासर: – गणस्पर्धा: | ७. भानुवासर: – अध्यापकगोष्ठी |
| ४. गुरुवासर: – छद्मवेषस्पर्धा | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उपरि अध्यापकस्य साप्ताहिककार्ययोजना लिखिता अस्ति। प्रश्नम् उत्तरं च उदाहरणानुसारं लिखन्तु।

उदा – १. प्रश्नः – धावनस्पर्धाः कदा?उत्तरम् – धावनस्पर्धाः – सोमवासरे।

प्र – .......................................? उ – ..................................................।

प्र – .......................................? उ – ..................................................।

प्र – .......................................? उ – ..................................................।

प्र – .......................................? उ – ..................................................।

प्र – .......................................? उ – ..................................................।

प्र – .......................................? उ – ..................................................।

**अभ्यासः – ३९**

| आगताः | भविष्यन्ति |
|---|---|
| १. गतसप्ताहः – गोविन्दः | ७. आगामिसप्ताहः – कार्यकर्तृगोष्ठी |
| २. गतमासः – निर्देशकः | ८. आगामिपक्षः – शारदोत्सवः |
| ३. गतवर्षम् – मन्त्री | ९. आगामिमासः – वार्षिकोत्सवः |
| ४. गतपक्षः – नगरसभाध्यक्षः | १०. आगामिचैत्रमासः – वसन्तोत्सवः |
| ५. गतमार्चमासः – स्नेहितः | ११. आगामिवर्षम् – मम पदवृद्धिः |
| ६. गतकार्यक्रमः –कविः | १२. आगामिकालः – देशाभिवृद्धिः |

**उपरितनकोष्ठकस्य आधारेण वाक्यानि लिखन्तु।**

**उदा – १ गतसप्ताहे गोविन्दः मम कार्यालयम् आगतवान्।**

२. ...................................... निर्देशकः मम कार्यालयम् आगतवान्।

३. ............................................. मन्त्री मम कार्यालयम् आगतवान्।

४. ................................................... मम कार्यालयम् आगतवान्।

५. ..........................................................................................।

६. ..........................................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७. आगामिसप्ताहे कार्यकर्तृगोष्ठी भविष्यति।

८. .......................................शारदोत्सवः.........................................।

९. .......................................वार्षिकोत्सवः.........................................।

१०. ...............................................................................................।

११. ...............................................................................................।

१२. ...............................................................................................।

**अभ्यासः – ४०**

उदाहरणवाक्यम् अनुसरन्तः आवरणे दत्तस्य पदस्य साहाय्येन रिक्तस्थानं पूरयन्तु।

उदा – सः .................... (दिने दिने) योगासनं करोति।

सः प्रतिदिनं योगासनं करोति।

१. अहं .................................... (सप्ताहे सप्ताहे) रामकृष्णाश्रमं गच्छामि।

२. ..................................... (मासे मासे) अत्र सम्भाषणशिविरं प्रचलति।

३. .................................... (शनिवासरे शनिवासरे) साप्ताहिकगोष्ठी प्रचलति।

४. ......................................... (वर्षे वर्षे) वयं वार्षिकोत्सवम् आचरामः।

५. ............................................ (दिने दिने) अहं प्रातः पञ्चवादने उत्तिष्ठामि।

६. अस्माकं पाठशालायां .......................... (पक्षे पक्षे) प्रदोषपूजा प्रचलति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## ९ भविष्यत्कालः – ए.व. + ब.व.

पत्नी – सोमवासरे प्रत्यागमिष्यति खलु भवान् ?

पति – आम्। सोमवासरे प्रातः अत्र भविष्यामि।

पत्नी – सुरेशः, तस्य पत्नी–पुत्राः च अपि भवता सह आगमिष्यन्ति खलु।

पतिः – आम्‌श्वः नागराजस्य विवाहस्य निमित्तं सुरेशः सपरिवारं आगमिष्यति, वयं सर्वे सम्भूय परश्वः धर्मस्थलं गमिष्यामः। ततः रात्रौ प्रस्थाय प्रपरश्वः अत्र प्राप्स्यामः। प्रातः उपाहारसमये वयम् उपस्थिताः भविष्यामः।

पत्नी – यदि लोकयानं समये आगच्छेत् तर्हि।

पतिः – आम्। तदपि सत्यम एव। अस्तु, अहम् आगच्छामि तावत्।

पत्नी – शुभप्रयाणम्। शुभास्ते पन्थानः सन्तु।

**विशेषः**

* **भविष्यत्कालः**

| वर्तमानकाले | भविष्यत्काले | | वर्तमानकाले | भविष्यत्काले | |
|---|---|---|---|---|---|
| | एकवचने | बहुवचने | | एकवचने | बहुवचने |
| गच्छति | गमिष्यति | गमिष्यन्ति | पिबति | पास्यति | पास्यन्ति |
| पठति | पठिष्यति | पठिष्यन्ति | शृणोति | श्रोष्यति | श्रोष्यन्ति |
| लिखति | लेखिष्यति | लेखिष्यन्ति | नयति | नेष्यति | नेष्यन्ति |
| स्थापयति | स्थापयिष्यति | स्थापयिष्यन्ति | पृच्छति | प्रक्ष्यति | प्रक्ष्यन्ति |
| करोति | करिष्यति | करिष्यन्ति | पश्यति | द्रक्ष्यति | द्रक्ष्यन्ति |
| ददाति | दास्यति | दास्यन्ति | जानाति | ज्ञास्यति | ज्ञास्यन्ति |
| त्यजति | त्यक्ष्यति | त्यक्ष्यन्ति | तिष्ठति | स्थास्यति | स्थास्यन्ति |

* **प्रयाणसमये यः गच्छति तम् उद्दिश्य –**

**शुभप्रयाणम् अथवा शुभास्ते पन्थानः सन्तु।**

### अभ्यासः – ४१

सुरेशस्य्श्वः बहूनि कार्याणि। अतः सः श्वस्तनकार्याणि दिनचरीपुस्तके सङ्ग्रहेण लिखितवान् अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| **श्वस्तनकार्याणि –** | | | |
|---|---|---|---|
| १. | पत्रं – लिख् – | ८. | सङ्गीतं – श्रु – |
| २. | वस्त्रं – क्षाल् – | ९. | टिप्पणी सुरेशाय प्रत्यर्प् |
| ३. | लेखनी – क्री – | १०. | अनुजः – प्रेष् – |
| ४. | कथापुस्तकम् – पठ् – | ११. | अनुजा – बोध् – |
| ५. | रमेशः – दृश् – | १२. | आचार्यः प्रश्नाः – प्रच्छ् – |
| ६. | स्यूतः – आनी – | १३. | श्लोकाः – स्मृ – |
| ७. | यानस्य मार्जनं – कृ – | १४. | पाठस्य अर्थः – ज्ञा – |

**एतदाधारेण वाक्यानि लिखन्तु।**

**उदा – १. सुरेशः श्वः पत्रं लेखष्यिति।**

२. सुरेशःश्वः ............................................................................।
३. सुरेशःश्वः ............................................................................।
४. सुरेशःश्वः ............................................................................।
५. सुरेशःश्वः ............................................................................।
६. सुरेशःश्वः ............................................................................।
७. सुरेशःश्वः ............................................................................।
८. सुरेशःश्वः ............................................................................।
९. सुरेशःश्वः ............................................................................।
१०. सुरेशःश्वः ............................................................................।
११. सुरेशःश्वः ............................................................................।
१२. सुरेशःश्वः ............................................................................।
१३. सुरेशःश्वः ............................................................................।
१४. सुरेशःश्वः ............................................................................।

**अभ्यासः – ४२**

गीता सर्वकारीयकार्यालये उद्योगिनी। 'श्वः कार्यालयं न गमिष्यामि' इति निश्चितवती सा।श्वः किं किं करिष्यामि इति योजनां कृतवती सा। सा योजना अधः सूचिता अस्ति। रिक्तस्थानं योग्येन भविष्यत्कालसूचकपदेन पूरयन्तु।

(गमिष्यामि, क्रेष्यामि, स्वीकरिष्यामि, श्रोष्यामि, प्रक्षालयिष्यामि,
पास्यामि, पठिष्यामि, करिष्यामि, द्रक्ष्यामि, प्रत्यागमिष्यामि)

१. श्वः अहं विरामं ............................................................................।
२. प्रातः उत्थाय वस्त्राणि ............................................................................।
३. प्रातः नववादने विद्यारण्यपुरं ............................................................................।
४. तत्र एकां नूतनां शाटिकां ............................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. सख्या सह पानीयं .........................................................................।

६. सायं पुष्पोद्याने विहारं .................................................................।

७. सप्तवादने गायनसभाभवने सङ्गीतं ..................................................।

८. अष्टवादने गृहं ..............................................................................।

९. भोजनानन्तरं दूरदर्शने चित्रं ...........................................................।

१०. सखीगृहत: आनीतं कथापुस्तकं .....................................................।

**अभ्यास: - ४३**

श्व: कन्दुकक्रीडास्पर्धा भविष्यति। श्रवण: एकस्य पक्षस्य नायक:। श्वस्तनकार्यक्रमान् कांश्चन स: चिन्तितवान्। ते च अध: निर्दिष्टा: सन्ति, तदाधारेण वाक्यानि रचयन्तु।

| | ते (अन्यपक्षीया:) | वयम् |
|---|---|---|
| १. | १०.०० -आगम्- | १०.०० -गम्- |
| २. | कन्दुकम् - आनी - | क्रीडाजालं - नी - |
| ३. | अङ्गणस्य स्वच्छता - कृ - | सुधाचूर्णेन रेखा - लिख् - |
| ४. | एक: निर्णायक: - निश्चि - | अपर: निर्णायक: निश्चि - |
| ५. | 'ऐकमत्यम्' इति वद् - | 'जयतु जयतु' इति - घोष - |
| ६. | प्रथमपर्याय: - निराकृ - | प्रथमपर्याय: - अङ्गीकृ - |
| ७. | कोलाहल: - जन् - चेत् | शान्ति: - रक्ष् - |
| ८. | उत्साहेन - क्रीड् - | स्पर्धाभावेन - क्रीड् |
| ९. | क्रीडानियमा: - पाल् - | क्रीडानियमा: - पाल् - |
| १०. | प्राय: पराजय: - प्राप् - | जी - |

**उदा - १. ते दशवादने आगमिष्यन्ति। वयं दशवादने गमिष्याम:।**

२. ते .......................................। वयं ..........................................।

३. ते .......................................। वयं ..........................................।

४. ते .......................................। वयं ..........................................।

५. ते .......................................। वयं ..........................................।

६. ते .......................................। वयं ..........................................।

७. ते .......................................। वयं ..........................................।

८. ते .......................................। वयं ..........................................।

९. ते .......................................। वयं ..........................................।

१०. ते .......................................। वयं ..........................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## १० कति, कुतः कथम्, किमर्थम्, ...... तः

प्राणेशः – चिन्मय! नूतनं युतकं वा?कति रूप्यकाणि दत्तवान् भवान्?

चिन्मयः – अहं षष्टिरूप्यकाणि दत्तवान्। कथम् अस्ति एतत्?

प्राणेशः – बहु सम्यक् अस्ति। कुतः आनीतवान् भवान्?

चिन्मयः – गान्धीनगरे मैत्रीवस्त्रालयः अस्ति खलु?ततः आनीतवान्। एषा लेखनी अपि क्रीता मया।

प्राणेशः – ददातु। लिखामि तावत्। बहु सम्यक् लिखति। कति रूप्यकाणि?

चिन्मयः – १५ रूप्यकाणि।

प्राणेशः – मूल्यं न अधिकम्। तदस्तु, भवान् ह्यः किमर्थं कक्ष्यां न आगतवान।

चिन्मयः – अम्बालातः अग्रजः आगतवान् आसीत्। तेन सह क्रयणार्थं विपणिं गतवान् आसम्।

प्राणेशः – चिदम्बरः आगतवान् आसीत् वा?भवान् तं मम गृहं किमर्थं न आनीतवान् ?

चिन्मयः – सः रात्रौ एव प्रतिगतवान्। अग्रिममासे सः पुनः आगमिष्यति।

प्राणेशः – तदा तम् अवश्यं मम गृहम् आनयतु।

**विशेषः**

I. **सङ्ख्यासु लिङ्गभेदः अस्ति**

| | | | |
|---|---|---|---|
| * एकम् – | एकः बालकः (पुं) | * त्रीणि – | त्रयः बालकाः (पुं) |
| | एका बालिका (स्त्री) | | तिस्रः बालिकाः (स्त्री) |
| | एकं फलम् (नपुं) | | त्रीणि फलानि (नपुं;) |
| * द्वे – | बालकद्वयम् | * चत्वारि – | चत्वारः बालकाः (पुं) |
| | बालिकाद्वयम् | | चतस्रः बालिकाः (नपुं) |
| | फलद्वयम् | | चत्वारि फलानि (नपुं) |

---

* द्वौ बालकौ/द्वे बालिके/द्वे फले – इति पुंल्लिङ्गे-स्त्रीलिङ्गे-नपुंसकलिङ्गे च वक्तुं शक्यते। किन्तु क्रियापदं द्विवचनान्तं भवेत्। तत्र क्लेशः भवति। अतः बालकद्वयम् . इति प्रयोगः कृतः। द्वयशब्दस्य प्रयोगे तु क्रियापदम् एकवचनान्तं भवति। यथा – बालकद्वयम् अस्ति। फलद्वयम् आनयतु। चित्रद्वयं पश्यतु।

**लिङ्गभेदः नास्ति**

| | | | |
|---|---|---|---|
| * पञ्च – | पञ्च बालकाः (पुं) | * षट् – | षट् बालकाः (पुं) |
| | पञ्च बालिकाः (स्त्री) | | षट् बालिकाः (स्त्री) |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पञ्च फलानि (नपुं)　　　　　षट् फलानि (नपुं)

* एवम् एव सप्त, अष्ट ... शतम् – इत्यादिषु सर्वेषु अपि।

II.　　**तः ( पञ्चमीविभक्तिः )**

गृहं – गृहतः

शाला – शालातः

बालकः – बालकतः

एवम् एव – शब्दस्य मूलरूपं + तः * = पञ्चमीविभक्तिः

उदा – आपण + तः = आपणतः

| शुद्धम् | अशुद्धम् |
|---|---|
| इतः | अत्रतः |
| ततः | तत्रतः |
| कुतः | कुत्रतः |
| उपरिष्टात् | उपरितः |

कथम् इत्यस्य उत्तररूपेण समीचीनम्, उत्तमम्, सुन्दरम्, सम्यक्, अवश्यम्, मन्दम्, उच्चैः, शीघ्रम् इत्यादीनि पदानि उपयुज्यन्ते। तानि ''क्रियाविशेषणानि'' इति उच्यन्ते।

---

पञ्चमीविभक्तौः ... तः इति प्रयोगः अतीव सरलः। अतः विभक्तिरूपाणि अत्र न दर्शितानि।

IV. **.... अर्थम्**

प्रश्नः – किमर्थम् ?　उत्तरम् – मूलरूपं + अर्थम्

उदा – पठन + अर्थम् = पठनार्थम्

क्रयण + अर्थम् = क्रयाणार्थम्

**अभ्यासः – ४४**

**अधः निर्दिष्टेषु वाक्येषु आवरणे याः सङ्ख्याः सन्ति ताः अक्षरैः ( लिङ्गं योजयित्वा ) लिखन्तु।**

**उदा – ( १ ) ........................ बालिका गच्छति।**

**<u>एका</u> बालिका गच्छति।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१. (३.) ........................................................ बालका: पाठं पठन्ति।

२. (१) ........................................................................ यानं गतम्।

३. (४) ....................................................... फलानि लतायां सन्ति।

४. (३) ............................................................ बालिका: क्रीडन्ति।

५. (४) ..................................................... कर्मकरा: कार्यं कुर्वन्ति।

६. अहं (३) ........................................................ पत्राणि लिखामि।

७. मम कोषे (४) ................................................. लेखन्य: सन्ति।

८. (१) ...................................................... पिपीलिका मन्दं गच्छति।

९. (३) ........................................... बालिका: अत्र आगतवत्य: वा ?

१०. (४) ...................................................... छात्रा: अद्य अनुपस्थिता:।

**अभ्यास: - ४५**

मम गृहे

| | |
|---|---|
| १०-जना: | १०-द्वाराणि |
| ५-कर्मकरा: | ८-यानपेटिका: |
| ३०-चषका: | १५-धेनव: |
| २५ - वातायनानि | ६-महिष्य: |

**उपरितनकोष्टकस्य आधारेण प्रश्नवाक्यम् उत्तरवाक्यं च लिखन्तु।**

उदा - प्रश्न: - भवत: गृहे कति जना: सन्ति?

उत्तरम् - मम गृहे दश जना: सन्ति।

१. प्रश्न: - भवत: गृहे ....................................................................?

उत्तरम् - मम गृहे ...........................................................................।

२. प्रश्न: - ...........................................................................................?

उत्तरम् -...........................................................................................।

३. प्रश्न: - ...........................................................................................?

उत्तरम् - ........................................................................................।

४. प्रश्न: - ..........................................................................................?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उत्तरम् – ..........................................................................।

५. प्रश्नः – ..........................................................................?

उत्तरम् – ..........................................................................।

६. प्रश्नः – ..........................................................................?

उत्तरम् – ..........................................................................।

७. प्रश्नः – ..........................................................................?

उत्तरम् – ..........................................................................।

## अभ्यासः – ४६

अधः सूचितानां शब्दानां साहाय्येन रिक्तस्थानं पूरयित्वा प्रतिवाक्यम् एकं प्रश्नवाक्यं लिखन्तु।

**१. रामेश्वरम् २. आपणः ३. गृहम् ४. वित्तकोषः ५. देहली ६. भोजनारम्भः ७. ललिता**

**उदा – १. मम मातुलः .............. आगतवान्।**

**प्रश्नः – .............................................?**

**– मम मातुलः श्नामेश्वश्नतः आगतवान्।**

**प्रश्नः – भवतः मातुलः कुतः आगतवान् ?**

२. अहम् ......................................................... लेखनीम् आनीतवान्।

प्रश्नः ..........................................................................?

३. सा ........................................................ १०.०० वादने प्रस्थितवती।

प्रश्नः ..........................................................................?

४. ......................................................... सः धनम् आनीतवान्।

प्रश्नः ..........................................................................?

५. एतां शाटिकां मम अग्रजः ............................................ आनीतवान्।

प्रश्नः ..........................................................................?

६. ......................................................... पूर्वं ते भोजनमन्त्रं वदन्ति।

प्रश्नः ..........................................................................?

७. ............................................................... इतोऽपि पत्रं न आगतम्।

प्रश्नः ..........................................................................?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अभ्यासः – ४७**

अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखन्तु। उत्तरलेखनसमये अन्ते निम्नाङ्कितेषु कस्यचित् शब्दस्य उपयोगं कुर्वन्तु।

१. भवतः आरोग्यं कथम् अस्ति ?

..........................................................................................।

२. यानं कथं गच्छति ?

..........................................................................................।

३. कूर्मः कथं सञ्चरति ?

..........................................................................................।

४. उद्यानं कथम् अस्ति ?

..........................................................................................।

५. एषः तण्डुलः कथम् अस्ति ?

..........................................................................................।

६. सिंहः कथं गर्जति ?

..........................................................................................।

७. विमानं कथं शब्दं करोति ?

..........................................................................................।

(सम्यक्, शीघ्रम्, मन्दम्, सुन्दरम्, समीचीनम्, घोरम्, उच्चैः)

**अभ्यासः ४८**

आवरणे सूचितानां शब्दानां साहाय्येन अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखन्तु।

उदा – सः किमर्थं ग्रन्थालयं गच्छति ?(पठनम्)

सः पठनार्थं ग्रन्थालयं गच्छति।

१. रामः किमर्थं योगासनं करोति ?(शरीरदार्ढ्यम्)

..........................................................................................।

२. रोगी किमर्थम् औषधं पिबति ?(आरोग्यम्)

..........................................................................................।

३. एषः किमर्थम् आपणं गच्छति ?(क्रयणम्)

..........................................................................................।

४. सः किमर्थं पुस्तकं क्रीणाति ?(अध्ययनम्)

..........................................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. सा किमर्थं शीघ्रं गच्छति ?(सखीदर्शनम्)

........................................................................................।

६. जना: किमर्थं समाजसेवां कुर्वन्ति ?(आत्मतृप्ति:)

........................................................................................।

७. चित्रकार: किमर्थं नदीतीरं गतवान् ?(चित्रलेखनम्)

........................................................................................।

८. भक्त: किमर्थं देवस्य ध्यानं करोति ?(वरप्राप्ति:)

........................................................................................।

९. कृषिक: किमर्थं क्षेत्रं गच्छति ?(कृषिकार्यम्)

........................................................................................।

१०. स: किमर्थं भाषणं करोति?(जनजागरणम्)

........................................................................................।

**अभ्यास: ४९**

किम्, कुत्र, कदा, कथम्, कुत:, किमर्थम्, कति – इति सप्त प्रश्नवाचकानि। निर्दिष्टानि उत्तरवाक्यानि पठित्वा उचितेन प्रश्नवाचकेन प्रश्नवाक्यस्थं रिक्तं स्थानं पूरयन्तु।

१. दशरथस्य ...................................... पुत्रा:?दशरथस्य चत्वार: पुत्रा:।

२. साहित्यसम्मेलनं .........................................?साहित्यसम्मेलनं मैसूरुनगरे।

३. एतत् .................. आनीतवान् भवान् ?अहम् आपणत: आनीतवान्।

४. भवत: भोजनं ........................................ ?मम भोजनं सार्धद्वादशवादने।

५. स: .................................. मैसूरु गच्छति?स: दर्शनार्थं मैसूरु गच्छति।

६. एषा शाटिका .......................... अस्ति ?शाटिका बहु सम्यक् अस्ति।

७. भवत: लेखनी .............................. अस्ति ?मम लेखनी कोषे अस्ति।

८. भवान् इदानीं ........................................ करोति ?अहं पाठं पठामि।

९. स: ........................... तत्र उपविष्टवान् ?स: ध्यानार्थं तत्र उपविष्टवान्।

१०. भवत: अग्रज:..................... आगतवान् ?मम अग्रज: मद्रासुत: आगतवान्।

११. भवत्या: विराम: ......................................?मम विराम: सोमवासरे।

१२. भवन्त: ......................... तत्र गतवन्त: ?वयं पठनार्थं तत्र गतवन्त:।

१३. भवन्त: .............................. तत्र गतवन्त: ?वयं प्रात: तत्र गतवन्त:।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१४. गृहे सर्वे .................................................. सन्ति ?सर्वे कुशलिनः।

१५. भवान् ................................. आगतवान् ?अहं दशवादने आगतवान्।

**अभ्यासः - ५०**

रङ्गनाथः अनुजायाः विवाहार्थं प्रतिवेशिगृहेभ्यः कानिचन वस्तूनि आनीतवान्। कुतः किम् आनीतवान् इति वाक्यानि लिखन्तु।

| | |
|---|---|
| १. मातृच्छाया-कम्बलानि। | २. विश्वनीडम्-उपधानानि। |
| ३. मञ्जूषा-चषकाः। | ४. श्रीनिवासः - आच्छादकानि। |
| ५. हरिनिवासः-स्थालिकाः। | ६. हरिकृपा-जलभाण्डम्। |
| ७. शिवाश्रयः-द्रोण्यः। | ८. आनन्दनिलयः-जवनिकाः। |
| ९. राधाकुञ्जः-कटाहः। | १०. पद्माकरः-ध्वनिमुद्रिकाः। |
| ११. हरिवासः-वस्त्रकटाः। | १२. दिव्यधाम-कलशाः। |

**उदा - १. रङ्गनाथः मातृच्छायातः कम्बलानि आनीतवान्।**

२. रङ्गनाथः ........................................................................ आनीतवान्।

३. रङ्गनाथः ........................................................................ आनीतवान्।

४. रङ्गनाथः ........................................................................ आनीतवान्।

५. रङ्गनाथः ........................................................................ आनीतवान्।

६. रङ्गनाथः ........................................................................ आनीतवान्।

७. रङ्गनाथः ........................................................................ आनीतवान्।

८. रङ्गनाथः ........................................................................ आनीतवान्।

९. रङ्गनाथः ........................................................................ आनीतवान्।

१०. रङ्गनाथः ........................................................................ आनीतवान्।

११. रङ्गनाथः ........................................................................ आनीतवान्।

१२. रङ्गनाथः ........................................................................ आनीतवान्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ११ ..... करोति इत्यस्य उपयोगेन क्रियापदानि

स्वामिनी – अये, अद्य गृहे विशेषकार्यक्रमः अस्ति। अतः अद्य कार्याणि अधिकानि।

कर्मकरी – भवतु आर्ये।

स्वामिनी – प्रथमं पात्राणां प्रक्षालनं करोतु। अनन्तरं समग्रस्य गृहस्य मार्जनं करोतु। ततः पुष्पाणां सङ्ग्रहं करोतु। हाँ, तत्पूर्वं गोमयेन अङ्गणस्य उपलेपनं करोतु। कपाटिकायाः द्वारस्य पिधानं कृत्वा पक्षद्वारस्य उद्घाटनं करोतु। गच्छतु।

पुत्री – अम्ब! अहं मालायाः ग्रथनं देवस्य अर्चनं च करोमि वा ?

माता – अस्तु। गणितस्य लेखनम् इतिहासपाठस्य स्मरणं, गीतस्य कण्ठस्थीकरणं, व्याकरणस्य परिशीलनं च समाप्तं खलु?

पुत्री – आम् अम्ब। प्रातः उत्थाय सर्वं कृतवती। गीतायाः पारायणं कृतवती। व्याकरणस्य अध्ययनम् अपि कृतवती।

**विशेषः**

वयम् अध्ययनं, परिशीलनं, सम्पादनं, सङ्ग्रहः, त्यागः, बन्धनम् इत्यादीनि पदानि जानीमः। 'करोति' इति पदं योजयित्वा नूतनानि क्रियापदानि कर्तुं शक्नुमः।

यथा – अध्ययनं करोति, परिशीलनं करोति, सङ्ग्रहं करोति इत्यादीनिः।

| शुद्धम् | अशुद्धम् |
|---|---|
| वृक्षस्य छेदनं करोति। | वृक्षं छेदनं करोति। |
| पात्राणां प्रक्षालनं करोति। | पात्राणि प्रक्षालनं करोति। |
| धान्यस्य विक्रयणं करोति। | धान्यं विक्रयणं करोति। |
| द्वारस्य पिधानं करोति। | द्वारं पिधानं करोति। |
| व्याकरणस्य अध्ययनं करोति। | व्याकरणम् अध्ययनं करोति। |

**अभ्यासः – ५१**

अधोनिर्दिष्टानां क्रियापदानां विभागं कुर्वन्तु।

उदा – प्रक्षालयति – प्रक्षालनं करोति।

१. परिशीलयति – ..........................................................................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. सम्पादयति – ..........................................................................
३. आलोडयति – ..........................................................................
४. वितरति – ..........................................................................
५. परिवर्तयति – ..........................................................................
६. अभिनन्दति – ..........................................................................
७. प्रतिपादयति – ..........................................................................
८. उद्घाटयति – ..........................................................................
९. समापयति – ..........................................................................
१०. मार्जयति – ..........................................................................

**अभ्यासः – ५२**

अधः दत्तानां शब्दानाम् उपयोगं कृत्वा करोति/कुर्वन्तु/कृतवती/कृतवान्/करोतु इत्यादिभिः रूपैः युक्तानि वाक्यानि रचयन्तु।

उदा – पुस्तकम् – परिशीलनम्

छात्रः पुस्तकस्य परिशीलनं करोति।

१. धनम् – सम्पादनम्

सः ..........................................................................ति।

२. वस्त्रम् – वितरणम्

धनिकः ..........................................................................वान्।

३. द्वारम् – उद्घाटनम्

सेवकः ..........................................................................वान्।

४. समुद्रः – मथनम्

देवाः दानवाः च ..........................................................................वन्तः।

५. पुस्तकम् – विक्रयणम्

आपणिकः ..........................................................................ति।

६. वाक्यरचना – अभ्यासः

भवती ..........................................................................तु।

७. काव्यम् – विमर्शः

विमर्शकः ..........................................................................ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८. देवः – प्रतिष्ठापनम्

ग्रामीणाः ...........................................................................वन्तः।

९. तीर्थम् – प्रोक्षणम्

अर्चकः ...........................................................................वान्।

१०. कथा – अनुवादः

लेखकः ...........................................................................वान्।

११. विषयः – प्रतिपादनम्

छात्रः ...........................................................................ति।

१२. रसः – आस्वादनम्

भोजनप्रियः ...........................................................................ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १२ तृतीया - ए.व. + ब.व.

आचार्यः - प्रियच्छात्राः। अहं सुधाखण्डेन कृष्णफलके एकं चित्रं लिखामि। दृष्ट्वा भवन्तः सर्वे अङ्कन्या लिखन्तु।

छात्रः१ - श्रीमन्! अहं लेखन्या लिखामि वा?

आचार्यः - रेखालेखने दोषः भवति चेत्?

छात्रः१ - अहं जागरूकतया लिखामि।

आचार्यः - भवतु। ये वर्णलेखनीम् आनीतवन्तः ते वर्णलेखन्या लिखन्तु।

छात्रः२ - श्रीमन्! अहं कूर्चेन लिखामि वा?

आचार्यः - भवतु। इदानीं सर्वे लिखन्तु। जलजे, वेगेन मा लिखतु। अहो, कष्टेन चित्रं लिखति। चन्द्र! किमर्थं खेदेन उपविष्टवान् भवान्।

चन्द्रः - अहम् अङ्कनीं न आनीतवान्। त्वरया आगमनसमये विस्मृतवान्।

आचार्यः - चिन्ता मास्तु। मम अङ्कनीं स्वीकरोतु। सर्वे उत्साहेन श्रद्धया लिखन्तु।

**विशेषः**

* **तृतीयाविभक्तिः**

| पुंल्लिङ्गे | | | स्त्रीलिङ्गे | | | नपुंसकलिङ्गे | | |
|---|---|---|---|---|---|---|---|---|
| प्रथमा | तृतीया ए.व. | ब.व. | प्रथमा | तृतीया ए.व. | ब.व. | प्रथमा | तृतीया ए.व. | ब.व. |
| बालकः | बालकेन | बालकैः | महिला | महिलया | महिलाभिः | चित्रं | चित्रेण | चित्रैः |
| कूर्चः | कूर्चेन | कूर्चैः | लेखनी | लेखन्या | लेखनीभिः | (नपुंसकलिङ्गे तृतीया विभक्तितः पुल्लिङ्गवत् एव रूपाणि।) | | |
| सः | तेन | तैः | सा | तया | ताभिः | | | |
| एषः | एतेन | एतैः | एषा | एतया | एताभिः | | | |
| कः | केन | कैः | का | कया | काभिः | | | |
| भवान् | भवता | भवद्भिः | भवती | भवत्या | भवतीभिः | | | |

त्रिषु लिङ्गेषु - अहम् - मया - अस्माभिः

**तृतीयाविभक्तिः**
- साधनस्य ----सुधाखण्डेन, अङ्कन्या, दण्डेन, छुरिकया
- गुणवाचकस्य ----सन्तोषेण, खेदेन, त्वरया, जागरूकतया




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः – ५३

अधः साधनानां राशिः अस्ति। तेषां साहाय्येन अधस्तनप्रश्नानाम् उत्तराणि लिखन्तु।



१. छात्रः कया लिखति?

.............................................।

२. माता कया परिवेषयति?

.............................................।

३. सौचिकः कया वस्त्रं कर्तयति?

.............................................।

४. कर्मकरः केन वस्तूनि आनयति?

.............................................।

५. कृषिकः केन वृषभं ताडयति?

.............................................।

६. वर्णकारः केन वर्णं लिम्पति?

.............................................।

७. लोहकारः केन अयः ताडयति?

.............................................।

८. कर्मकरः केन तृणं कर्तयति?

.............................................।

९. बालकाः केन क्रीडन्ति?

.............................................।

१०. धनिकः केन देहलीनगरं गच्छति?

.............................................।

## अभ्यासः – ५४

श्रीधरः कानिचन कार्याणि कृतवान्। तत्समग्रे तस्य मनसि कश्चन भावः आसीत्। अधः श्रीधरस्य मनसि स्थितः भावः, तेन कृतं कार्यं च सूच्यरूपेण निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि रचयन्तु।

उदा – कोपः /अनुजस्य ताडनम्

श्रीधरः कोपेन अनुजं ताडितवान्।

१. खेदः/पत्रस्य लेखनम्

श्रीधरः ......................................................................पत्रं लिखितवान्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. हर्षः/पद्यस्य गानम्

..........................................................................................।

३. आलस्यम्/निद्रा

..........................................................................................।

४. आदरः/अतिथेः सत्कारः

..........................................................................................।

५. त्वरा/वस्त्रस्य क्षालनम्

..........................................................................................।

६. जागरूकता/धनस्य गणना

..........................................................................................।

७. भक्तिः/देवस्य नमस्कारः

..........................................................................................।

८. भीतिः/रज्जोः क्षेपणम्

..........................................................................................।

९. आसक्तिः/कथायाः श्रवणम्

..........................................................................................।

१०. तृप्तिः/फलस्य खादनम्

..........................................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १३ सह, विना

भूषणः – कुमार! गृहे कोऽपि नास्ति वा?

कुमारः – अहम् एकः एव अस्मि। पिता मित्रेण सह क्लब् गतवान्। माता प्रतिवेशिन्या सह मन्दिरं गतवती। भगिनी रेखया सह आपणं गतवती।

भूषणः – श्रीधरः कुत्र?

कुमारः – सः मित्रेण सह इदानीं गतवान्। त्वराकारणतः सः पादरक्षां विना एव गतवान्।

भूषणः – मादृशः एव सः। आपणतः वस्तूनि आनयतु इति माता माम् उक्तवती आसीत्। किन्तु अहं स्यूतं विना आगतवान्।

कुमारः – धनं विना तु न आगतवान् खलु?

भूषणः – धनम्। तिष्ठतु पश्यामि। अहो! धनं विना एव ....

कुमारः – केचन उदरं विना भोजनार्थं गच्छति इति श्रूयते। तादृशः एव भवान्।

**विशेषः**

सह – सह इति पदं यत्र प्रयुज्यते तत्र तृतीयाविभक्तिः भवति।

उदा – अहं मित्रेण सह आपणं गच्छामि।

पुत्री जनन्या सह गच्छति।

| शुद्धम् | अशुद्धम् |
|---|---|
| तेन सह | तस्य सह |
| मया सह | मम सह |
| जनन्या सह | जनन्याः सह |
| रामेण सह | रामस्य सह |

**विना** – विना इति शब्दस्य योगे अपि तृतीयाविभक्तिः भवति।

(अत्र द्वितीयां पञ्चमीं चापि प्रयोक्तुम् अपि शक्नुमः।)

**उदा** – i. तेन विना/तं विना/तस्मात् विना एषः न गच्छति।

ii. जलेन/जलं/जलात् विना मीनः न जीवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### अभ्यासः – ५५

मन्दारः सञ्चारशीलः। सः कदाचित् अन्येन सह गच्छति। पुनः कदाचित् अन्येन विना गच्छति। अधस्तनकोष्ठके 'ü' चिह्नं 'सह' इति अर्थं, 'û' चिह्न 'विना' इति अर्थं च प्रदर्शयति। तदाधारेण वाक्यानि रचयन्तु।

| | | | |
|---|---|---|---|
| १. मित्रम् ✓ | मित्रगृहम् | २. भगिनी ✓ | मातुलगृहम् |
| ३. अनुजः ✗ | चित्रमन्दिरम् | ४. पत्नी ✗ | कार्यालयः |
| ५. शुनकः ✓ | वायुविहारार्थम् | ६. गृहसदस्याः ✓ | उद्यानम् |
| ७. पितामही ✓ | मन्दिरम् | ८. कर्मकरः ✗ | क्षेत्रम् |
| ९. करदीपः ✗ | रक्षणार्थम् | १०. उपनेत्रम् ✗ | ग्रन्थलयः |
| ११. स्यूतः ✗ | आपणः | १२. धनम् ✗ | कुत्रापि न |
| १३. मित्राणि ✓ | नाटकं द्रष्टुम् | १४. स्नानवस्त्रम् ✗ | स्नानगृहम् |
| १५. जनाः ✓ | भाषणं श्रोतुम् | १६. पुस्तकानि ✓ | विद्यालयः |

**उदा – १. मन्दारः मित्रेण सह मित्रगृहं गतवान्।**

२. मन्दारः ........................................................ मातुलग्रामं गतवान्।

३. मन्दारः ........................................................ ''।

४. मन्दारः ........................................................ ''।

५. मन्दारः ........................................................ ''।

६. मन्दारः ........................................................ ''।

७. मन्दारः ........................................................ ''।

८. मन्दारः ........................................................ ''।

९. मन्दारः ........................................................ ''।

१०. मन्दारः ........................................................ ''।

११. मन्दारः ........................................................ ''।

१२. मन्दारः ........................................................ ''।

१३. मन्दारः ........................................................ ''।

१४. मन्दारः ........................................................ ''।

१५. मन्दारः ........................................................ ''।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१६. मन्दारः ........................................................................... ''।

**अभ्यासः – ५६**

कः/का/किं/केन विना न शोभते इति अधः निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि पूयन्तु।

| | |
|---|---|
| १. अध्यक्षः – सभा | ७. दूरवाणी – कार्यालयः |
| २. पुत्रः – गृहस्थः | ८. फलानि – वृक्षः |
| ३. गृहिणी – गृहम् | ९. वृक्षाः – उद्यानम् |
| ४. लवणम् – पाकः | १०. तिलकम् – तरुण्याः मुखम् |
| ५. सम्भाषणम् – संस्कृतज्ञः | ११. राष्ट्रभक्ताः – देशः |
| ६. चित्राणि – पुस्तकम् | १२. सेवाभावः – नागरिकः |

**उदा – १ अध्यक्षेण विना सभा न शोभते।**

२. ..........................................................................गृहस्थः न शोभते।

३. ..............................................................................गृहं न शोभते।

४. ....................................................................................न शोभते।

५. ....................................................................................न शोभते।

६. ....................................................................................न शोभते।

७. ....................................................................................न शोभते।

८. ....................................................................................न शोभते।

९. ....................................................................................न शोभते।

१०. ....................................................................................न शोभते।

११. ....................................................................................न शोभते।

१२. ....................................................................................न शोभते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १४ चतुर्थी

विनोदः – ललिते! मम लेखनी कुत्र?कर्तरी अपि नास्ति अत्र। कस्मै दत्तवती। भवती?

ललिता – ह्यः भवान् एव लेखनीं पुत्राय दत्तवान्। कर्तरीं पुत्र्यैः दत्तवान्।

विनोदः – एवं खलु?विस्मृतवान् आसम्।

ललिता – भवान् आगच्छतु अत्र। भवते उपहारं ददामि।

विनोदः – मह्यम् इदानीं मास्तु। किरणाय प्रथमं ददातु।

ललिता – तस्मै दत्तवती। कवितायै अपि दत्तवती। भवान् शीघ्रम् आगच्छतु।

विनोदः – नन्दिन्यै दत्तवती वा ?

ललिता – तस्यै अनन्तरं ददामि। भवान् इदानीम् आगच्छतु।

विनोदः – पत्रिकायै एकं लेखनं लिखन् अस्मि लेखनं समाप्य आगच्छामि।

**विशेषः**

* **चतुर्थीविभक्तिः**

| पुंल्लिङ्गे | | | स्त्रीलिङ्गे | | | नपुंसकलिङ्गे | | |
|---|---|---|---|---|---|---|---|---|
| प्रथमा | चतुर्थी ए.व. | ब.व. | प्रथमा | चतुर्थी ए.व. | ब.व. | प्रथमा | चतुर्थी ए.व. | ब.व. |
| भिक्षुकः | भिक्षुकाय | भिक्षुकेभ्यः | बालिका | बालिकायै | बालिकाभ्यः | सस्यम् | सस्याय | सस्येभ्यः |
| वृक्षः | वृक्षाय | वृक्षेभ्यः | भगिनी | भगिन्यै | भगिनीभ्यः | (पुंल्लिङ्गवत् एव रूपाणि) | | |
| सः | तस्मै | तेभ्यः | सा | तस्यै | ताभ्यः | | | |
| एषः | एतस्मै | एतेभ्यः | एषा | एतस्यै | एताभ्यः | | | |
| कः | कस्मै | केभ्यः | का | कस्यै | काभ्यः | | | |
| भवान् | भवते | भवद्भ्यः | भवती | भवत्यै | भवतीभ्यः | | | |

त्रिषु लिङ्गेषु – मह्यम् – अस्मभ्यम्

कृते – 'कृते' इत्यस्य उपयोगं कृत्वा अपि चतुर्थीविभक्त्यर्थं प्रकाशयितुं शक्नुमः।

उदा – 1. भिक्षुकाय – भिक्षुकस्य कृते।

2. तस्मै – तस्य कृते।

3. बालिकायै – बालिकायाः कृते।

**अभ्यासः – ५७**

धर्मदासः उदारः पुरुषः। सः स्वजन्मदिनोत्सवाचरणसन्दर्भे विविधजनानां कृते विविधवस्तूनि दत्तवान्। सः कस्य कृते किं दत्तवान् इति अधः सूचितम् अस्ति तदाधारेण वाक्यानि रचयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | |
|---|---|
| १. कर्मकर: – युतकम् | ७. पुत्र: – घटी |
| २. कर्मकरी – शाटिका | ८. मित्रम् – कथापुस्तकम् |
| ३. देवालय: – धनम् | ९. जनक: – वेष्टी |
| ४. पत्नी – कण्ठहार: | १०. सहोदर: – युतकवस्त्रम् |
| ५. भगिनी – अङ्गुलीयकम् | ११. कर्मकर्या: पुत्र: – क्रीडनकम् |
| ६. पुत्री – लेखनी | १२. पुरोहित: – दक्षिणा |

**उदा – १. धर्मदास: कर्मकाराय युतकं दत्तवान्**

२. धर्मदास: ........................................................... शाटिकाम् दत्तवान्।

३. धर्मदास: ........................................................................ दत्तवान्।

४. धर्मदास: ........................................................................ दत्तवान्।

५. धर्मदास: ........................................................................ दत्तवान्।

६. धर्मदास: ........................................................................ दत्तवान्।

७. धर्मदास: ........................................................................ दत्तवान्।

८. धर्मदास: ........................................................................ दत्तवान्।

९. धर्मदास: ........................................................................ दत्तवान्।


१०. धर्मदास: ........................................................................ दत्तवान्।

११. धर्मदास: ........................................................................ दत्तवान्।

१२. धर्मदास: ........................................................................ दत्तवान्।

## अभ्यास: – ५८

विद्यालयस्य बालका: क्रीडार्थं मण्डलाकारेण उपविष्टा: सन्ति। एक: अन्यस्मै कन्दुकं ददाति। क: कस्मै दत्तवान् इति अध: निर्दिष्टम् अस्ति। तदाधारेण वाक्यानि लिखन्तु।




**उदा – १. गोपाल: गणेशाय कन्दुकं दत्तवान्।**

२. गणेश: .................................................. कन्दुकं दत्तवान्।

३. .............................................................. ,, .........................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. .............................................................. ".........................।

५. .............................................................. ".........................।

६. .............................................................. ".........................।

७. .............................................................. ".........................।

८. .............................................................. ".........................।

९. .............................................................. ".........................।

१०. .............................................................. ".........................।

११. .............................................................. ".........................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १५ अस्धातुः – वर्तमाने भूते च

I

प्रसादः – मित्र! गृहे कोऽपि नास्ति वा?

अनिलः – सर्वे सन्ति। अनुजः पठन् अस्ति। पिता जपन् अस्ति। माता पाकशालायाम् अस्ति। अनुजा अपि तत्रैव।

प्रसादः – भवान् किं कुर्वन् अस्ति?

अनिलः – अहं विज्ञानपुस्तकं पठन् अस्मि।

प्रसादः – अद्य भवान् विद्यालयं न आगच्छति इति वार्ता।

अनिलः – आम्! अद्य गृहसदस्याः वयं सर्वे शिवगङ्गां गच्छन्तः स्मः। भवान् अपि आगच्छति वा?

प्रसादः – न भोः। अहम् इदानीं विद्यालयं प्रति प्रस्थितवान् अस्मि।

II

अनुजा – अग्रज! अद्य भवन्तः सर्वे आगतवन्तः आसन् वा?

अग्रजः – आम्। वयं सर्वे आगतवन्तः आस्म। भवती अस्मान् न दृष्टवती वा?

अनुजा – यदा एकवारं वेदिकाम् आगतवती आसं तदा भवन्तं दृष्टवती। भवतः पार्श्वे तातः न आसीत्, अम्बा अपि न आसीत्।

अग्रजः – अहं मित्रैः सह उपविष्टवान् आसम्।

**विशेषः**

अस्धातुः
- वर्तमानकाले
  - प्रथमपुरुषे – अस्ति सन्ति
  - उत्तमपुरुषे – अस्मि स्मः
- भूतकाले
  - प्रथमपुरुषे – आसीत् आसन्
  - उत्तमपुरुषे – आसम् आस्म

* अस्धातोः प्रयोगः त्रिधा भवितुम् अर्हति –

i मम गृहे कार्यानम् आसीत्।

ii अद्य केशवः आगतवान् आसीत्।

iii प्रातः गोपालः मार्गे गच्छन् आसीत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

### अभ्यासः - ५९

अस्धातोः वर्तमानकालरूपेण रिक्तस्थानानि पूरयन्तु।

उदा - मित्र! भवान् किं पुस्तकं पठन् ........... ?

मित्र! भवान् किं पुस्तकं पठन् अस्ति ?

१. मित्र! पश्यतु! वचनानुसारम् अहम् आगतवान् .................................।

२. भवन्तः किमर्थं मार्गे क्रीडन्तः .....................................................?

३. सः तूष्णीम् उपविष्टवान् ........................................................।

४. भवदीयं कार्यम् अहं प्रातः एव कृतवान् .........................................।

५. वयम् इदानीं श्रीरङ्गपट्टनं प्रति गच्छन्तः .........................................।

६. माता प्रातः चतुर्वादने एव उत्थिता .................................................।

७. भोः, अहं चायं कृतवती .........................................., पीत्वा गच्छतु।

८. मम लेखनी नष्टा ....................................................................भोः।

९. केनापि समग्रं क्षीरं पातितम् ..................................................,पश्यतु।

१०. वयं क्रीडन्तः ............................................अम्ब, मा आह्वयतु भवती।

### अभ्यासः - ६०

अस्धातोः भूतकालरूपेण रिक्तस्थानानि पूरयन्तु।

उदा - सः वाक्यम् उक्तवान् ....................।

सः वाक्यम् उक्तवान् आसीत्।

१. अहं मैसूरुनगरं पूर्वं दृष्टवान् ........................................................।

२. बालिकाः क्रीडाङ्गणे क्रीडन्त्यः .....................................................।

३. वयं दूरदर्शनं पश्यन्तः ..................................................................।

४. ते इतः पूर्वं मां न सूचितवन्तः ....................................................।

५. मम गमनसमये सा गृहात् प्रस्थितवती ............................................।

६. भवतः विषये वयं श्रुतवन्तः ..........................................................।

७. भवान् भाषणार्थम् आगतवान् .....................................................वा?

८. भवत्यः एतादृशं भाषणम् इतः पूर्वं श्रुतवत्यः ................................वा?

९. अहं तु एतादृशं कार्यं पूर्वं न कृतवान् ............................................।

१०. ताः असत्यम् उक्तवत्यः .........................................................भोः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## अभ्यासः - ६१

पूर्वं प्रकाशः धनिकः आसीत्। अतः तस्य गृहे -

आसीत्

१. शुनकः २. दूरदर्शनम् ३. ध्वनिमुद्रणयन्त्रम् ४. कार्यानम् ५. विदेशीयघटी ६. ग्रन्थालयः ७. वज्राङ्गुलीयकम् ८. रत्नहारः ९. सुवर्णकाञ्ची १०. सुवर्णलेखनी ११. रजतस्थालिका १२. वातानुकूल्यम् १३. वस्त्रक्षालनयन्त्रम् १४. रजतमयदेवमण्डपः १५. रजतान्दोलिका

**उदा - १. पूर्वं प्रकाशस्य गृहे शुनकः आसीत्।**

२. पूर्वं प्रकाशस्य गृहे ..........................................................................।

३. ..........................................................................................।

४. ..........................................................................................।

५. ..........................................................................................।

६. ..........................................................................................।

७. ..........................................................................................।

८. ..........................................................................................।

९. ..........................................................................................।

१०. ..........................................................................................।

११. ..........................................................................................।

१२. ..........................................................................................।

१३. ..........................................................................................।

१४. ..........................................................................................।

१५. ..........................................................................................।

## अभ्यासः - ६२

पूर्वं नागेन्द्रः धनिकः आसीत्। तदा तस्य गृहे -

आसन्

१. कम्प्यूटर्यन्त्राणि २. दास-दास्यः ३. सुवर्णहाराः ४. बान्धवाः ५. वज्राणि ६. सुन्दरशुनकाः ७. अपूर्वग्रन्थाः ८. रत्नकम्बलानि ९. सुरक्षाः कपाटिकाः १०. शुक-कपोताः ११. देशीय-विदेशीय-पत्रिकाः १२. स्वच्छता-यन्त्राणि १३. रजतपुत्थलिकाः १४. दूरदर्शनानि १५. विविधवाद्यानि।

**उदा - १. पूर्वं नागेन्द्रस्य गृहे कम्प्यूटरयन्त्राणि आसन्।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२. पूर्वं नागेन्द्रस्य गृहे ..................................................................।

३. ..................................................................................।

४. ..................................................................................।

५. ..................................................................................।

६. ..................................................................................।

७. ..................................................................................।

८. ..................................................................................।

९. ..................................................................................।

१०. ..................................................................................।

११. ..................................................................................।

१२. ..................................................................................।

१३. ..................................................................................।

१४. ..................................................................................।

१५. ..................................................................................।

### अभ्यासः – ६३

इदानीम् अहं वृद्धः अस्मि। बाल्ये अहम् –

आसम्

१. कार्यशीलः २. अध्ययनशीलः ३. वामनः ४. धीरः ५. कथापुस्तकप्रियः ६. कक्ष्यायां प्रथमः ७. सर्वत्र आसक्तः ८. क्रीडासक्तः ९. प्रामाणिकः १०. दयालुः ११. अलसः न १२. निद्रालुः १३. सत्यकथकः १४. मातृवचनपालकः १५. चित्रलेखकः १६. भीरुः न १७. अविनीतः न १८. चौर्यरतः न १९. विनोदप्रियः २०. समर्थः।

**उदा – १. अहं बाल्ये कार्यशीलः आसम्।**

१. अहं बाल्ये ..................................................................।

२. ..................................................................................।

३. ..................................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. ..........................................................................................

५. ..........................................................................................

६. ..........................................................................................

७. ..........................................................................................

८. ..........................................................................................

९. ..........................................................................................

१०. ..........................................................................................

११. ..........................................................................................

१२. ..........................................................................................

१३. ..........................................................................................

१४. ..........................................................................................

१५. ..........................................................................................

१६. ..........................................................................................

१७. ..........................................................................................

१८. ..........................................................................................

१९. ..........................................................................................

२०. ..........................................................................................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १६ तः – पर्यन्तम्, इति

पतिः – अद्य प्रातः कालतः वृष्टिः। रात्रिपर्यन्तम् अपि एवम् एव इति भाति।

पत्नी – आम्। मध्याह्ने गोपालः आगतवान् आसीत्।

पतिः – किम् उक्तवान् सः ?

पत्नी – सायं षड्वादनानन्तरम् आगमिष्यामि इति उक्त्वा गतवान्। सः द्विवादने भवतः कार्यालयं प्रति दूरवाणीं कृतवान् आसीत्?

पतिः – सार्धैकवादनतः सार्धद्विवादनपर्यन्तम् अस्माकं भोजनविरामः।

पत्नी – पादोनचतुर्वादने भवान् कुत्र गतवान् आसीत् ?

पतिः – सार्धत्रिवादनतः चतुर्वादनपर्यन्तम् अहम् अधिकारिणः प्रकोष्ठे आसम्। किमर्थं पृष्टवती भवती ?

पत्नीः – गोपालः उक्तवान् पादोनचतुर्वादने अपि दूरवाणीं कृतवान् आसम्' इति। सः एकं शीतकं क्रेतुम् इच्छति इति भाति।

पतिः – तर्हि सः ऋणरूपेण धनम् इच्छति इति भाति। कियत् धनम् आवश्यकम् इति किमपि उक्तवान् वा सः ?

पत्नी – न। 'सायं मेलिष्यामि' इति उक्तवान् सः। 'अस्तु' इति अहम् उक्तवती।

विशेषः

* **तः – पर्यन्तम् –**

अवधिसूचनार्थम् एतस्य प्रयोगः। कालः, दैर्घ्यं, विस्तारः, इत्यादयः, एतेन सूच्यन्ते।

उदा – i. १.०० तः २.०० पर्यन्तं मम विरामः। – कालः

ii. कन्याकुमारीतः हिमालयपर्यन्तं भारतम्। – विस्तारः

* **इति**

अन्यस्य वचनं यदा उद्ध्रियते तदा अन्ते 'इति' शब्दस्य प्रयोगः भवति। 'इति' शब्दात् पूर्वं वक्तुः वचनं यथावत् उच्यते।

**उदा** – सः उक्तवान् – ''मम अन्यत् कार्यम् अस्ति'' इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अभ्यासः - ६४**

**भगवद्गीतापुस्तकस्य अनुक्रमणिका**


| अध्यायनाम | | पृष्ट् संख्या |
|---|---|---|
| १. अर्जुन - विषादयोगः | ................................ | १. |
| २. साङ्ख्ययोगः | ................................ | १०. |
| ३. कर्मयोगः | ................................ | १५. |
| ४. ज्ञानयोगः | ................................ | १९. |
| ५. कर्मसंन्यासयोगः | ................................ | २२. |
| ६. आत्मसंयमयोगः | ................................ | २६. |
| ७. ज्ञानविज्ञानयोगः | ................................ | ३१. |
| ८. अक्षरब्रह्मयोगः | ................................ | ३६. |
| ९. राजविद्यायोगः | ................................ | ३९. |
| १०. विभूतियोगः | ................................ | ४३. |
| ११. विश्वरूपदर्शनम् | ................................ | ४६. |


उपरि निर्दिष्टायाः अनुक्रमणिकायाः आधारेण कः अध्यायः कुतः कियत्पर्यन्तम् अस्ति इति निर्दिशन्तु।

**उदा - १ प्रथमपुटतः दशमपुटपर्यन्तम् अर्जुनविषादयोगाध्यायः अस्ति।**

२. ........................................................ सङ्ख्ययोगाध्यायः अस्ति।

३. ................................................................................ ''।

४. ................................................................................ ''।

५. ................................................................................ ''।

६. ................................................................................ ''।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १७ च, अपि, एव

आचार्यः – श्वस्तनस्य वार्षिकोत्सवस्य निमित्तं सर्वविधसन्नाहाः अपि कृताः खलु ?विजय! भवान् वदतु – कः कः किं किं कार्यं करोति इति।

विजयः – शङ्करः, विशारदः, श्रीपादः, च वेदिकालङ्कारं कुर्वन्ति। अमरः, गणपतिः, नन्दनः, च आसनव्यवस्थां पश्यन्ति।

आचार्यः – मण्डपालङ्कारं के कुर्वन्ति?

विजयः – रमाकान्तः तत्सहकारिणः च कुर्वन्ति।

आचार्यः – दीपालङ्कारं के कुर्वन्ति?

विजयः – रमाकान्तादयः एव दीपालङ्कारम् अपि कुर्वन्ति।

आचार्यः – मुख्यातिथिं कः आनयति?

विजयः – मुकुन्दः मुख्यातिथिम् आनयति सः एव मुख्यातिथेः प्रेषणव्यवस्थाम् अपि करोति।

आचार्यः – अध्यक्षं कः आनयति?

विजयः – अध्यक्षः स्वयमेव आगमिष्यति।

आचार्यः – तस्य पत्नी अपि कार्यक्रमे उपस्थिता भवति खलु?अतः तस्याः निमित्तम् अपि वेदिकायाम् आसन्दः कल्पनीयः।

**विशेषः**

* **च**

**अ )**

i. रामः, कृष्णः, गोविन्दः, च गच्छति।

ii. रामं कृष्णं गोविन्दं च भवान् आह्वयतु।

iii. बालकाः लेखन्या अङ्कन्या च लिखन्ति।

iv. अग्रजाय अनुजाय जनकाय च पानीयं ददातु।

v. कार्यक्रमार्थं नगरात् ग्रामात् च जनाः आगताः।

vi. हरीशस्य, वीरेन्द्रस्य, अमरस्य च गृहम् एतस्मिन् मार्गे अस्ति।

vii. गृहे, मार्गे, विद्यालये च संस्कृतेन सम्भाषणं कुर्वन्तु।

**आ )** 'च' कारस्य अर्थः समुच्चयः इति। प्रथमवाक्ये (रामः, कृष्णः, गोविन्दः च इत्यत्र) कर्तृपदानां समुच्चयः उक्तः अस्ति। द्वितीय-वाक्ये (रामं, कृष्णं गोविन्दं च इत्यत्र) कर्मपदानां समुच्चयः उक्तः अस्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एवम् एव अग्रिमवाक्येषु अपि ज्ञातव्यम्।

इ ) 'च' कार: अन्ते योजनीय:। कन्नडभाषायाम्, आंग्लभाषायां, हिन्दीभाषायां च मध्ये योजयन्ति।

अत: – "राम:, कृष्ण:, गोविन्द:, च गच्छन्ति। – शुद्धम्

राम:, कृष्ण: च गोविन्द: गच्छन्ति। – अशुद्धम्

**अपि**

राम: अपि फलं खादति। – अन्ये कृष्णादय: खादन्ति। तदा राम: अपि खादति इत्यर्थ:।

राम: फलम् अपि खादति। – राम: अन्यानि खादति। तेन सह फलम् अपि खादति इत्यर्थ:।

राम: फलं खादति अपि। – राम: फलं, पश्यति, ददाति, सङ्गृह्णाति। तथैव खादति अपि इत्यर्थ:।

(चकार: यथा सप्तभि: विभक्तिभि: युक्तेषु वाक्येषु अपि प्रयुक्त: तथैव 'अपि' कार: अपि प्रयोक्तुं शक्य:।)

* **एव**

i. राम: एव फलं खादति। – कृष्ण: गोविन्द: वा फलं न खादति इत्यर्थ:।

ii. राम: फलम् एव खादति। – अन्नं रोटिकां वा राम: न खादति इत्यर्थ:।

iii. राम: फलं खादति एव। – राम: न पश्यति, न ददाति, अपि तु खादति एव इति अर्थ:।

एवम् 'एव' कार: निश्चयं (अन्यनिवारणं च) प्रदर्शयति।

(चकारस्य अपिकारस्य च प्रयोग: यथा तथैव एवकारस्य प्रयोग: अपि अन्यान्यविभक्तिभि: युक्तेषु वाक्येषु भवितुम् अर्हति।)

**अभ्यास: – ६६**

अध: लघुवाक्यानि सन्ति। चकारं प्रयुज्य तानि एकवाक्यत्वेन लिखन्तु।

**उदा – विष्णु:, गच्छति। श्रीधर: गच्छति। श्रीश: गच्छति।**

**विष्णु:, श्रीधर:, श्रीश: च गच्छन्ति।**

१. सीता पठति। गीता पठति। लता पठति।

........................................................................................।

२. बालका: क्रीडन्ति। बालिका: क्रीडन्ति। तरुणा: क्रीडन्ति।

........................................................................................।

३. अहं फलं खादामि। मधुरं खादामि। रोटिकां खादामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

..........................................................................................।

४. लेखनी कोषे अस्ति, स्यूते अस्ति, कपाटिकायाम् अस्ति।

..........................................................................................।

५. ते सन्तोषेण क्रीडन्ति, उत्साहेन क्रीडन्ति, श्रद्धया क्रीडन्ति।

..........................................................................................।

६. बान्धवा: मैसूरुत: आगता:, मद्रास्त: आगता:, देहलीत: आगता:।

..........................................................................................।

७. भवान् तस्य कार्यं करोतु, मम कार्यं करोतु, एतस्य कार्यं करोतु।

..........................................................................................।

८. अहं राधायै फलं दत्तवती। तस्यै फलं दत्तवती। एतस्यै फलं दत्तवती।

..........................................................................................।

**अभ्यास: - ६७**

उदाहरणानुसारं वाक्यानि रचयन्तु।

**उदा - राम: गच्छति। कृष्ण: गच्छति। अत: ................................।**

**अत: - कृष्ण: अपि गच्छति।**

१. बालका: क्रीडन्ति। बालिका: क्रीडन्ति।

अत: - ..............................................................................।

२. अहम् इतिहासं पठामि। विज्ञानं पठामि।

अत: - अहं ......................................................................।

३. स: द्विचक्रिकया गच्छति। लूनायानेन गच्छति।

अत: - स: ........................................................................।

४. अग्रजाय पत्रं लिखतु। भगिन्यै पत्रं लिखतु।

अत: - ..............................................................................।

५. प्रकोष्ठे दीपं ज्वालयतु। पाकशालायां दीपं ज्वालयतु।

अत: - ..............................................................................।

६. कुटुम्बस्य पोषणं करोतु। समाजस्य पोषणं करोतु।

अत: - ..............................................................................।

७. स: पठनं जानाति। सम्भाषणं जानाति।

अत: - ..............................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८. एतं न वदतु। तं न वदतु।

अतः – ..................................................................................।

**अभ्यासः – ६८**

'अ' विभागे 'एवकारयुक्तानि' वाक्यानि सन्ति। 'आ' विभागे अर्थविवरणयुक्तानि वाक्यानि सन्ति। 'अ' विभागे स्थितेषु आवरणेषु 'आ' विभागस्य योग्यस्य वाक्यस्य सङ्ख्यां लिखन्तु।

| अ | | आ |
|---|---|---|
| १. सः एव गतवान् | ( ) | १. सः अन्यत्र न गतवान् |
| २. रामम् एव आह्वयतु। | ( ) | २. अन्या काचित् न खादितवती। |
| ३. सः गृहम् एव गतवान्। | ( ) | ३. अन्यः गृहे न आसीत्। |
| ४. रामं भोजनार्थम् एव आह्वयतु। | ( ) | ४. अन्यं न आह्वयतु। |
| ५. सीता एव फलं खादितवती। | ( ) | ५. सीता न फलं दृष्टवती, न वा स्वीकृतवती। |
| ६. भवान् एव गृहे आसीत्। | ( ) | ६. अन्यः न गतवान्। |
| ७. सीता फलम् एव खादितवती। | ( ) | ७. पुस्तकं गोविन्दस्य अन्यस्य वा न। |
| ८. भवान् गृहे एव आसीत्। | ( ) | ८. अन्यस्य कस्यचित् निमित्तं न आह्वयतु। |
| ९. सीता फलं खादितवती एव। | ( ) | ९. सीता अन्यत् किमपि न खादितवती। |
| १०. एतत् पुस्तकं रामस्य एव। | ( ) | १०.भवान् अन्यत्र न आसीत्। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# १८ उपसर्गः

ललिता – सुरेश। आगच्छतु अत्र। दालपात्रम् अवतारयतु तावत्।

सुरेशः – अहं पठन् अस्मि भगिनि। भवती एव चतुष्पादिकाम् आनयतु।

ललिता – अहं न शक्नोमि इत्यतः भवन्तम् आह्वयामि।

सुरेशः – अद्य प्रातः कालतः सर्वे माम् एव कार्यम् आदिशन्ति।

ललिता – तर्हि कति कार्याणि कृतवान् भवान्?

सुरेशः – प्रातः क्षीरम् आनीतवान्। सस्यानि आरोपितवान्। कुतृणानि उत्पाटितवान्।.

ललिता – एतादृशानि कार्याणि अहम् अपि बहूनि कृतवती। पुष्पाणि सङ्गृहीतवती। पात्राणि प्रक्षालितवती। गृहं सम्मार्जितवती। स्नानगृहे अग्निं प्रज्वालितवती। कूपात् जलम् उद्धृतवती।

माता – वत्से। आगच्छतु अत्र। क्षीरम् उष्णीकरोतु। भोजनकटं प्रसारयतु। ततः उपाहारं परिवेषयतु। प्रकोष्ठे दीपः ज्वलति इति मन्ये। तं निर्वापयतु। तथैव, पिता न उत्थितवान्। तम् उत्थापयतु। ...

ललिता – अम्ब! एवं तर्हि अहं कदा पठामि?मम कष्टम् अत्र कोऽपि न अवगच्छति।

**विशेषः**

* **उपसर्गाः**

i. उपसर्गाः द्वाविंशतिः – ते च – प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ, नि, अधि, अपि , अति, सु, उत्, अभि, प्रति, परि, उप।

उदा – प्र + भवति = प्रभवति

निर् + आ + करोति = निराकरोति।

ii. अलम्, बहिस्, अन्तर्, इत्यादयः, अपि उपसर्गतुल्याः भवन्ति।

उदा – अलङ्करोति, बहिष्करोति, अन्तर्भवति ...

iii. स्वी, उष्णी, सज्जी इत्यादयः अपि उपसर्गतुल्याः एव। (वस्तुतः एते च्विप्रत्ययान्ताः इति उच्यते।)

* **उपसर्गनियमाः**

i. उपसर्गाः धातोः पूर्वं भवन्ति।

ii. उपसर्गकारणतः कदाचित् धातोः अर्थः परिवर्तते।

उदा – गच्छति – आगच्छति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वदति – प्रतिवदति।

iii. कदाचित् उपसर्गः धातोः अर्थम् एव पोषयति। (अन्यम् अर्थं न सूचयति इत्यर्थः)

उदा – शोभते – सुशोभते।

iv. द्वित्राः उपसर्गाः अपि कदाचित् भवितुम् अर्हन्ति।

उदा – प्रति + आ + गच्छति – प्रत्यागच्छति।

वि + अव + स्थापयति – व्यवस्थापयति।

प्रति + उत् + आ + हरति – प्रत्युदाहरति।

v. उपसर्गकारणतः कदाचित् परस्मैपदी धातुः आत्मनेपदित्वम्, आत्मनेपदी धातुः परस्मैपदित्वं च प्राप्नोति।

उदा – वि + जयति – विजयते

प्र + तिष्ठति – प्रतिष्ठते

वि + रमते – विरमति

**अभ्यासः – ६९**

उपसर्गसहितेन योग्येन धातुरूपेण रिक्तस्थानानि पूरयन्तु।

प्र/सम्/वि/परि/अप+हृ (हरति)

उदा – अध्यापकः बालकं ..................।

अध्यापकः बालकं प्रहरति।

१. चोरः धनम् ..........................................................................।

२. राजा शत्रुं ..........................................................................।

३. पण्डितः समस्यां ..................................................................।

४. जनाः उद्याने ........................................................................।

उप/निर्+आ/अनु/पुटी/उष्णी/अलम्+कृ(करोति)

५. कनिष्ठः ज्येष्ठस्य व्यवहारम् ................................................।

६. माता क्षीरम् ........................................................................।

७. गृहिणी गृहम् .......................................................................।

८. सज्जनः हितवचनं न ..............................................................।

९. सज्जनः जनान् .....................................................................।

१०. भगिनी वस्त्रं ......................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अप/आ/निर्/अनु/अभि/परि+नीतवान्

११. नट: सम्यक् .......................................................................।

१२. राम: सीतां .......................................................................।


१३. वैद्य: रोगिण: वेदनाम् ..................................................................।

१४. कर्मकर: आपणात् वस्तूनि ...........................................................।

१५. किं करणीयम् इति स: ................................................................।

१६. अग्रज: अनुजम् ........................................................................।

**अभ्यास: - ७०**




उपरि त्रय: उपसर्गा: केचन धातव: च निर्दिष्टा: सन्ति। उचितेन उपसर्गसहितक्रियापदेन रिक्तस्थानानि पूरयन्तु।

I. १. इदानीं कार्यक्रमे भाषणं .......................................................ति।

२. चलनचित्रमन्दिरेषु चित्राणि ..............................................न्ति।

३. भवत: विचार: मम बुद्धौ न ...............................................ति।

४. एतां लेखनीं भवान् कुत्र ...............................................वान्।

५. स: भवत: बुद्धिमत्तां बहु ...................................................ति।

II. ६. बालक: नष्टां लेखनीं सर्वत्र ...............................................ति।

७. अविवेकी चिन्तनं विना अन्यम् .........................................ति।

८. भगवान् मुनिं मोक्षेण .......................................................वान्।

९. सेवक: स्वामिनम् .............................................................ति।

१०. धनं प्राप्य निर्धन: सन्तोषम् ..............................................वान्।

III. ११. प्रतिदिनं भवान् धनं ..........................तु। तेन अग्रे लाभ: भवति।

१२. उद्योगी प्रतिमासं धनं ........................................................ति।

१३. भक्त: देवाय पुष्पाणि .........................................................ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१४. पण्डितः सभायां स्ववादं ..................................................ति।

१५. काष्ठविक्रयिकः अरण्यं गत्वा काष्ठानि ..............................ति।

**अभ्यासः - ७१**

अधस्तनवाक्येषु यद्यपि क्रियापदानि सन्ति, तथापि योग्यस्य उपसर्गस्य अभावात् अर्थसङ्गतिः नास्ति। अतः अर्थसङ्गतिः यथा स्यात् तथा योग्यम् उपसर्गं योजयन्तु।

उदा - आकाशवाणी वार्तां .................. सारयति।

आकाशवाणी वार्तां प्रसारयति।

१. देवः भक्तं वरेण ..............................................................गृह्णाति।

२. वेदनया सः महत् कष्टम् .................................................. भवति।

३. भवान् सदा सज्जनैः निर्दिष्टं मार्गम् ....................................... सरतु।

४. मम वचनं मा .......................................................... करोतु कृपया।

५. वृक्षात् ....................................................... तरणसमये सः पतितः।

६. यन्त्रागारं नूतनवस्तूनि ....................................................... पादयति।

७. गुरुः शिष्यान् नीतिम् ...................................................... दिशति।

८. अम्ब! भवती प्रातः पञ्चवादने माम् ................................ स्थापयतु।

९. आगच्छतु मित्र! ................................................................ विशतु।

१०. कृपणः सर्वदा धनं ........................................................... गृह्णाति।

११. सायङ्काले पक्षिणः नीडं .................................................. विशन्ति।

१२. विवाहनिमित्तम् अहं बन्धून् ............................................... ह्वयामि।

१३. मम अध्यापकः सम्यक् .................................................. आपयति।

१४. इदानीं गत्वा सायङ्कालात् पूर्वं ........................................... गच्छतु।

१५. अहं परीक्षायां प्रथमस्थानं ................................................ आप्तवान्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# ११ क्तवा ल्यप् च

प्रकाशः – रमेश! इदानीं कुत्र कुत्र गमनं भवतः?

रमेशः – प्रथमम् इतः पत्रालयं गच्छामि। तत्र गत्वा बन्धं प्रेषयित्वा मूल्याङ्कान् क्रीत्वा कार्यालयं प्रत्यागच्छामि। कार्यालये मूल्याङ्कं धनगणनां च दत्त्वा वित्तकोषं गमिष्यामि। तत्र धनं पूरयित्वा एकं डी.डी. स्वीकरोमि। तत्समये तत्रैव उपविश्य पत्रं लिखित्वा पत्रं डी.डी. च प्रेषयित्वा ..

प्रकाशः – पत्रालयं गत्वा पत्रस्य भारं ज्ञात्वा उचितं मूल्याङ्कं स्वीकृत्य पिहितपत्रे संश्लेष्य, निर्यासेन पिहितपत्रं पिहितं कृत्वा पत्रं पेटिकायां निवेश्य .

रमेशः – मम कार्याणि भवतः उपहासस्य विषयाः खलु ?

प्रकाशः – मित्र! कोपः मास्तु। विनोदार्थं तथा उक्तं मया।

**विशेषः**

**क्त्वा –**

यदा एकः कार्यद्वयं करोति तदा पूर्वकार्यवाचकस्य क्रियापदस्य क्त्वाप्रत्ययः भवति।

उदा – i. रामः पठति। रामः लिखति।

रामः पठित्वा लिखति।

ii. सीता फलं कर्तयति। सीता ददाति।

सीता फलं कर्तयित्वा ददाति।

रामः पठति। भीमः खादति। – रामः पठित्वा भीमः खादति। – इति वक्तुं न शक्नुमः। यतः पठनकर्ता रामः। खादनकर्ता भीमः। एवं कर्तृभेदः अस्ति अत्र। एककर्तृकत्वं यत्र भवति तत्र एव क्त्वाप्रयोगः।

**क्त्वाप्रत्ययरूपाणि**

| | |
|---|---|
| गच्छति – गत्वा | क्रीणाति – क्रीत्वा |
| पठति – पठित्वा | पिबति – पीत्वा |
| शृणोति – श्रुत्वा | नयति – नीत्वा |
| ददाति – दत्त्वा | पश्यति – दृष्ट्वा |
| वदति – उक्त्वा | पृच्छति – पृष्ट्वा |

**ल्यप् –** यदा धातुः उपसर्गेण युक्तः भवति तदा क्त्वाप्रत्ययस्य स्थाने ल्यप्प्रत्ययः भवति।

उपसर्गः + धातुः = ल्यप्



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उदा – आ + गम् = आगत्य

प्र + क्षाल् = प्रक्षाल्य

पिदधाति – पिधाय परिहरति – परिहृत्य

उत्तिष्ठति – उत्थाय स्वीकरोति – स्वीकृत्य

आजिघ्रति – आघ्राय निर्वहति – निरुह्य

आनयति – आनीय अनुवदति – अनूद्य

आह्वयति – आहूय निःश्वसिति – निःश्वस्य

**अभ्यासः – ७२**

प्रभाकरः एकस्मिन् दिने यानि कार्याणि कृतवान् तानि अधः निर्दिष्टानि सन्ति। क्त्वान्तरूपाणि योजयन्तः शृङ्खलाक्रमेण वाक्यानि रचयन्तु।

क्षीरं पीतवान्, पाठं पठितवान्, वार्तां श्रुतवान्, उत्तरं लिखितवान्, भोजनं कृतवान्, शालां गतवान्, प्रश्नस्य उत्तरं दत्तवान्, क्रीडाङ्गणे क्रीडितवान्, व्याकरणं ज्ञातवान्, लेखनीं क्रीतवान्, चित्रं दृष्टवान्, फलं खादितवान्।

उदा – प्रभाकरः क्षीरं पीत्वा पाठं पठितवान्।

१. प्रभाकरः पाठं .................................... वार्तां ...............................।

२. प्रभाकरः ..........................................................................।

३. प्रभाकरः ..........................................................................।

४. प्रभाकरः ..........................................................................।

५. प्रभाकरः ..........................................................................।

६. प्रभाकरः ..........................................................................।

७. प्रभाकरः ..........................................................................।

८. प्रभाकरः ..........................................................................।

९. प्रभाकरः ..........................................................................।

१०. प्रभाकरः ....................................................................फलं खादितवान्।

**अभ्यासः – ७३**

अधः उपसर्गः क्त्वान्तं रूपं च निर्दिष्टम् अस्ति। युक्तं ल्यबन्तरूपं रिक्तस्थाने लिखन्तु।

उदा – आ + गत्वा = आगत्य

१. परि+शीलयित्वा = ..................... २. आ+नीत्वा = ....................

३. प्र+दर्शयित्वा = .......................... ४. उत्+स्थित्वा = ..................



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | |
|---|---|
| ५. प्र+क्षालयित्वा = ........................ | ६. वि+क्रीत्वा = .................... |
| ७. उप+हसित्वा = ......................... | ८. अनु+उक्त्वा = .................. |
| ९. परिष्+कृत्वा = ........................ | १०. निर्+आ+कृत्वा = ............ |
| ११. अनु+भूत्वा = ........................ | १२. आ+कृष्ट्वा = .................... |
| १३. स+मार्जयित्वा = ................... | १४. प्र+आप्त्वा = .................. |
| १५. आ+हूत्वा = ........................ | १६. वि+स्मृत्वा = ................ |
| १७. निः+श्वसित्वा = ................ | १८. आ+रूढ्वा = ............... |
| १९. निर्+दिष्ट्वा = ........................ | २०. प्र+स्थित्वा = ............... |
| २१. आ+घ्रात्वा = ....................... | २२. उत्+डीत्वा = .................. |
| २३. आ+छादयित्वा = .................. | २४. निस्+चित्वा = ................ |
| २५. निर्+ऊढ्वा = ........................ | २६. नि+वेदयित्वा = ............ |

**अभ्यासः – ७४**

सुधीरस्य दिनचरी अधः निर्दिष्टा अस्ति। तदाधारेण ल्यबन्तरूपाणि उपयुज्य शृङ्खलारूपेण वाक्यानि रचयन्तु।

प्रातः उत्थितवान्, मुखं प्रक्षालितवान्, देवं नमस्कृतवान्, पाठान् कण्ठस्थीकृतवान्, वस्तूनि आनीतवान्, गृहम् अलङ्कृतवान्, वाक्यानि अनूदितवान्, जलम्, उद्धृतवान्, वृक्षम् आरूढवान्, फलानि अवचितवान्, कार्यार्थं निर्गतवान्, कार्यालयं प्राप्तवान्।

**उदा – सुधीरः प्रातःउत्थाय मुंख क्षालितवान्।**

१. सुधीरः मुखं ............................................................ नमस्कृतवान्।

२. सुधीरः ...................................................... पाठान् ....................।

३. सुधीरः ..............................................................................।

४. सुधीरः ..............................................................................।

५. सुधीरः ..............................................................................।

६. सुधीरः ..............................................................................।

७. सुधीरः ..............................................................................।

८. सुधीरः ..............................................................................।

९. सुधीरः ..............................................................................।

१०. सुधीरः ....................................................................प्राप्तवान्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २० अपेक्षया

नागराजः – ह्यः अपेक्षया अद्य शैत्यम् अधिकं खलु ?

चन्द्रकान्तः – आम्। गतवर्षापेक्षया एतस्मिन् वर्षे एव शैत्यम् अधिकम्।

नागराजः – गतवर्षापेक्षया अस्मिन् वर्षे वृष्टिः अपि अधिका आसीत्।

चन्द्रकान्तः – पूर्वापेक्षया इदानीं परिसरमालिन्यम् अधिकम्। अतः एतत्सर्वं सम्भवति।

**विशेषः**

**अपेक्षया**

यदा द्वयोः तोलनं कृत्वा आधिक्यं न्यूनता वा उच्यते तदा 'अपेक्षया' इत्यस्य उपयोगः क्रियते।

उदा – बकासुरस्य अपेक्षया भीमः बलवान्।

## अभ्यासः – ७५

**पार्श्वे चित्रद्वयं दत्त् अस्ति। अधः तत्सम्बन्धीनि विवरणानि अपि सूचितानि सन्ति। एतदाधारेण अधः निर्दिष्टानां प्रश्नानाम् उत्तराणि 'अपेक्षया' इति पदेन युक्तेन वाक्येन लिखन्तु।**

| | | |
|---|---|---|
| **उद्योगः** | **– लिपिकारः** | **अधिकारी** |
| **वेतनम्** | **– रू. १,५००.००** | **रू. २,०००.००** |
| **भारः** | **– ४२ किलो** | **४७ किलो** |
| **परीक्षायां** | **– प्रथमस्थानम्** | **प्रथमश्रेणी** |
| **आसक्तिः** | **– परिसरः** | **क्रीडा** |
| **प्रियखाद्यम्** | **– शष्कुली** | **लड्डुकः** |
| **वयः** | **– ४० वर्षाणि** | **३७ वर्षाणि** |
| **वित्तकोषे धनम्** | **– रू. १२,०००.००** | **रू. ३५,०००.००** |

उदा – एतयोः कः स्थूलः ?

मोहनस्य अपेक्षया अर्जुनः स्थूलः।

१. एतयोः कः उन्नतः ?

..........................................................................................।

२. एतयोः कः कृशः ?

..........................................................................................।

३. एतयोः कस्य वेतनम् अधिकम् ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

.........................................................................................।

४. एतयो: क: ज्येष्ठ: ?

.........................................................................................।

५. एतयो: कस्य भार: अधिक: ?

.........................................................................................।

६. एतयो: कस्य परिसरप्रीति: अधिका ?

.........................................................................................।

७. एतयो: कस्मिन् मधुरप्रीति: अधिका ?

.........................................................................................।

८. एतयो: क: बुद्धिमान् ?

.........................................................................................।

९. एतयो: कस्य उद्योग: उच्च: ?

.........................................................................................।

१०. एतयो: क: अधिकं व्ययं करोति ?

.........................................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २१ तुमुन्

पुत्रः तात! एतां पुस्तकप्रदर्शिनीं किमर्थम् आयोजितवन्तः?

पिता – पुस्तकानां प्रचारं कर्तुम्। पुस्तकप्रकाशकाः पुस्तकानि विक्रेतुं, प्रदर्शयितुं च अत्र आगच्छन्ति।

पुत्रः – जनाः पुस्तकानि क्रेतुम् आगच्छन्ति किल ?

पिता – आम्। केचन क्रेतुम्, पुनः केचन द्रष्टुम्।

पुत्रः – बहिः क्रीडासाधनानि किमर्थं सन्ति ?

पिता – जनान् आक्रष्टुम्। अत्र द्रष्टुम् आगताः केचन पातुम् इच्छन्ति, केचन खादितुम् इच्छन्ति। अतः उपाहारशकटानि अपि तत्र सन्ति।

पुत्रः – केचन भिक्षुकाः अपि सन्ति, पश्यतु। धनं याचितुम् आगताः ते।

पिता – आम्। ये दातुम् इच्छन्ति ते यच्छन्ति। चोरयितुम् इच्छन्तः केचन चोराः अपि अत्र भवन्ति। अतः जनान् शान्तिव्यवस्थां च रक्षितुम् अत्र आरक्षकाः सन्ति।

**विशेषः**

**तुमुन्प्रत्ययः**

''रामः पठितुं शालां गच्छति।'' – एतस्मिन् वाक्ये गच्छति इति क्रिया पठनोद्देशेन अस्ति। अतः पठनम् – उद्दिष्टक्रिया। एवम् उद्दिष्टक्रियायाः 'तुमुन्' भवति।

**तुमुन्नन्तरूपाणि कानिचन**

| | |
|---|---|
| लिखति – लेखितुम् | करोति – कर्तुम् |
| मिलति – मेलितुम् | शृणोति – श्रोतुम् |
| नयति – नेतुम् | गृह्णाति – ग्रहीतुम् |
| पश्यति – द्रष्टुम् | उत्तिष्ठति – उत्थातुम् |
| पृच्छति – प्रष्टुम् | ददाति – दातुम् |


**अभ्यासः – ७६**

शालिनी कीर्तिं प्राप्तुम् इच्छति। अतः सा कानिचन कार्याणि कृतवती। अग्रिमक्रियार्थं पूर्वक्रिया कृता तया। तया कृतानि कार्याणि शृङ्खलाक्रमेण अधः निर्दिष्टानि। तदाधारेण वाक्यानि रचयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




**उदा – शालिनी गृहात् निर्गन्तुं वस्त्रं धरति।**

१. शालिनी ............................................................ गृहात् निर्गच्छति।

२. शालिनी ........................................................................ प्राप्नोति।

३. शालिनी ...................................................................................।

४. शालिनी ...................................................................................।

५. शालिनी ...................................................................................।

६. शालिनी ...................................................................................।

७. शालिनी ...................................................................................।

८. शालिनी ...................................................................................।

९. शालिनी ...................................................................................।

१०. शालिनी ........................................................................प्राप्नोति।

## अभ्यासः – ७७

आरम्भे यत् सम्भाषणं दत्तं तस्य आधारेण अधः केचन प्रश्नाः निर्दिष्टाः सन्ति। तेषाम् उत्तराणि लिखन्तु।

१. प्रदर्शिनीं किमर्थम् आयोजिवन्तः ?

..........................................................................................।

२. पुस्तकप्रकाशकाः किमर्थम् आगच्छन्ति ?

..........................................................................................।

३. जनाः किमर्थम् आगच्छन्ति ?

..........................................................................................।

४. क्रीडासाधनानि किमर्थं सन्ति ?

..........................................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २२ विशेषणविशेष्यभावः

नवीनः – मित्र! पश्यतु! एषः मम नूतनः स्यूतः।

तपनः – स्यूतः उत्तमः अस्ति। लेखनी अपि नूतना वा ?समीचीना लेखनी।
अहो, युतकम् ऊरुकं चापि नूतनम्। बहु सुन्दरम् अस्ति।

नवीनः – आगामिसप्ताहे मम पितुः षष्टितमं जन्मदिनोत्सवाचरणं भविष्यति।
अतः सः एतानि सर्वाणि दापितवान्। अग्रजायै नूतनां घटीम्, अनुजाय
नूतनां द्विचक्रिकां च दापितवान् सः।

तपनः – षष्ट्यब्दकार्यक्रमं महता वैभवेन आचरन्ति वा भवन्तः।

नवीनः – आम्! सर्वान् बान्धवान्, सर्वान् परिचितान् च आह्वयामः। भवता अपि
सर्वैः गृहसदस्यैः सह आगन्तव्यम्।

तपनः – अस्तु। पश्याम तावत्।

नवीनः – तस्मिन् दिने आगतेभ्यः सर्वेभ्यः उपायनं किमपि दीयते।

तपनः – सुदूरात् नगरात् अपि बान्धवाः आगच्छन्ति खलु ?

नवीनः – आम्! बान्धवाः विभिन्नेभ्यः नगरेभ्यः आगच्छन्ति।

तपनः – एतस्य गृहस्य वैशाल्यं न्यूनं खलु?सर्वे बान्धवाः कुत्र वसन्ति ?

नवीनः – पार्श्वस्थेषु गृहेषु अपि वासः भविष्यति।

**विशेषः**

* **विशेषणं विशेष्यम् च**

'उत्तमः बालकः' – अत्र उत्तमः इति पदं बालके यः विशेषगुणः अस्ति तं सूचयति। एवं तत् पदम् उत्तमत्वयुक्तः इति अर्थं बोधयति। एतत् पदं 'विशेषणम्' इति उच्यते। विशेषणेन युक्तं पदः 'विशेष्यम्' इति उच्यते।

i. **विशेषण – विशेष्ययोः लिङ्गसम्बन्धः –**

बालकः इति पदं (विशेष्यपदं) पुंल्लिङ्गे अस्ति। अतः उत्तमः इति पदम् अपि पुंल्लिङ्गे। 'बालकः' इत्यस्य स्थाने यदि 'बालिका' इति स्त्रीलिङ्गपदं स्थाप्यते तदा विशेषणम् 'उत्तमा' इति स्त्रीलिङ्गरूपं प्राप्नोति। 'पुस्तकम्' इति नपुंसकलिङ्गपदं स्थापितं चेत् विशेषणम् 'उत्तमम्' इति नपुंसकलिङ्गयुक्तं भवति।

अतः – उत्तमः बालकः – पुंल्लिङ्गे
उत्तमा बालिका – स्त्रीलिङ्गे
उत्तमं पुस्तकम् – नपुंसकलिङ्गे

एवं विशेषणानि विशेष्यस्य लिङ्गम् अनुसरन्ति। एवम् एव श्रेष्ठ–



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सुन्दर-समीचीन-चतुर-दीर्घ-ह्रस्व-स्थूल-कृशादयः शब्दाः अपि।
एतत्-तत्-किम्-भवत्-इत्यादयः शब्दाः अपि विशेषणानि। अतः ते शब्दाः अपि विशेष्यानुगुणं लिङ्गं प्राप्नुवन्ति।

उदा – सः/एषः/कः/भवान्-बालकः-पुंल्लिङ्गे
सा/एषा/का/भवती-बालिका-स्त्रीलिङ्गे
तत्/एतत्/किम्-पुस्तकम्-नपुंसकलिङ्गे

एकं, द्वे, त्रीणि ... इत्यादयः सङ्ख्याः अपि विशेषणानि एव।

ii. **विशेषण – विशेष्ययोः वचनसम्बन्धः –**

– विशेष्यम् एकवचने अस्ति चेत् विशेषणम् अपि एकवचने।
– विशेष्यं बहुवचने अस्ति चेत् विशेषणम् अपि बहुवचने।
– (विशेष्यं द्विवचने अस्ति चेत् विशेषणम् अपि द्विवचने।)

उदा –

| | **पुंल्लिङ्गे** | | **स्त्रीलिङ्गे** | | **नपुंसकलिङ्गे** | |
|---|---|---|---|---|---|---|
| एकवचने – | उत्तमः | बालकः | उत्तमा | बालिका | उत्तमं | फलम् |
| बहुवचने – | उत्तमाः | बालकाः | उत्तमाः | बालिकाः | उत्तमानि | फलानि |

एवम् एव

| | | | | |
|---|---|---|---|---|
| पुंल्लिङ्गे | ए.व. – | सः बालकः | एषः बालकः | कः बालकः |
| | ब.व. – | ते बालकाः | एते बालकाः | के बालकाः |
| स्त्रीलिङ्गे | ए.व. – | सा बालिका | एषा बालिका | का बालिका |
| | ब.ब. – | ताः बालिकाः | एताः बालिकाः | काः बालिकाः |
| नपुंसकलिङ्गे | ए.व. – | तत् फलम् | एतत् फलम् | कि फलम् |
| | ब.व. – | तानि फलानि | एतानि फलानि | कानि फलानि |

iii. **विशेषण – विशेष्ययोः विभक्तिसम्बन्धः –**

विशेषणविशेष्ययोः लिङ्गसम्बन्धः वचनसम्बन्धः च यथा भवति तथैव विभक्तिसम्बन्धः अपि भवति। तन्नाम विशेष्यस्य या विभक्ति



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सा एव विभक्तिः विशेषणस्यापि भवति।

उदा –

| पुंल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|
| द्वितीयाविभक्ति – उत्तमं बालकम् | उत्तमां बालिकाम् | उत्तमं फलम् |
| तृतीयाविभक्ति – उत्तमेन बालकेन | उत्तमया बालिकया | उत्तमेन फलेन |
| षष्ठीविभक्तिः – उत्तमस्य बालकस्य | उत्तमायाः बालिकायाः | उत्तमस्य फलस्य |

एवं च सिद्धं यत् –

विशेषण – विशेष्ययोः
- लिङ्गसम्बन्धः भवति।
- वचनसम्बन्धः भवति।
- विभक्तिसम्बन्धः भवति

सम्बन्धः

| | लिङ्गम् | वचनम् | विभक्तिः |
|---|---|---|---|
| सर्वान् बान्धवान् | पुं. | ब.व. | द्वितीया |
| नूतनां घटीम् | स्त्री. | ए.व. | द्वितीया |
| सर्वैः गृहसदस्यैः | पुं. | ब.व. | तृतीया |
| सुदूरात् नगरात् – | नपुं. | ए.व. | पञ्चमी |
| एतस्य गृहस्य – | नपुं. | ए.व. | षष्ठी |
| पार्श्वस्थेषु गृहेषु – | नपुं. | ब.व. | सप्तमी |

विशेषणविशेष्ययोः त्रिविधसम्बन्धम् * एषः श्लोकः ज्ञापयति –

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य।
तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्यापि।

**अभ्यासः – ७८**

अधः सूचितानां विशेष्याणां लिङ्ग–वचन–विभक्त्यनुगुणम् 'उत्तम' शब्दस्य उचितैः रूपैः रिक्तस्थानानि पूरयन्तु।

उदा – (............................) बालकम्।
(उत्तमं) बालकम्।

१. (........................) बालकान्  २. (........................) गृहाणि

३. (........................) लेखन्यः  ४. (........................) जनैः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. (.......................) जनेषु    ६. (.......................) नगरात्

७. (.......................) बालिकाभिः    ८. (.......................) बालकस्य

९. (.......................) पुस्तके    १०. (.......................) कथाम्

११. (.......................) हृदयेषु    १२. (.......................) वर्णेन

१३. (.......................) कार्यैः    १४. (.......................) मालाभिः

१५. (.....................) गृहिणीनाम्    १६. (.....................) सञ्चिकया

१७. (.......................)शाटिकायाः    १८. (.......................) वाक्यानि

१९. (.......................) ग्रामेषु    २०. (.......................) व्यजनेन

---

*** आंग्ल्-हिन्दी कन्नडादिभाषासु विशेषण-विशेष्ययोः लिङ्गसम्बन्धमात्रं क्वचित् दृश्यते ( न सर्वत्र )। वचन-सम्बन्धः विभक्तिसम्बन्धः च संस्कृतभाषायाम् एव दृश्यते, न अन्यभाषासु।**

## अभ्यासः - ७९

अधः कानिचन विशेषणानि निर्दिष्टानि सन्ति। विशेषणस्य लिङ्गं वचनं विभक्तिं च मनसि स्थापयित्वा योग्येन विशेष्येण रिक्तस्थानानि पूरयन्तु।

उदा - ताम् (................)    केन (...................)

तां बालिकाम्    केन हस्तेन

१. तया (.........................)    २. कम् (.........................)

३. केषु (.........................)    ४. सर्वैः (.........................)

५. एतया (.........................)    ६. सर्वान् (.........................)

७. तस्मै (.........................)    ८. तेषाम् (.........................)

९. कस्मात् (.........................)    १०. एतस्य (.........................)

११. तस्यै (.........................)    १२. तासु (.........................)

१३. तासाम् (.........................)    १४. एताभिः (.........................)

१५. एतस्याः (.........................)    १६. तस्मिन् (.........................)

१७. सर्वेषाम् (.........................)    १८. तस्याम् (.........................)

## अभ्यासः - ८०

आवरणे दत्तानां विशेषणानाम् उचितं रूपं विशेष्याणां लिङ्ग-वचन-विभक्त्यनुगुणं ज्ञात्वा तैः रिक्तस्थानानि पूरयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उदा – भवान् सर्वदा (श्रेष्ठ) ........................ पुस्तकानि पठतु।

भवान् सर्वदा श्रेष्ठानि पुस्तकानि पठतु।

१. अहम् अद्य (समीचीन) .......................................... लेखनीं क्रीतवान्।

२. स: (आत्मीय) ....................................................... मित्रै: सह क्रीडति।

३. अध्यापिका (सर्व) .................................... छात्रान् श्रद्धया बोधयति।

४. अध्यापक: अद्य (समीचीन) ................................. कथा: उक्तवान्।

५. धनिक: (निर्धन) ...................................... जनेभ्य: वस्त्राणि दत्तवान्।

६. (उन्नत) .......................................................वृक्षात् पर्णानि पतन्ति।

७. (एषा)...............शालाया: (सर्व)................प्रकोष्ठेषु कृष्णफलकम् अस्ति।

८. (स:)...................आपणे (समीचीन)..................... वस्तूनि न सन्ति।

९. (ते) .....................पाठान् पठित्वा(एषा).........................कथां पठतु।

१०. स:(नूतन)...................युतकं धृत्वा (नूतन)..................कार्यानेन गच्छति।

**अभ्यास: – ८१**

अध: प्रतिवाक्यं विशेषणद्वयं सूचितम् अस्ति। अर्थस्य औचित्यं दृष्ट्वा तयो: उचितेन रूपेण रिक्तस्थानानि पूरयन्तु।

उदा – स: ...........घटीं विक्रीय .............घटीं क्रीतवान्। (नूतन/प्राचीन)

स: प्राचीनां घटीं विक्रीय नूतनां घटीं क्रीतवान्।

१. अहं .....................चित्रं पश्यामि। .................चित्रं को वा पश्यति? (सुन्दर/असुन्दर)

२. ...............सिंह:...................हरिणं विनायासं मारितवान्। (प्रबल/दुर्बल)

३. ...........दण्ड: कर्तित: चेत्........................ दण्डद्वयं सिद्ध्यति (ह्रस्व/दीर्घ)

४. कृषिक: ................भूमि जलसेचनेन...............करोति। (कठिन/मृदुल)

५. ..................हस्तेन स: जलेन...............चषकं गृहीतवान्। (रिक्त/पूर्ण)

६. ...............वस्त्रं प्रक्षालयतु,...............वस्त्रं धरतु तावत्।(मलिन/स्वच्छ)

७. ...................पुरुष: अवनम्य.........................जनस्य हस्तं गृहीतवान्। (उन्नत/वामन)

८. आशय: .................इत्यत:स: ................शब्दै: पुन: विवरणं कृतवान्। (स्फुट/अस्फुट)

९. .................अपि जना: सङ्घटिता: सन्त: ................. कार्यं साधयितुं शक्नुवन्ति। (सामानय/विशिष्ट)

१०. पिता ................... वस्त्रं यदा आनयति तदा बालाय..................वस्त्रं न रोचते एव। (प्राचीन/नूतन)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २३ अतः, यतः

लता – क्षम्यतां वीणे, यानं शीघ्रं न प्राप्तम्। अतः विलम्बः जातः। रेखा कुत्र ?

वीणा – सार्धषड्वादने मात्रा सह तया अन्यत्र गन्तव्यम् अस्ति। अतः सा पञ्चनिमेषेभ्यः पूर्वं गतवती।

लता – तर्हि इदानीं किं करवाव ?

वीणा – यतः विलम्बस्य कारणं भवती एव, अतः भवती एव सूचयतु – किं करणीयम् इति।

लता – उमाचित्रमन्दिरं गत्वा ........।

वीणा – सखि! तत्र अद्य महान् सम्मर्दः। यतः तत्रत्यं चित्रं नूतनम्। अन्यच्च नगरयानप्राप्तौ अपि क्लेशः। यतः एषः कार्यालयसमाप्तिसमयः। अतः ...........

लता – अतः तत्र गमनं मास्तु। एवं खलु?तर्हि अत्रैव उद्याने उपविश्य कलायं खादाम वा ?

वीणा – अनुमन्यते मया। यतः सूचना उत्तमा अस्ति। किन्तु यतः मासान्त्यम् अतः मम धनस्यूतः रिक्तः। यतः धनस्यूतः रिक्तः अतः भवत्या एव ..............

लता – अये, धनम् अहम् एव ददामि। आगच्छतु तावत्।

**विशेषः**

* **अतः** शैत्यम् अस्ति। अतः सः स्वेदकं धरति।

शैत्यम् अस्ति – कारणवाक्यम्

सः स्वेदकं धरति – कार्यवाक्यम्।

कारणवाक्यं पूर्वम् उक्तं चेत् कार्यवाक्यम् अनन्तरम् उच्यते। तदा कार्यवाक्ये 'अतः' इति योज्यते।

* **यतः**

सः स्वेदकं धरति। यतः शैत्यम् अस्ति।

अत्र कार्यवाक्यं प्रथमम् उक्तम्। अनन्तरं कारणवाक्यम् उक्तम्। अतः उत्तरवाक्ये (कारणवाक्ये) यतः इति योजितम्।

एवं च अयं निर्णयः यत् कारणवाक्यं प्रथमम् उक्तं चेत् 'अतः' इति योजयित्वा कार्यवाक्यं वक्तव्यम्। कार्यवाक्यं प्रथमम् उक्तं चेत् 'यतः' इति योजयित्वा कारणवाक्यं वक्तव्यम्।

**अभ्यासः – ८२**

अधोनिर्दिष्टेषु वाक्येषु 'कारणवाक्यं किं, कार्यवाक्यं किम्' इति निर्दिशन्तु।

उदा – कर्मकरः घटं भञ्जितवान्। अतः स्वामी कुपितः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कारणवाक्यम् – कर्मकर: घटं भञ्जितवान्।

कार्यवाक्यम् – स्वामी कुपित:।

१. निद्रा मां पीडयति। अत: अहं निद्रां करोमि।

कारणवाक्यम् – ............................................................................।

कार्यवाक्यम् – ..............................................................................।

२. गृहिणी पुष्पाणि क्रीतवती। यत: अद्य उत्सव:।

कारणवाक्यम् – ............................................................................।

कार्यवाक्यम् – ..............................................................................।

३. अहं घटीं न धरामि। यत: मम घटी सम्यक् नास्ति।

कारणवाक्यम् – ............................................................................।

कार्यवाक्यम् – ..............................................................................।

४. परीक्षा समीपम् आगता। अत: छात्रा: देवालयं गच्छन्ति।

कारणवाक्यम् – ............................................................................।

कार्यवाक्यम् – ..............................................................................।

५. अहं गच्छामि भगिनि! यत: मम कक्ष्या अस्ति।

कारणवाक्यम् – ............................................................................।

कार्यवाक्यम् – ..............................................................................।

६. स: प्रथमं स्थानं प्राप्तवान् अस्ति। अत: तस्य महान् सन्तोष:।

कारणवाक्यम् – ............................................................................।

कार्यवाक्यम् – ..............................................................................।

**अभ्यास: – ८३**

अध: निर्दिष्टेषु उदाहरणेषु कार्यवाक्यं प्रथमम् उक्तं वा, कारणवाक्यं प्रथमम् उक्तं वा इति परिशील्य उत्तरवाक्ये स्थितं रिक्तं स्थलम् 'अत:' इति पदेन, 'यत:' इति पदेन वा पूरयन्तु।

उदा – लेखन्यां मशी नास्ति। ...................... अन्यां लेखनीं स्वीकरोमि।

लेखन्यां मशी नास्ति। अत: अन्यां लेखनीं स्वीकरोमि।

१. स: उपवासम् आचरति। ........................................... अद्य एकादशी।

२. सा अस्वस्था। ..................................... सा चिकित्सालयं गच्छति।

३. मया बहु पठनीयम् अस्ति। ................................. अहं गच्छामि भो:।

४. तस्या: भीति:। ..........................................गृहे अन्य: कोऽपि नास्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. विद्यार्थी दोषं कृतवान्। ................................ अध्यापकः तं ताडितवान्।

६. वत्स! दीपं ज्वालयतु। .................................. लेखितुं प्रकाशः अपर्याप्तः।

७. गोपालः अस्वस्थः। ...................................... सः कक्ष्यां न आगतवान्।

८. गायिका न गीतवती। ........................... तस्याः कण्ठः अवरुद्धः अस्ति।

९. इदानीं मम भोजनेच्छा नास्ति। ................ मध्याह्ने आकण्ठं भुक्तं मया।

१०. चित्रमन्दिरं रिक्तम्। ........................................ चित्रं नीरसम् अस्ति।

११. अद्य वस्त्रं क्षालनीयम् एव। ........................ धर्तुम् अन्यत् वस्त्रं नास्ति।

१२. तस्य मुखं म्लानम्। .................................. सः परीक्षायाम् अनुत्तीर्णः।

१३. अद्य वृष्टिः आगता। ....................................श्वः बीजम् आरोपयतु।

१४. अद्य नगरसभाजलं न आगतम्। .................. सा कूपात् जलम् उद्धरति।

१५. भवतः हस्तः मलिनः अस्ति। ........................... प्रथमं हस्तं क्षालयतु।

## अभ्यासः - ८४

प्रथमगणे निर्दिष्टस्य कार्यस्य कारणं द्वितीयगणे अस्ति। तत् अन्विष्य 'अतः' इति शब्दं योजयित्वा समीचीनम् (अर्थपूर्णं) वाक्यम् अधः लिखन्तु।

| अ | आ |
|---|---|
| १. रामः अस्वस्थः अस्ति। | १. सः उग्ररूपं शुनकं पालयति। |
| २. सः चोरात् भीतः। | २. सा परीक्षायाम् अनुत्तीर्णा भविष्यति। |
| ३. कर्मकराः परिश्रमेण कार्यं कुर्वन्ति। | ३. सः जलं पिबति। |
| ४. ग्रामे वृष्टिः अधिका। | ४. सः कुत्रापि न गच्छति। |
| ५. याने इन्धनतैलं नास्ति। | ५. दश जनाः मृताः। |
| ६. भीमस्य बुभुक्षा। | ६. ते समीचीनां निद्रां प्राप्नुवन्ति। |
| ७. सीता पठने अलसा। | ७. सर्वे सदा छत्रं गृह्णन्ति। |
| ८. मार्गे अपघातः जातः। | ८. सः त्वरया भोजनं करोति। |
| ९. सुधीरस्य महती पिपासा। | ९. सः चिकित्सालयं गच्छति। |

**उदा - १. रामः अस्वस्थः अस्ति। अतः सः चिकित्सालयं गच्छति।**

२. ...............................................। ............................................।

३. ...............................................। ............................................।

४. ...............................................। ............................................।

५. ...............................................। ............................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. ..................................................। ..............................................।

७. ..................................................। ..............................................।

८. ..................................................। ..............................................।

९ ..................................................। ..............................................।

**अभ्यासः – ८५**

१. कार्यकर्तारः न आगताः। २. आरक्षकाः आगताः। ३. मम हस्ते घटी नास्ति। ४.माता अन्यत्र गता। ५. छात्रः कुचेष्टां कृतवान् ६. कथाः समीचीनाः न सन्ति। ७. अद्य अमावास्या। ८. प्राचीना पादरक्षा छिन्ना अस्ति। ९. अहम् उत्तरं न जानामि। १०.प्रातः उपाहारः न स्वीकृतः।

उपरि यानि कारणवाक्यानि निर्दिष्टानि तेषु 'यतः' इति पदं संयोज्य युक्तस्य कार्यवाक्यस्य पुरतः लिखन्तु।

**उदा – १. गोष्ठी व्याक्षिप्ता। यतः कार्यकर्तारः न आगताः।**

२. अध्यापकः छात्रं ताडितवान्। ..........................................................।

३. अहम् उत्तरं न वदामि। ..................................................................।

४. चोराः पलायनं कृतवन्तः। ..............................................................।

५. इदानीं मम महती बुभुक्षा। .............................................................।

६. कथापुस्तकं प्रत्यर्पयामि। ................................................................।

७. नूतनां पादरक्षां क्रीणामि। ...............................................................।

८. शिशुः रोदिति। ..............................................................................।

९. अहं समयं न ज्ञातवान्। .................................................................।

१०. आकाशे चन्द्रः न दृश्यते। ..............................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २४ स्म

श्रीपादः – शङ्कर! सप्ताहात् पूर्वं पुरन्दराचार्यः दिवङ्गतः इति वार्ता।

शङ्करः – एवं वा?महत् वार्धक्यम् आसीत् खलु तस्य ?बहु सम्यक् पाठयति स्म सः।

श्रीपादः – किन्तु भवान् तु न पठति स्म।

शङ्करः – आम्। तत् तु बाल्यम्। वयं शालाम् अगत्वा आम्रफलानि खादामः स्म। अरण्ये अटामः स्म।

श्रीपादः – कक्ष्यायां वयम् अनुपस्थिताः इति भगिन्यः गृहं गत्वा वदन्ति स्म। तदा गृहसदस्याः तर्जयन्ति स्म।

शङ्करः – भवन्तं तु तावत् न तर्जयन्ति स्म।

श्रीपादः – आम्! अहं रात्रौ पठामि स्म। अतः प्रथमश्रेण्याम् उत्तीर्णः भवामि स्म।

शङ्करः – स्मरणीयानि दिनानि तानि। ते हि नो दिवसाः गताः।

**विशेषः**

* **स्म**

वर्तमानक्रियापदेन सह 'स्म' इत्येतत् यदा युक्तं भवति तदा भूतकालार्थः दृश्यते। तात्कालिकभूतकालार्थे (Past Continuous) एतादृशः प्रयोगः विशेषतः क्रियते।

उदा – i. श्रीरामः अरण्ये सञ्चरति स्म।

ii. राक्षसाः जनान् पीडयन्ति स्म।

iii. बाल्ये अहं सर्वदा क्रीडामि स्म।

**अभ्यासः – ८६**

श्रीकण्ठः इदानीं मध्यवयस्कः। सः कदाचित् विरामकाले बाल्यस्य घटनाः स्मृतवान्। बाल्यस्य क्रियाः वर्तमानकाल-प्रथमपुरुषैकवचने निर्दिष्टाः सन्ति। तासां योग्यं रूपं ज्ञात्वा 'स्म' योजयित्वा रिक्तानि स्थलानि पूरयन्तु।

**उदा – बाल्ये अहं प्रातः अष्टवादने ( उत्तिष्ठति )................।**

**बाल्ये अहं प्रातः अष्टवादने उत्तिष्ठामि स्म।**

१. अहं नद्यां (तरति) ..................................................................।

२. माता मा बहुधा (तर्जयति) .......................................................।

३. कक्ष्यायाम् अहं प्रथमस्थानं (प्राप्नोति) .......................................।

४. अध्यापकाः मम प्रशंसां (क्रीडति)...............................................।

५. वयं सर्वे तिन्त्रिणीवने (क्रीडति) ................................................।

६. गृहात् खाद्यानि आनीय वयं वने (खादति) .................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

७. मातामही रमणीया: कथा: (वदति) ........................................।

८. बाला: वयं श्रद्धया (शृणोति) ................................................।

९. रात्रौ स्वप्ने पिशाचा: भयं (जनयति) .......................................।

१०. वयं महिषीभि: सह अरण्यं (गच्छति) ...................................।



अभ्यास: - ८७

चन्द्रकान्त: बाल्ये किं किं करोति स्म ?

१. बहुनिद्रा २. सम्यक् पठनम् ३. देवस्य पूजा ४. वृक्षारोहणम् ५. पयोहिमखादनम्

६. प्रवास: ७. सङ्गीताभ्यास: ८. योगासनम् ९. मातृसेवा १०. तुलसीपूजा ११. देवध्यानम् १२. सस्यानां वर्धनम् १३. मूल्याङ्कसङ्ग्रह: १४. पत्रिकाविक्रयणम् १५. अन्येषाम् उपहास:।

**उदा - १. चन्द्रकान्त: बाल्ये बहुनिद्रां करोति स्म।**

२. चन्द्रकान्त: बाल्ये ......................................................................।

३. चन्द्रकान्त: बाल्ये ......................................................................।

४. चन्द्रकान्त: बाल्ये ......................................................................।

५. चन्द्रकान्त: बाल्ये ......................................................................।

६. चन्द्रकान्त: बाल्ये ......................................................................।

७. चन्द्रकान्त: बाल्ये ......................................................................।

८. चन्द्रकान्त: बाल्ये ......................................................................।

९. चन्द्रकान्त: बाल्ये ......................................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१०. चन्द्रकान्तः बाल्ये ............................................................।

११. चन्द्रकान्तः बाल्ये ............................................................।

१२. चन्द्रकान्तः बाल्ये ............................................................।

१३. चन्द्रकान्तः बाल्ये ............................................................।

१४. चन्द्रकान्तः बाल्ये ............................................................।

१५. चन्द्रकान्तः बाल्ये ............................................................।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २५ य: - स:, यथा - तथा, यत्र - तत्र

श्याम: - शारदे! पश्यतु, क: आगतवान् अस्ति इति।

शारदा - (बहि: आगत्य) अये कृष्ण! भवान्!!

कृष्ण: - आम्। स: एव कृष्ण: अयं, य: पूर्वं भवत्या: गृहं सप्ताहे त्रिवारम् आगच्छति स्म। य: मध्यरात्रे अपि काफी पातुम् इच्छति स्म, य: मधुरं खाद्यं विशेषत: इच्छति स्म, यश्च भोजनं ददातु इति निर्लज्जं वदति स्म, स: एव कृष्ण: अहम्।

श्याम: - कथनस्य आशय: ज्ञात: खलु - यत् प्रियं तत् प्रथमं ददातु इति?

कृष्ण: - भवतु। यदि अहम् एतत् न अङ्गीकरोमि तर्हि, पूर्वं य: दृष्ट: स: एव अहम् इति न सिद्ध्यति खलु?अत: ददातु।

शारदा - कृष्ण: ! भवत: आकार: पूर्वं यथा आसीत् तथा एव अस्ति। कण्ठस्वर: अपि पूर्वं यथा आसीत् तथैव अस्ति।

कृष्ण: - व्यवहार: ?

शारदा - व्यवहार: अपि पूर्वं यथा आसीत् तथैव अस्ति।

कृष्ण: - तर्हि पूर्वम् अहं यथा आसं तथैव अस्मि इति तु सिद्धम्।

श्याम: - इदानीं कुत्र अस्ति भवान् ?

कृष्ण: - यत्र भवान् अस्ति तत्र एव। तन्नाम भवत: गृहे।

श्याम: - तत् तु ज्ञातम्। वास: कुत्र?कार्यं कुत्र ?

कृष्ण: - यत्र गच्छामि तत्र वास:। यत्र जना: सन्ति तत्र कार्यम्। अथवा यत्र सामाजिकसमस्या: सन्ति तत्र कार्यम्।

शारदा - तर्हि इदानीं सङ्घस्य प्रचारक: वा भवान् ?

कृष्ण: - आम्। सम्यक् ऊहितं भवत्या।

**विशेष:**

* **यत् - तत्**

'यत्'-शब्द: (य:/या/यत्) यत्र प्रयुज्यते तत्र 'तत्' - शब्द: (स:/सा/तत्) अपि प्रयोक्तव्य: एव। 'यत्-तत्' शब्दयो: समाना विभक्ति: एव भवेत् इति न नियम:। सन्दर्भानुगुणं तयो: विभिन्ना: विभक्तय: भवितुम् अर्हन्ति।

उदा - य: सम्यक् गायति तस्मै पारितोषिकं ददामि।

येन सह भवान् वार्तालाप कुर्वन् आसीत् स: क:?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यस्मिन् कथाः भवन्ति तत् पुस्तकम् अहम् इच्छामि।

यां लेखनीं भवान् इष्टवान् सा लेखनी आपणे न आसीत्।

*** यथा – तथा**

'यथा' इति शब्दः यत्र प्रयुज्यते तत्र 'तथा' इत्यपि प्रयोक्तव्यम् एव। सादृश्य प्रदर्शनार्थ 'यथा-तथा' शब्दयोः प्रयोगः क्रियते।

उदा – भवान् यथा कार्यं करोति तथा अहं कर्तुं न शक्नोमि।

*** यत्र – तत्र**

'यत्र' इति शब्दः यत्र प्रयुज्यते तत्र 'तत्र' इत्यस्य अपि प्रयोगः भवेत् एव। 'यत्र-तत्र' शब्दौ आधारं सूचयतः।

उदा – यत्र शर्करा भवति तत्र पिपीलिका आगच्छति।

**अभ्यासः – ८८**

'यत्-तत्' शब्दयोः उचितेन विभक्तिरूपेण रिक्तस्थानं पूरयन्तु।

उदा – तत्र ................ गच्छति .................... मम सहोदरः।

तत्र यः गच्छति सः मम सहोदरः।

१. तत्र सैकल्यानेन ....................... गच्छति ........................ मम पिता।

२. .....................रक्तशाटिकां धृतवती...................................मम भगिनी।

३. .................कोकिलः निवसति...................................एव आम्रवृक्षः।

४. ......................चित्रे एषः अभिनीतवान्.............चित्रेण प्रशस्तिः प्राप्ता।

५. भवान्..................वचनम् उक्तवान्..........................सत्यम् एव जातम्।

६. ........................भवान् धनं दत्तवान् .......................... न विश्वासार्हः।

७. ..........................गृहं षष्ठमुख्यमार्गे अस्ति..................पिता ह्यः दिवङ्गतः।

८. .........................सह भवान् आगतवान्..............मित्राय पानीयं दत्तं वा?

९. .....................सह एषा गतवती..................बालिकायाः माता मम सखी।

१०. ...................ललिता पत्रं लिखितवती......................अद्य अत्र आगता।

११. .......................गृहे अतिथिसत्कारः प्रचलति..................देवाः निवसन्ति।

१२. ...................गृहात् भवता पत्रिका आनीता......................गृहस्य स्वामिनः नाम किम् ?

१३. ................सख्यै भवत्या ह्यः लेखनी न दत्ता ............... अद्य वा ददातु।

१४. ................. बालिकायाः माता विवेकिनी.............प्रगतिः निश्चिता एव।

१५. भवान् .......................... जनं पश्यति .....................धनं मा प्रार्थयतु।

**अभ्यासः – ८९**

रिक्तस्थानानि 'यथा-तथा' इत्येतेन 'यत्र-तत्र' इत्येतेन वा पूरयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

उदा – भवत: गृहं कुत्र अस्ति?

.............. नारिकेलवृक्ष: अस्ति .......................... एव मम गृहम् अस्ति।

यत्र नारिकेलवृक्ष: अस्ति तत्र एव मम गृहम् अस्ति।

१. अम्ब! मम लेखनी कुत्र ?

............................. पुस्तकादीनि सन्ति ......................... पश्यतु भो:।

२. मया उक्तं कार्यं भवान् कृतवान् वा ?

कृतवान्, किन्तु .................. भवान् उक्तवान् ..............कर्तुम् अहं न शक्तवान्।

३. कार्यं कथं प्रचलति ?

................................... अपेक्षा .............................. तथैव प्रचलति।

४. भगिनि! मम टिप्पणीपुस्तकं कुत्र ?

भवान् ........................ स्थापितवान् .................... एव अस्ति, पश्यतु।

५. कीटनिवारकचूर्णं कुत्र कुत्र स्थापितं भवता ?

............................पिपीलिका: आसन् .................... सर्वत्र स्थापितम्।

६. कथम् अस्ति एतस्य अभिनय: ?

...............................देवानन्द: अभिनयति......................उत्तम: नास्ति।

७. सर्वं सम्यक् कृतवान् खलु भवान् ?

.................................भवता उक्तं................................एव कृतम्।

८. अम्ब! एतत् कुत्र स्थापयामि?

तत्र मा स्थापयतु रे, .................. जलं नास्ति ................एव स्थापयतु।

९. अम्ब! अहं क्रीडितुं गच्छामि वा ?

..............................इच्छा अस्ति ....................................... करोतु।

१०. महान् कोलाहल: भो: अत्र!

..........................जना: भवन्ति................................कोलाहल: सहज:।

११. करपत्राणि कुत्र वितरणीयानि ?

........................जनसञ्चार: अधिक: .........................................।

१२. कथम् अस्ति मम शाटिका ?

............................भवती सुन्दरी .....................भवत्या शाटिका अपि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २६ यद्यपि - तथापि, यावत् - तावत्, यदा - तदा

श्यामः - मित्र! प्रचारकत्वं मास्तु इति गृहसदस्याः न उक्तवन्तः वा ?

कृष्णः - यद्यपि ते तथा उक्तवन्तः तथापि अहं तत् न परिगणितवान्।

श्यामः - इदानीं कथम् अस्ति स्थितिः ?

कृष्णः - यद्यपि पूर्वं तेषाम् असन्तोषः आसीत् तथापि इदानीं सर्वे सन्तुष्टाः सन्ति।

शारदा - यः प्रचारकः भवति तस्य गृहे एतत् सहजम्। तदस्तु कृष्ण। पानीयं किं ददामि ?

कृष्णः - भवती यत् ददाति तत्। यावत् ददामि तावत्।

श्यामः - खाद्यम् अपि भवती यावत् ददाति तावत् खादति सः।

कृष्णः - यावत् शक्यते तावत् खादामि। अवशिष्टं नयामि।

*(पानीयसेवनस्य अनन्तरं गन्तुम् उद्युक्तःकृष्णः।)*

शारदा - पुनः भवतः आगमनं कदा ?

श्यामः - यदा समयः भवति तदा। एवं ननु कृष्ण ?

कृष्णः - तथा न। यदा भवन्तः स्मरन्ति तदा।

शारदाः - वयं सर्वदा भवन्तं स्मरामः एव।

कृष्णः - तर्हि यदा तीव्रं स्मरन्ति तदा।

श्यामः - सर्वम् एतत् मिथ्यावचनम्। प्रचारकस्य भवतः अत्र आगमनार्थं समयः कथं भवेत् ?

कृष्णः - अलं चर्चया। यदा खाद्यखादनेच्छा भवति तदा भगिनीं स्मरामि। यदा भगिन्याः स्मरणं भवति तदा अत्र आगच्छामि। अस्तु, मम विलम्बः जातः। आगच्छामि। तावत्।

**विशेषः**

*** यदा - तदा**

'यदा' - तदा इत्येतत् युगलं कालं प्रदर्शयति। 'यदा' इति यत्र प्रयुज्यते तत्र 'तदा' इति शब्दः अपि प्रयोक्तव्यः।

उदा - यदा अहं भवतः गृहम् आगतवान् तदा भवान् गृहे न आसीत्।

*** यावत् - तावत्**

'यावत् - तावत्' - इत्येतत् युगलम् अवधि (दैर्घ्यं कालं च) सूचयति। 'यावत्' इत्यस्य प्रयोगः कृतः चेत् 'तावत्' इत्यपि प्रयोक्तव्यम् एव।

*** यद्यपि-तथापि**

'यद्यपि-तथापि' इत्येतयोः अपि सहैव प्रयोगः करणीयः।

उदा - यद्यपि धनम् अस्ति, तथापि सः दानं न करोति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

**अभ्यासः - १०**

धर्मेन्द्रः विस्मरणशीलः। सावित्री तस्य पत्नी। सा पत्युः अनुकूला। पत्युः विस्मरणशीलताम् अवगच्छन्ती सा सदा साहाय्यं करोति। पतिः कुत्र गच्छति इति, सावित्री तस्मै किं ददाति इति च अधः निर्दिष्टम् अस्ति। तदाधारेण 'यदा-तदा' इति युक्तानि वाक्यानि लिखन्तु।

| | | |
|---|---|---|
| १. | क्षीरकेन्द्रम् | क्षीरपात्रम् |
| २. | आपणः | स्यूतः |
| ३. | वायुविहारार्थम् | दण्डः |
| ४. | स्नानार्थम् | प्रोञ्छः |
| ५. | दन्तधावनार्थम् | दन्तकूर्चः |
| ६. | कार्यालयः | लेखनी |
| ७. | ग्रन्थालयः | उपनेत्रम् |
| ८. | पठनार्थम् | काफीपानीयम् |
| ९. | प्रवासार्थम् | यानपेटिका |
| १०. | उद्यानकार्यार्थम् | खनित्रम् |
| ११. | क्रीडार्थम् | क्रीडासाधनम् |

**उदा - १. यदा धर्मेन्द्रः क्षीरकेन्द्रं गच्छति तदा सावित्री क्षीरपात्रं ददाति।**

२. ................धर्मेन्द्रः.................................सावित्री.............................।

३. ................धर्मेन्द्रः.................................सावित्री.............................।

४. ................धर्मेन्द्रः.................................सावित्री.............................।

५. ................धर्मेन्द्रः.................................सावित्री.............................।

६. ................धर्मेन्द्रः.................................सावित्री.............................।

७. ................धर्मेन्द्रः.................................सावित्री.............................।

८. ................धर्मेन्द्रः.................................सावित्री.............................।

९. ................धर्मेन्द्रः.................................सावित्री.............................।

१०. ................धर्मेन्द्रः.................................सावित्री.............................।

११. ................धर्मेन्द्रः.................................सावित्री.............................।

**अभ्यासः - ११**

रिक्तानि स्थानानि 'यदा-तदा' इत्येतेन 'यावत्-तावत्' इत्येतेन, 'यद्यपि-तथापि' इत्यनेन वा पूरयन्तु।

उदा - मित्र! सुरेशः कीदृशः?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स: .................. वदति .............. कार्यं न करोति।

स: यावत् वदति तावत् कार्यं न करोति।

१. एतत् कार्यं क: कृतवान् ?

प्रकाश: कृतवान्। .................... तस्य शिरोवेदना आसीत्..........स: कृतवान्।

२. जना: फलं कियत् प्राप्नुवन्ति?

ते कार्यं ................ कुर्वन्ति, फलं ...........................प्राप्नुवन्ति।

३. एतत् कार्यं किमर्थं न कृतवान् भवान् ?

विस्मृतवान् आसं भो:।.................माता स्मारितवती.....................स्मृतवान् अहम्।

४. कियद्दीर्घं भाषणम् आसीत् तस्य ?

.........................जना: न उत्थितवन्त:.....................भाषणं कृतवान् स:।

५. चायं न पीतं वा?कोषे धनं न आसीत् वा?

............मम कोषे धनम् आसीत्.................... चायं न पीतवान् अहम्।

६. अस्माकं गृहम् आगन्तुं न इच्छति वा भवान्?

'आगन्तव्यम्' इति...................इच्छा अस्ति..................समयाभावत: आगन्तुं न शक्नोमि।

७. एष: देवनागरीलिपिं जानाति वा ?

न। ........................................................................ एष: न जानाति

............................................................ ऊहां कृत्वा वाक्यानि पठति।

८. एष: सेवक: कथम् अस्ति।

..............वदाम: ................ एव करोति। ततोऽपि न किञ्चिदधिकम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २७ कति - कियत् - भेदः

पुत्रः - तात! सरोवरे कियत् जलम् अस्ति।

पिता - एतत् विशालं गभीरं च सरोवरम्। अतः अत्र प्रभूतं जलम् अस्ति।
अहम् एकं प्रश्नं पृच्छामि। सम्यक् उत्तरं वक्तव्यम्। अत्र कति हंसाः सन्ति ?

पुत्रः - एकं........द्वे........नव...........दश। दश हंसाः सन्ति?

पिता - तत्र कमलस्य पार्श्वे अपरः दृश्यते। अतः पुनः गणयित्वा वदतु, कति हंसाः सन्ति?

पुत्रः - एकादश हंसाः सन्ति ?

पिता - कति नौकाः सन्ति?

पुत्रः - तिस्रः नौकाः सन्ति। तात। एतस्य सरोवरस्य वैशाल्यं कियत् ?

पिता - अहं सम्यक् न जानामि। एकरज्जुद्वयमितं भवेत्।

पुत्रः - गंभीरता कियत् स्यात् ?

पिता - तदपि न जानामि वत्स। अगाधं सरोवरम् एतत्।

पुत्रः - तात! तत्र पश्यतु। सूर्यास्तस्य बिम्बं सरोवरे दृश्यते। कियत् रमणीयं दृश्यम् एतत्।।

**विशेषः**

*** कति - कियत् - भेदः**

- सङ्ख्यात्मकम् उत्तरं यदा अपेक्ष्यते तदा 'कति' (How Many) इति प्रष्टव्यम्।
  उदा - तत्र कति जनाः सन्ति ?दश जनाः सन्ति।
- परिमाणात्मकम् उत्तरं यदा अपेक्ष्यते तदा 'कियत्' (How much) इति प्रष्टव्यम्।
  उदा - सरोवरस्य वैशाल्यं कियत् ?
- दैर्घ्यं, वैशाल्यम्, औन्नत्यम्, भारः इत्यादयः परिमाणात्मकाः इति उच्यन्ते।
  यत्र गणना शक्या तत्रैव सङ्ख्यात्मकत्वम्।
- 'कति' इत्येतत् नित्यबहुवचनान्तम्। अतः 'कति सन्ति?' इति बहुवचनात्मकप्रश्नः एव प्रष्टव्यः। 'कति अस्ति?' इति प्रयोगः अशुद्धः।
- एकः/एका/एकम् अस्ति इति उत्तरं सम्भाव्यते चेदपि प्रश्नः तु 'कति सन्ति' इत्येव।
  उदा - भवतः कति मुखानि सन्ति ?एक मुखम् अस्ति। (एकवचनम्)
  भवतः कति हस्ताः सन्ति? द्वौ हस्तौ स्तः। (द्विवचनम्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| शुद्धम् | अशुद्धम् |
|---|---|
| कियत् उन्नतम्। | कति उन्नतम्! |
| कियद् विशालम्। | कति विशालम्! |
| कियत् उष्णम् | कति उष्णम्! |
| आसक्तिः कियत् ? | आसक्तिः कति! |

**अभ्यासः - ९२**

अधस्तनवाक्येषु स्थितानि रिक्तस्थानानि 'कति' इति पदेन 'कियत्' इति पदेन वा पूरयन्तु।

उदा - सः ........................ अन्नं खादति ?

सः कियत् अन्नं खादति ?

१. एतस्य भवनस्य औन्नत्यं ..........................................................स्यात्?

२. एतस्मिन् याने ..................................................................जनाः सन्ति?

३. एतस्य यानस्य वेगः ...........................................................स्यात्?

४. अहो, एतत् पानीयं ............................................................उष्णम्!

५. भवान् अद्य ........................................................ पाठान् पठितवान्?

६. भवान् अद्य ........................................................ कालं पठितवान?

७. छात्राः! एतं पाठम् अहं ह्यः ................................ पाठितवान् आसम्?

८. भवतः गृहे................................................................... जनाः सन्ति?

९. ...........................................................................दीर्घं भाषणं तस्य!

१०. उत्तिष्ठतु रे, इतोऽपि ....................कालं निद्रां कर्तुम् इच्छति भवान् ?

११. भवतः आगमनस्य अनन्तरं ...................................दिनानि अतीतानि?

१२. एतस्य मूल्यं.....................................................................?

१३. .................................................रूप्यकाणि आवश्यकानि भवते ?

१४. एतस्याः नद्याः दैर्घ्यं..........................................इति अहं न जानामि।

१५. इतोऽपि............................................................ कथनीयम् एतत?

(**सूचना** - 'कियान् वेगः' 'कियती श्रद्धा' इत्येवं कियत्-शब्दः विशेषणत्वेन अपि प्रयोक्तुं शक्यः। किन्तु स च



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# २८ यदि - तर्हि, चेत्, नो चेत्

मिलिन्दः - आगामिमासस्य कार्यक्रमस्य विषये चिन्तनम् एव न कृतम्। यदि एवम् एव दिनानि गच्छन्ति तर्हि ...

सुन्दरः - मित्र! चिन्ता मास्तु। यदि वयं सर्वे कार्याणि विभज्य स्वीकुर्मः तर्हि न कोऽपि क्लेशः भवेत्।

मिलिन्दः - यदि अस्माकं गोष्ठी भवति तर्हि खलु कार्यविभागः ?

सुन्दरः - अस्तु मित्र! अद्यैव गोष्ठी भवतु। आगच्छामि तावत्। यदि कार्यालयं विलम्बेन गच्छामि तर्हि मम अधिकारी तर्जयति।

मिलिन्दः - सायं मम गृहम् आगच्छति खलु भवान् ?

सुन्दरः - शक्यं चेत् सायम् आगच्छामि। नो चेत् दूरवाणीं करोमि।

मिलिन्दः - शक्यं चेत् इति ?

सुन्दरः - आम्। अद्य गणनापरिशोधकः अस्मत्कार्यालयम् आगतः अस्ति।सः प्रायः चतुर्वादने गच्छति। सः गच्छति चेत् अहं भवतः गृहम् अवश्यम् आगच्छामि। नो चेत् ...

मिलिन्दः - भोः, कार्यक्रमस्वरूपविषये अद्यैव निर्णेतव्यम् अस्माभिः।

सुन्दरः - शक्यं चेत् सायं मिलामः। नो चेत् श्वः प्रातः मिलामः।

मिलिन्दः - श्वः अरविन्दस्य समयः न भवति चेत्।

सुन्दरः - तर्हि अद्य रात्रौ अहम् अरविन्दस्य गृहं गच्छामि।

मिलिन्दः - सः गृहे अस्ति चेत् समीचीनम्। नो चेत् ... ?

सुन्दरः - नो चेत् उषसि पुनः गच्छामि। चिन्ता मास्तु भवतः।

**विशेषः**

* **यदि - तर्हि**

'यदि समयः अस्ति तर्हि अहम् आगच्छामि।' - एतस्मिन् वाक्ये भागद्वयम् अस्ति-

समयः अस्ति। - कारणवाक्यम्

अहम् आगच्छामि। - कार्यवाक्यम्

एवं वाक्ययोः कार्यकारणभावः यदा भवति तदा 'यदि-तर्हि' इति उपयुज्यते। 'यदि' इति यत्र उपयोगः क्रियते तत्र



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

'तर्हि' इत्यपि उपयोक्तव्यम् एव। केवलस्य 'यदि' इत्यस्य प्रयोगः नास्ति।

* **चेत्**

'यदि तर्हि' इति पदद्वयं यस्मिन् अर्थे उपयुज्यते तस्मिन् एव अर्थे 'चेत्' इत्यस्य अपि उपयोगः करणीयः।

उदा – समयः अस्ति चेत् अहम् आगच्छामि।

(यदि समयः अस्ति तर्हि अहम् आगच्छामि इत्यर्थः।)

'यदि-तर्हि', 'चेत्' इत्येतयोः अर्थः समानः इत्यतः 'यदि-तर्हि' इति यत्र प्रयुक्तं तस्मिन् वाक्ये 'चेत्' इति न प्रयोक्तव्यम्।

उदा – यदि समयः अस्ति चेत् तर्हि अहम् आगच्छामि-इत्येतत् वाक्यम् अशुद्धम्। यतः 'चेत्' इति यत्र अस्ति तत्र यदि इत्यपि प्रयुक्तम्।

## अभ्यासः – ९३

अधः शब्दद्वयं निर्दिष्टम् अस्ति। पूर्वार्धे प्रथमशब्दम्, उत्तरार्धे द्वितीयशब्दं च प्रयुज्य 'यदि-तर्हि' युक्तानि वाक्यानि लिखन्तु।

उदा – निद्रा-शयनम्

यदि निद्रा आगच्छति तर्हि शयनं करोतु।

१. ज्वरः – औषधम्

.................... अस्ति ....................................................................।

२. बुभुक्षा – भोजनम्

.........................................................................................................।

३. पिपासा – जलम्

.........................................................................................................।

४. दृष्टिदोषः – उपनेत्रम्

.........................................................................................................।

५. धनम् – उद्योगः

....................आवश्यकं...............................................................।

६. शान्तिः– आश्रमः

.........................................................................................................।

७. क्षीरम् – क्षीरकेन्द्रम्

.........................................................................................................।

८. कार्यसिद्धिः – परिश्रमः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

..........................................................................................।

९. चाकलेहः – आपणः

..........................................................................................।

१०. तृप्तिः – समाजसेवा

..........................................................................................।

**अभ्यासः – ९४**

समीरः शय्यादिवस्त्राणि भाटकार्थं ददाति। भाटकविवरणं तु –

| वस्तुनाम | एकदिनस्य | दिनद्वयस्य | दिनत्रयस्य |
|---|---|---|---|
| शय्या | ४.०० | ७.०० | १०.०० |
| वस्त्रकटः | ५.०० | ९.०० | १२.०० |
| उपधानम् | २.०० | ४.०० | ५.०० |
| आच्छादकम् | १.०० | २.०० | ३.०० |

उपरितनविवरणस्य आधारेण किं वस्तु कति दिनानि नीतं चेत् कियत् दातव्यम् इति 'यदि-तर्हि' युक्तेन वाक्येन लिखन्तु।

उदा- यदि शय्या एकं दिनं नीयते तर्हि भाटकं चत्वारि रूप्यकाणि।

१. ...............शय्या दिनद्वयं नीयते................भाटकं..............................।

२. ...............शय्या .................................भाटकं..............................।

३. ...............वस्त्रकटः ...........................................................।

४. ...............वस्त्रकटः ...........................................................।

५. ...............वस्त्रकटः ...........................................................।

६. ...............उपधानं ...........................................................।

७. ...............उपधानं ...........................................................।

८. ...............उपधानं ...........................................................।

९. ...............आच्छादकं ...........................................................।

१० ...............आच्छादकं ...........................................................।

११. ...............आच्छादकं ...........................................................।

**अभ्यासः – ९५**

अधः एकैकेन वाक्येन एकैकः सन्दर्भः निर्दिष्टः अस्ति। तत्सन्दर्भे भवन्तः किं कुर्वन्ति इति 'चेत्' युक्तेन वाक्येन लिखन्तु।

उदा – कार्यालयस्य विरामः भवति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कार्यालयस्य विरामः भवति चेत् गृहं गच्छामि।

१. गृहे कोऽपि नास्ति।

.............................................................................................।

२. कोषे धनं नास्ति।

.............................................................................................।

३. गृहम् अतिथिः आगच्छति।

.............................................................................................।

४. बालकाः कोलाहलं कुर्वन्ति।

.............................................................................................।

५. नागरयानानि न सञ्चरन्ति।

.............................................................................................।

६. स्यूतः नष्टः भवति।

.............................................................................................।

७. अधिकारी तर्जयति।

.............................................................................................।

८. चोराः आगच्छन्ति।

.............................................................................................।

९. पाके रुचिः न भवति।

.............................................................................................।

१०. रात्रौ निद्रा न आगच्छति।

.............................................................................................।

**अभ्यासः – ९६**

अधस्तनवाक्येषु स्थितानि रिक्तस्थानानि 'चेत्–नो चेत् – यदि तर्हि' इत्येतेषु केनचित् पदेन पूरयन्तु।

उदा – भवान् शीघ्रम् आगच्छतु। ................. पिता तर्जयति।

भवान् शीघ्रम् आगच्छतु। नो चेत् पिता तर्जयति।

१. औषधं स्वीकरोतु। ....................................................... ज्वरः वर्धते।

२. इच्छा अस्ति .............................................................भोजनं करोतु।

३. यदि अध्यापकः अस्ति। ....................................कक्ष्यायाम् उपविशामि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४. ............................................ भवान् मधुरं खादति तर्हि दन्ता: नश्यन्ति।

५. यदि भवान् असत्यं वदति ...................... क: भवति विश्वासं करोति?

६. परश्व: भवत: गृहम् आगमिष्यामि। ................................... प्रपरश्व:।

७. सम्यक् पठतु। ....................................................उत्तीर्णता कथं प्राप्येत?

८. सुरेश: आगच्छति ..................................................... माम् आह्वयतु।

९. यदि दैवम् अनुकूलकरं नास्ति ............................. क: किं वा कुर्यात्?

१०. उपविश्य पठतु। ..................................................... उत्थाय वा पठतु।

११. वृष्टि: आगच्छति ..................................................... मयूरा: नृत्यन्ति।

१२. समय: अस्ति ........................ भवान् आगच्छतु। ............अनुजं प्रेषयतु।

१३. ..........................यानं शीघ्रं प्राप्यते....................पञ्चवादने आगच्छामि।

१४. विना शब्दं पठतु ..................................................... इत: निर्गच्छतु।

१५. ......................देशभक्ति: अस्ति,....................कर्तव्यप्रज्ञा अस्ति, तर्हि समाजसेवां करोतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२१

## चित् - चन

पिता – एतत् क: आनीतवान्?

पुत्र: – अहम् एव आनीतवान्। कथम् अस्ति ?

पिता – उत्तमम् अस्ति। कुत: आनीतवान् भवान् ?

पुत्र: – अद्य सायं कदाचित् अहं विपणिं गतवान् आसम्। तत्र कुत्रचित् कश्चन एतस्य विक्रयणं कुर्वन् आसीत्।

पिता – किं मूल्यम् उक्तवान् स: ?

पुत्र: – मूल्यं यदा पृष्टं तदा स: 'कति आवश्यकानि ?' इति पृष्टवान्। कतिचित् ददातु इति अहम् उक्तवान्। तदा स: – 'श्रीमन्! एतत् इदानीं दुर्लभम्। कुतश्चित् अहं कथञ्चित् आनीतवान् अस्मि। एकम् एव अस्ति मम समीपे' इति उक्तवान्। अहम् अन्ते चर्चां कृत्वा विंशति: रूप्यकाणि दत्तवान्।

पिता – विपणित: कानिचित् विशालानि पिहितपत्राणि अपि आनेतव्यानि आसन्।

पुत्र: – विपणिं प्रति गमनं ममापि निश्चितं न आसीत्। केनचित् मित्रेण सह अहम् अकस्मात् गतवान्।

पिता – श्व: कार्यालयत: आगमनसमये कानिचन पिहितपत्राणि, काश्चन वर्णकूपी: काँश्चन कूर्चान् च आनयति वा भवान् ?

पुत्र: – तात। मम श्व: अन्यकार्याणि सन्ति। अत: अन्यं कञ्चित् प्रेषयतु भवान्।

पिता – अथवा श्व: कस्यचित् कार्यस्य निमित्तं मया एव विपणि: गन्तव्या भवेत्। पश्याम तावत्।

**विशेष:**

*** चित् - चन**

प्रश्नवाचकपदेन यदा 'चित्' 'चन' वा योज्यते तदा अनिश्चयार्थकत्वं सिद्ध्यति।

उदा – कदाचित् (कदा इति स्पष्टं न ज्ञायते।)
कुत्रचित् (कुत्र इति स्पष्टं न ज्ञायते।)
कथञ्चित् (कथम् इति स्पष्टं न ज्ञायते।)
कुतश्चित् (कुत: इति स्पष्टं न ज्ञायते।)
कतिचित् (कति इति स्पष्टं न ज्ञायते।)

'किं' शब्दस्य सर्वरूपै: सह 'चित्' 'चन' वा योजयितुं शक्यते। तदा यानि रूपाणि सिद्ध्यन्ति तानि विशेषणानि भवन्ति।

उदा – कश्चित् पुरुष:, काचित् बालिका, किञ्चन पुस्तकम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

| | पुल्लिङ्गे | | स्त्रीलिङ्गे | | नपुंसकलिङ्गे | |
|---|---|---|---|---|---|---|
| | ए.व. | ब.व. | ए.व. | ब.व. | ए.व. | ब.व. |
| प्रथमा | कश्चित् | केचित् | काचित् | काश्चित् | किञ्चित् | कानिचित् |
| द्वितीया | कञ्चित् | काँश्चित् | काञ्चित् | काश्चित् | किञ्चित् | कानिचित् |
| तृतीया | केनचित् | कैश्चित् | कयाचित् | काभिश्चित् | (पुंल्लिङ्गवदेव रूपम्।) | |
| चतुर्थी | कस्मैचित् | केभ्यश्चित् | कस्यैचित् | काभ्यश्चित् | ” | |
| पञ्चमी | कस्माच्चित् | केभ्यश्चित् | कस्याश्चित् | काभ्यश्चित् | ” | |
| षष्ठी | कस्यचित् | केषाञ्चित् | कस्याश्चित् | कासाञ्चित् | ” | |
| सप्तमी | कस्मिँश्चित् | केषुचित् | कस्याञ्चित् | कासुचित् | ” | |

चित्- चन इत्येतयोः अर्थभेदः कोऽपि नास्ति। कश्चित-कश्चन इत्यनयोः अर्थः समानः। एवम् एव इतरत्र अपि।

**अभ्यासः - ९७**

'कुत्रचित्' 'कदाचित्' 'कुतश्चित्' 'कथञ्चित्' 'कतिचित्' इत्येतेषु केनचित् रूपेण अधस्तनवाक्येषु स्थितानि रिक्तस्थानानि पूरयन्तु।

१. सः ...................................................... अत्र आगच्छति, न सर्वदा।

२. गृहे ...................................... स्थापितवान् स्याम्, यतः कोषे नास्ति।

३. कार्यं ........................................ साधनीयम्। कथमिति न जानामि।

४. शीतवायुः ......................................... आगच्छति। कुतः इति पश्यतु।

५. ............................................ पत्राणि ददातु। कति इति गणना मास्तु।

६. कुत्र स्थापनीयम् इति मां मा पृच्छतु। तत्रैव ........................ स्थापयतु।

७. ................भवतः गृहम् आगमिष्यामि। कदा इति इदानीं वक्तुं न शक्नोमि।

८. .......................अहम् अपघातात् रक्षितः। कथम् इति देवः एव जानाति।

९. देशे .......................कोलाहलः प्रचलति। परिणामस्तु समग्रे देशे दृश्यते।

१०. ..................................एषा वार्ता श्रुता मया। 'कुतः' इति तु न स्मरामि।

**अभ्यासः - ९८**

'अ' विभागे 'चित्/चन' युक्ताः शब्दाः सन्ति। 'आ' विभागे तेषाम् अर्थः निर्दिष्टः। 'अ' विभागे स्थितेषु आवरणेषु 'आ' विभागस्थस्य योग्यस्य वाक्यस्य सङ्ख्यां लिखन्तु।

| अ | आ |
|---|---|
| १. कश्चित् ( ) | १. 'कम्' इति स्पष्टं न ज्ञायते। |
| २. कञ्चित् ( ) | २. 'काः' इति स्पष्टं न ज्ञायते। |
| ३. कांश्चित् ( ) | ३. 'कस्मिन्' इति स्पष्टं न ज्ञायते। |
| ४. काञ्चित् ( ) | ४. 'केषु' इति स्पष्टं न ज्ञायते। |
| ५. काश्चित् ( ) | ५. 'कः' इति स्पष्टं न ज्ञायते। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

६. केषुचित् (                    )        ६. 'काम्' इति स्पष्टं न ज्ञायते।

७. कस्मिश्चित् (                    )        ७. 'कान्' इति स्पष्टं न ज्ञायते।

९. .................................. मित्रात् एतत् कथापुस्तकम् आनीतवान् अस्मि।

१०. खाद्यं ..................................................... स्थालिकायां स्थापयतु वत्से।

११. ......................................... कार्यस्य निमित्तं बहिः गतवान् अस्ति सः।

१२. .................................................... विशिष्टेन उद्देशेन एवं कृतम् अस्ति।

१३. .........................दुष्टः ............जनं मारितवान् चेत् भवतः किमर्थं खेदः?

१४. ................नगरे.................धनिकः...................बालकं पालयन् आसीत्।

१५. .....................प्रबन्धं,..............कथां,.............वर्णनं.......................घटनां वा सर्वे छात्राः लिखन्तु।

**अभ्यासः – १००**

'चित्/चन' सहितेन किं शब्दस्य योग्येन बहुवचनरूपेण रिक्तस्थानानि पूरयन्तु।

उदा – ..................ग्रामेषु जलाभावः अस्ति।

केषुचित् ग्रामेषु जलाभावः अस्ति।

१. ..........................................................जनानां प्रवृत्तिः विचित्रा भवति।

२. कर्णाटके..........................................शालासु कन्नडभाषा एव न श्रूयते।

३. .............................................................दिनेभ्यः सः अस्वस्थः अस्ति।

४. ....................................................कार्यकर्तृभिः एतत् कार्यं साधितम्।

५. भोः, ........................कर्मकरान् उद्यानकार्यार्थं प्रेषयतु। ....................
कर्मकरीः वृत्तिनिर्माणार्थं प्रेषयतु।

६. नलिकासमीपे ......................................... गृहिणीभिः कलहः कृतः।

७. एतस्य कार्यालयस्य..................प्रकोष्ठेषु दीपव्यवस्था सम्यक् नास्ति।

८. एतासु.........................................बालिकानां प्रगतिः तृप्तिकरी नास्ति।

९. ............................................. स्पर्धासु बहवः छात्राः भागं गृहीतवन्तः।

१०. ....................बालकानां गृहे पठनार्थम् अनुकूलकरः परिसरः न भवति।

११. ..............बालिकाभ्यः व्याकरणं रोचते, पुनः ..................... न रोचते।

१२. आर्य! नगरात्............कण्डोलान्, ..................सम्मार्जनीः, ...............
खनित्राणि च आनयतु कृपया।

१३. एतस्मिन् पुस्तके.............कथाः समीचीनाः। .............कथानां शैली
उत्तमा अस्ति। ................. कथासु पात्रचित्रणम् अपूर्वम् अस्ति।

१४. भवत्सु................................सत्यम् उक्तम्,................... असत्यम् उक्तम्।

१५. ग्रन्थालयस्य.......................पुस्तकानाम् आवरणं नष्टम्................पुस्तकेषु
.................पुटाः एव न सन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# अवधेयम्

अत्र व्याख्यायां यथाशक्यं सारल्यम् एव आश्रितम्। अतः प्रायः वाक्यविन्यासे पदयोः मध्ये सन्धेः अभावः एव आचरितः। कृते तु दुरूहे सन्धिकार्ये छात्राणाम् अवबोधने किमपि काठिन्यं भवतीति मत्वा एवमाचरितम् अस्ति। जनार्दनहेगडेमहाभागेन अपि तादृश एव पन्थाः आश्रितः। तस्य 'अभ्यासदर्शिनी' पुस्तके सन्धिकार्यं न क्वापि कृतमिव भाति। कृतेऽपि तथा प्रयासे स्वाभाविकं सन्धिकार्यं जातमेव क्वचित् स्थलेषु। यथा 'नास्ति' इत्यादि।

अध्यापकाः निवेद्यन्ते यत् छात्रान् सरलया कयाचित् शैल्या पाठयेयुः, तथाकरणेन छात्राणां मनसि कठिनं संस्कृतमिति भावः न तिष्ठति। वस्तुतः अध्यापकानां यः स्तरः स एव छात्राणामपि भवति, इति न। अतः छात्राणां स्तरं ज्ञात्वा तत्र च अध्यापकेनापि स्थित्वा पाठनीयम्। यत्र विद्वत्सु विद्वत्सभासु वा वैदुष्यम् अपेक्ष्यते तत्र भाषाविषयिणी चमत्कृतिरपि प्रयोक्तव्या एव, न सर्वत्र। अतः यथाशक्यं सारल्यमेव आश्रयणीयमिति निवेदितिः।

**संयोजकः**



Downloaded from https:// www.studiestoday.com